दर्शयति श्रुतिः—तत्र हि 'औपमन्यव कं त्वमात्मानमुपास्से' .... 'प्राचीनयोग्य-कं त्वमात्मानमुपास्से' इत्यादिप्रश्नानन्तरं 'दिवमेव भगवो राजन्' .... 'आदित्यमेव भगवो राजन्' इत्यादिप्रतिवचनैरवयवोपासनेऽभिहिते 'अत्त्यन्नं पश्यति प्रियम्' इत्यादिना तत्रतत्र फलनिर्देशं कृत्वाऽपि 'मूर्धा त्वेष आत्मन इति होवाच मूर्धा ते व्यपतिष्यद्यन्मां नागमिष्यः' इत्यादिराजवचनैरनर्थं ब्रवीति। अतः समस्तोपासनमेव मुख्यम् ॥

इति क्रतुज्यायस्त्वाधिकरणम् ॥ ३२ ॥

पासनस्यैव प्रामाणिकत्वं दर्शयतीत्यर्थः। नन्वनर्थवचनं न हि निंदान्यायेन समस्तोपासनास्तुत्यर्थतयोपपन्नं न निषेधानुमापकम्। तथात्वेऽपि लोकतः प्राप्तानां व्यस्तोपासनानां निषेधः तेषु विधेस्साधक एव न बाधक इत्याशङ्कानिराकरणमभिप्रेत्योपसंहरति—अत इति। मुख्यमिति। मुखे अग्रे भवं प्राचीनं प्रामाणिकमिति यावत्। अयमाशयः। अग्निहोत्रं प्रकृत्य श्रुतेन 'जर्तिलयवाग्वा जुहुयाद्गवीधुकयवाग्वा वा न ग्राम्यान्पशून्हिनस्ति नारण्यान्' इति वाक्येन जर्त्तिलगवीधुकशब्दवाच्यारण्यतिलारण्यगोधूमकृतयवाग्वोर्विकल्पेनाग्निहोत्राहुतौ द्रव्यत्वविधाने लिङ्विभक्तिबलेन ग्राम्यारण्यपशुहिंसारहिततया तयोः स्तवनेन च प्रतीयमानेऽपि 'अथो खल्वाहुरनाहुतिर्वै जर्त्तिलाश्च गवीधुकाश्च पयसाग्निहोत्रं जुहुया'दिति तदनंतरं जर्त्तिलादिप्रतिक्षेपेण पयोविधिदर्शनात् तदेकवाक्यतया 'जर्त्तिलयवाग्वा वा जुहुया'दित्यादेः ग्राम्यारण्यपशुहिंसाराहित्येन प्रशस्ततया होमार्हा अपि जर्त्तिला गवीधुकाश्च यदपेक्षया दुष्टाः तत्पयोऽत्यन्तं प्रशस्तमिति पयःस्तुत्यर्थत्वमेकवाक्यानुरोधादिति। न चेदन्यं प्रकल्पयेत्प्राकृप्तावर्थवादः स्यादानर्थक्यात्परसामर्थ्याच्चेति, पूर्वतन्त्राधिकरणे किञ्चिद्विधिपूर्वकं निन्दायास्सह विधिना विध्यंतरश्रवणे सति तदर्थवादत्वं तदेकवाक्यत्वानुरोधात्समर्थितम्। एवमिहाप्यङ्गीकर्त्तुं युक्तम्। ननु जर्त्तिलगवीधुकयोः पयसा सह संबन्धाभावाज्जर्तिलगवीधुकयवागूविधानयोः पयोविध्येकवाक्यतार्थवादतयैव समर्थनीयेति। तत्र तथास्तुनाम इह तु भूमविद्यायां नामादीनां सत्त्वेन ब्रह्मणा सह भूयस्त्वावधित एव दिवादीनां समस्तोपासनाविषयेण वैश्वानरात्मना सहावयवत्वेन संबंधोऽस्तीति प्रासंगिकतदुपासनाविधानैकवाक्यत्वभंगो नास्ति। अतो भूमविद्यान्याय एवात्र प्रवर्तते न तु जर्त्तिलयवागून्याय इति चेत् मैवम्। व्यस्तोपासनानां निन्दनेन 'मूर्द्धात्वेष आत्मन इति होवाचे'त्यादि वाक्येषु तु शब्दकृतेन दिवादीनां स्वतन्त्रोपास्यत्वव्यवच्छेदनेन 'तान्होवाचैते वै खलु यूयं पृथगिवेममात्मानं वैश्वानरं विद्वांसोऽन्नमत्थे'ति व्यस्तोपासनानां भ्रममूलत्वोद्घाटनेन भूमविद्यावैषम्यस्य बहुविधस्य सत्त्वेन जर्त्तिलयवागून्यायस्यैवात्र प्रवृत्त्यौचित्यादिति ॥ इति क्रतुज्यायस्त्वाधिकरणम् ॥ ३२ ॥

नयमणिमालायाम्

अथ क्रतुज्यायस्त्वाधिकरणम् ॥ ३२ ॥

सू० ॥ भूम्नः क्रतुवज्ज्यायस्त्वं तथा हि दर्शयति ॥ ५५ ॥

वैश्वानरलिङ्गानामप्युपासना भिन्ना। प्रत्येकमुपास्तिपदान्प्रति नियतत्वात्फलानां च ॥ २८१ ॥

तत्र समस्तोपास्त्यैवाक्यैकत्वाद्विधित्सितैकैव। अङ्गेषु दोषकथनादुपासनानां विधिर्नास्ति ॥ २८२ ॥

इति क्रतुज्यायस्त्वाधिकरणम् ॥ ३२ ॥

अथ नानाशब्दाद्यधिकरणम् ॥ ३३ ॥

सू ॥ नाना शब्दादिभेदात् ॥ ५६ ॥

इह परविद्यायामेकीकरणेनोपासनमुत भेदेनेति संशये नानाशाखाश्रुतानामपि विद्यानां वेद्यस्य ब्रह्मण एकत्वादेकीकरणेनोपासनम् । इति प्राप्ते उच्यते—अनन्तश्रुतिबोध्यानामनन्तानां विद्यानामेकीकृत्यानुष्ठानायोगात् स्वरूपैक्येऽपि ब्रह्मणो गुणभेदात् विद्याभेदः । यत्र गुणभेदो नास्ति तत्र स्थानादिभेदाद्विद्याभेदः । राजादिगुणभेदादिन्द्रस्य पुरोडाशदानभेदवत् गार्हपत्यस्थानादिभेदादग्नेरुपचारभेदवच्च विद्याभेद उपपन्न इति निरूपितम् । अतो

अथ नानाशब्दाद्यधिकरणम् ॥ ३३ ॥

सू० ॥ नानाशब्दादिभेदात् ॥ ५६ ॥ यत्र गुणभेद इति । सत्यविद्यायां हि 'सयो हवैतन्महद्यक्षं प्रथमजं वेदे'त्यत्र वेद्यस्य सत्यस्य ब्रह्मणो गुणभेदो नाम्नातः । तत्राक्षादित्यस्थानभेदात् विद्याभेद इत्यर्थः । ननु दहरवैश्वानरादिविद्यासु प्रत्ययावृत्तिरूपोपासनस्यैकरूपत्वाद्वेद्यस्य ब्रह्मणस्सर्वत्रैकरूपत्वाच्च विद्यैक्यमाशङ्क्य 'यथेंद्राय राज्ञ'इत्यत्र हविःप्रदानरूपस्य यागस्य सर्वत्रैकरूपत्वेऽपि यष्टव्यस्येंद्रस्यैकत्वेऽपि राजादिगुणभेदाद्यागभेदः तथा वेद्यगुणभेदाद्विद्याभेदः इति 'प्रदानवदेव तदुक्त'मित्यधिकरणे निरूपितम् । स्थानभेदाद्विद्याभेद इत्यपि आयतनभेदादग्नीनामुपचारभेदवदिति तत्रैव निरूपितप्रायं । किमर्थमिदमधिकरणमित्याशङ्क्य तत्राधिकरणे निरूपितत्वं तावदंगीकरोति । राजादिवदिति । तेनैव न्यायेनात्रापि निर्णय इत्यत आह—अत इति । न च शब्दाद्यनुबन्धभेदस्तत्र नोक्त इति तदर्थमिदमधिकरणं स्यादिति शङ्कनीयम् । 'यजति जुहोति ददाती'त्यादिपदपर्यायधातुभेदे हि शब्दान्तरन्यायः प्रवर्त्तते । विद्याप्रकरणेषु 'ध्यायेदुपासीत क्रतुं कुर्वीते'ति धातुभेदेऽपि नापर्यायतास्ति । न चोपकोसलविद्यादिषु केवलं विदिधातुप्रयोगोऽपि दृश्यते । तस्य ज्ञानसामान्यवाचित्वं नोपास्तिपर्यायतास्तीति वाच्यम् । ध्यानस्यैव साक्षात्कारजनकताया लोकदृष्टत्वेन 'ततस्तु तं पश्यते निष्कलं ध्यायमान' इति श्रुतिप्रतिपन्नत्वेन च मोक्षापेक्षितसाक्षात्कारसिद्धये तेषु विधिश्रवणस्य विद्यान्तरश्रुतोपासनार्थत्वस्यावश्याङ्गीकर्तव्यतया फलतः पर्यायत्वप्राप्तेः । न चावृत्त्यनपेक्षा सकृदेवानुष्ठेया साक्षात्कारद्वारिका, काचन मुक्तिहेतुर्विद्यास्ति । येनावृत्त्यनावृत्तिगुणविधावाचकधात्वोरपर्यायत्वेन तत्र शब्दान्तरन्यायस्समर्थेति तथाभूतविद्यायां प्रमाणाभावात् । तत्सत्वे च किमुपकोसलविद्यादयोऽपि तथैवावृत्तिनिरपेक्षाः मोक्षहेतव इति शङ्काया अशक्यनिरसनत्वेन तेषामुपासनाविशेषत्वाभ्युपगमस्य निर्मूलत्वापत्तेः । न च क्वचिद्विद्यायां विद्योपास्तौ व्यतिकरितप्रयोगसत्वात् तत्र विदे छागविदेन्यायेनोपासनापर्यवसानमस्तीत्येतावतान्यत्रापि तथा कल्पनं युक्तम् । कर्मकाण्डेऽपि 'योऽश्वमेधेन यजते य उ चैनमेवं वेदे'त्यादेरुपासनार्थत्वकल्पनाप्रसङ्गा'च्चित्रया यजेत पशुकाम' इत्यादावपि पशुशब्दस्य छागार्थत्वकल्पनाप्रसंगाच्च । तस्माद्विद्याविधिषु मुख्यस्य शब्दांतरस्यासंभवात् तत्तद्विद्याप्रकरणाम्नाता साधारणगुणकलापविशेषितविद्याविधय एव शब्दांतराणीव भवंति । 'अर्थेनैव विशेषो हि निराकार-

नानाप्रकारा विद्या शब्दाद्यनुबन्धभेदात् इति निर्णयः । पुनरधिकरणारम्भोऽयं ज्ञानस्याविधेयतानिरासार्थः ॥

इति नानाशब्दाद्यधिकरणम् ॥ ३३ ॥

अथ विकल्पाधिकरणम् ॥ ३४ ॥

सू ॥ विकल्पोऽविशिष्टफलत्वात् ॥ ५७ ॥

एवं नानाप्रकाराः परविद्या निरूपिताः । तासूपासकस्य विकल्पः समुच्चयो

तया धिया' मिति न्यायेन 'विद्यादुपासीत ध्यायेदि'त्याद्याख्यातैर्विधेयत्वेन समर्प्यमाणानां विद्यानां प्रायस्तत्तद्गुणरूपविषयविशेषविशिष्टतया परस्परविलक्षणत्वेनैव समर्प्यमाणत्वादित्येवमौपचारिकीदृशब्दान्तरोक्तिरित्येव समर्थनीयम् । एवं गुणभेदोपाधिकशब्दान्तरोक्तिर्विवक्षितविवेकेन गुणभेदोक्तिरित्येव पर्यवस्यति । गुणभेदाद्भेदस्तु प्रागेव समर्थितः । प्रकरणभेदादिकं च विद्याभेदे संभवत्प्रमाणं 'न वा प्रकरणभेदात्परोवरीयस्त्वादिव'दित्यादिसूत्रैस्तत्र तत्राविष्कृतम् । ब्रह्मगुणादिभेदेऽपि वेद्यब्रह्मैक्याद्विद्यैक्यशङ्कामात्रमवशिष्टं तदपि 'प्रदानवदेव तदुक्त'मित्यधिकरणे निराकृतम् । नात्र निराकरणीयं किञ्चिदस्ति । किमर्थं तर्ह्येतदधिकरणमित्याकाङ्क्षायामाह—पुनरिति । अविधेयज्ञानवादासंमतिसूचनार्थं ज्ञाने शब्दान्तररूपचोदनाभेदसद्भावप्रदर्शनं द्युसूर्यादिसमस्तावयवविशेषतया वैश्वानरविद्यैक्यवन्नानाशाखाम्नातनानाप्रकरणपठितसकलगुणविशेषतया ब्रह्मविद्यामात्रस्यैक्यमस्त्विति पूर्वाधिकरणसङ्गतशङ्कानिराकरणव्याजेन ज्ञानस्याविधेयतां निराकर्तुमिदमधिकरणमारब्धमित्यर्थः । यद्यपि 'सर्ववेदान्तप्रत्ययचोदनाद्यविशेषा'दिति सूत्रेण चोदनाग्रहणेनाविधेयज्ञानासङ्गतिसूचनं लब्धं तथापि तद्दृढीकरणमस्य फलमिति भावः ॥

इति नानाशब्दाद्यधिकरणम् ॥ ३३ ॥

अथ विकल्पाधिकरणम् ॥ ३४ ॥

सू० ॥ विकल्पोऽविशिष्टत्वात् ॥ ५७ ॥ विद्यानां विकल्पसमुच्चयचिन्ताविद्याभेदसिद्ध्यपेक्षत्वात्तदनन्तरं प्रवर्तत इति सङ्गतिं दर्शयन् किमासां विकल्प एव उत समुच्चयोऽपि संभवतीति समुच्चये फलभूयस्त्वसंभवाऽसंभवाभ्यां संशयं दर्शयति । एवमिति । फल-

---

नयमणिमालायाम्

अथ नानाशब्दाद्यधिकरणम् ॥ ३३ ॥

सू० ॥ नाना शब्दादिभेदात् ॥ ५६ ॥

सर्वास्वपि विद्यासु ब्रह्मैकं वेद्यमेकमेव फलम् । तस्माद्विद्यैक्यं स्यान्नानाशाखागुणौघसंकलनात् ॥ २८३ ॥
तावद्गुणसंकलनं कर्तुं शक्यं न केनापि । सच्छब्दान्तरमुख्यैरुपासनास्तत्र तत्र भिन्नाः स्युः ॥ २८४ ॥
ननु शब्दान्तरकथनं गुणभेदोपाधिकं हि विद्यासु । गुणभेदात्तद्भेदः प्रदानवदिति प्रसाधितः पूर्वम् ॥ २८५ ॥
सत्यं पुनरित्युक्तिरसावविधेयज्ञानमपनेतुम् । अपि च प्रकटीकर्तुं फलसंज्ञाभेदतोऽपि तद्भेदम् ॥ २८६ ॥

इति नानाशब्दाद्यधिकरणम् ॥ ३३ ॥

वेति संशयः ॥ किं प्राप्नोति? दहरविद्यासद्विद्यादीनां समुच्चयेनानुष्ठानमुचितम्, कर्मभूयस्त्वेन फलभूयस्त्वसंभवात् । विकल्पे तु किञ्चिन्नियामकं नास्ति ॥ इति प्राप्ते ब्रूमः—एकस्मिन्नुपासके सर्वासां परविद्यानां विकल्प एव । कुतः? निरतिशयब्रह्मानन्दानुभवस्य ब्रह्मसाक्षात्कारफलस्याविशिष्टत्वात् । प्रयोजनमेकेनोपासनेन यदि सिद्ध्यति किमन्यैरप्रयोजनैः । किंच, एकेनोपासनेन ब्रह्मस्वरूपापरोक्षं निरतिशयभावनया सिध्यति । ध्येयतादात्म्याभिमानात् । तदेकं परित्यज्यान्यत्र गमने चित्तविक्षेपः स्यात् । अतो विकल्प एव ॥

इति विकल्पाधिकरणम् ॥ ३४ ॥

अथ यथाकामाधिकरणम् ॥ ३५ ॥

सू ॥ काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात् ॥ ५८ ॥

इह ब्रह्मसाक्षात्कारव्यतिरिक्तफलानामपि विद्यानां पूर्वाधिकरणन्याय इति सन्देहे प्राप्तेऽभिधीयते—न पूर्वाधिकरणन्याय इह संभवति, वैषम्यात् । 'देवो

भूयस्त्वसंभवादिति । यद्यपि निरतिशयब्रह्मानन्दानुभवरूपे मोक्षे भूयस्त्वाल्पत्वविशेषो न संभवति । तथापि कासुचिद्विद्यासु लोकशेषप्राप्तिपूर्विका ब्रह्मप्राप्तिः । यथा मधुविद्यायां वस्वादिलोकप्राप्तिपूर्विका उपकोसलविद्यायामग्निलोकप्राप्तिपूर्विका इत्येवमन्तरालप्राप्यफलविशेषसत्वात्तल्लिप्सायाः समुच्चयोऽप्युपपद्यते । न च ब्रह्मप्राप्तिफलानां विद्यानामाप्रायणमहरहरनुष्ठेयत्वादनेकविद्यासमुच्चयानवकाशः आप्रायणमहरहस्सन्ध्योपासनाग्निहोत्रावसथ्यहोमादीनामिव समयभेदेन समुच्चयसंभवादिति भावः । अविशिष्टत्वादिति । सकलविषयभोगविरक्तानां मुमुक्षूणां ब्रह्मानुभव एक एवोद्देश्यं फलं । न त्वन्तराले भवदपि वसुभावादिकम् । अत उद्देश्यफलस्यैकत्वाद्विद्यानां विकल्प एवेत्यर्थः । यदि कश्चिन्नानालोकावाप्तिद्वारिकां क्रममुक्तिमपेक्षेत तस्य तल्लोकावाप्तिद्वारा मुक्तिफलानां विद्यानां समुच्चयस्स्यादित्याशङ्क्याह—किंचेति । चित्तविक्षेपः स्यादिति । एकस्यां विद्यायामभिरतस्य तत्रैकाग्र्यसिद्धये चित्तविक्षेपसमाधानार्थमुपासनानुष्ठानकालव्यतिरिक्तकालेष्वनुष्ठेयं मौनं 'सहकार्यन्तरविधि'रित्यधिकरणे प्रदर्शयिष्यते । अतो नास्ति विद्यान्तरावकाश इति भावः ॥

इति विकल्पाधिकरणम् ॥ ३४ ॥

अथ यथाकामाधिकरणम् ॥ ३५ ॥

सू० ॥ काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात् ॥ ५८ ॥ प्रत्युदाहरणसङ्गत्येदमधिकरणम् । पूर्वाधिकरणन्याय इति । अभ्युदयफलानामप्युपासनानां मोक्षफ-

---

नयमणिमालायाम्

अथ विकल्पाधिकरणम् ॥ ३४ ॥

सू० ॥ विकल्पोऽविशिष्टफलत्वात् ॥ ५७ ॥

तासां समुच्चयोपि स्याद्याव(त्सन्ध्यादिवद्य)नुष्ठातुः । फलभूयस्त्वमपेक्ष्य ज्योतिष्टोमाग्निहोत्रयोर्दृष्टेः ॥ २८७ ॥

तासां विकल्प एव ब्रह्मानन्दे फले विशेषाभावात् । साक्षात्कारायोगात्समुच्चये चित्तवृत्तिविक्षेपे ॥ २८८ ॥

इति विकल्पाधिकरणम् ॥ ३४ ॥

भूत्वा देवानप्येति' इति जीवत एव भावनाप्रकर्षवशाद्देवभावसाक्षात्कारप्राप्तिरवगम्यते परविद्यास्वहंग्रहवतीषु। न तथा नामब्रह्माद्युपासनासु काम्यासु साक्षात्कारफलत्वे किंचिन्मानमस्ति । तत्फलत्वाभावे च तत्र तत्र भोगभूयस्त्वापेक्षया समुच्चय एव युक्तः, ब्रह्मफलवदेकत्वाभावात्। तत एकं वा बहु वा समाश्रित्यानुष्ठेयमिति निर्णयः ॥

इति यथाकामाधिकरणम् ॥ ३५ ॥

अथ यथाश्रयाधिकरणम् ॥ ३६ ॥

सू ॥ अङ्गेषु यथाश्रयभावः ॥ ५९ ॥

इह पुनरुद्गीथाद्यङ्गावबद्धानां क्रत्वङ्गभावः स्वातन्त्र्यं वा ॥ इति संशये पूर्वपक्षन्यायः प्रवर्तते । उद्गीथादिष्वङ्गेषु श्रुतानामुपासनानामुद्गीथादिवत् क्रत्वङ्गभाव एव। गोदोहनादिवत् स्ववाक्ये फलाश्रवणात् ॥

लकोपासनानां मोक्षफलकोपासनावदुपासनात्वादुपास्यसाक्षात्कारापेक्षत्वमविशिष्टमिति भावः। न तथा नामब्रह्माद्युपासनास्विति। 'देवो भूत्वा देवानप्येती'ति जीवत एवोपास्यतादात्म्यभावनाप्रकर्षवशात्तथाभूतसाक्षात्कारकृतोपास्यदेवभावापत्तिर्ब्रह्मविषयास्वहंग्रहोपासनासूच्यते न काम्यासु। अतः काम्यविद्यानां यथाकालमनुष्ठितानां कालान्तरे चित्तविक्षेपेऽप्यपूर्वद्वारा फलजनकत्वाविरोधात्समुच्चयोपपत्तिरिति भावः ॥

इति यथाकामाधिकरणम् ॥ ३५ ॥

अथ यथाश्रयाधिकरणम् ॥ ३६ ॥

सू० ॥ अङ्गेषु यथाश्रयभावः ॥ ५९ ॥ अभ्युदयार्थोपासनवत्त्वङ्गाश्रितोपासनानामपि यथाकाम्यं प्रतिपाद्यत इति सङ्गतिमभिप्रेत्य संशयं दर्शयति—इह पुनरिति। पुनश्शब्दस्तन्निर्धारणानियम इत्यधिकरणे निर्णीत एवार्थे कैश्चन हेतुभिः पुनश्शङ्कोत्थानमित्यगतार्थतां सूचयति। यथाश्रयभाव इत्येतद्व्याचष्टे—उद्गीथवदिति। यथोद्गीथादीनामुपासनाश्रयाणां क्रत्वङ्गस्तोत्रसंबन्धेन क्रत्वङ्गभावस्तथोपासनानामपि क्रत्वङ्गोद्गीथादिसंबन्धेनेत्यर्थः। ननु गोदोहनादीनां प्रणयनाद्याश्रितानामपि प्रणयनादिवत्क्रत्वङ्गभावो नास्ति तथा किं न स्यादित्याशङ्क्य यथाश्रयभावइत्यनेन विवक्षितं तद्वैषम्यमाह—स्ववाक्य इति।

नयमणिमालायाम्

अथ यथाकामाधिकरणम् ॥ ३५ ॥

सू० ॥ काम्यास्तु यथा कामं समुच्चीयेरन्न वा पूर्वहेत्वभावात् ॥ ५८ ॥

एवं सति काम्यानामपि विद्यानां विकल्पनं न्याय्यम्। चित्ताविक्षेपेण ध्येयाविर्भावलाभाय ॥ २८९ ॥

तासां भवति विकल्पः समुच्चयो वा फलेऽभेदात्। ध्यानास्पदादसाक्षात्कृतिरहंग्रहोपासनास्वेव ॥ २९० ॥

इति यथाकामाधिकरणम् ॥ ३५ ॥

सू ॥ शिष्टेश्च ॥ ६० ॥

'उद्गीथमुपासीत' इति विधेः 'यदेव विद्यया करोति' इत्यत्र विध्यभावाच्चा-ङ्गभाव एव ॥

सू ॥ समाहारात् ॥ ६१ ॥

'होतृषदनाद्धैवापि दुरुद्गीथमनुसमाहरन्ति' इत्युपासनस्य समाहारे नियमो दृश्यते । अतोऽपि क्रत्वङ्गभावः । दुरुद्गीथो वेदनहीन उद्गीथः। वेदनहानौ अन्येन समाधानं ब्रुवद्वाक्यं हि तस्य नियमेनोपादानं दर्शयति । नियमाच्चाङ्गभावः ॥

सू ॥ गुणसाधारण्यश्रुतेश्च ॥ ६२ ॥

'तेनेयं त्रयीविद्या वर्तते ओमित्याश्रावयति ओमिति शंसति ओमित्युद्गायति' इति सर्वतः सञ्चरतः प्रणवस्य गुणत्वेनोपासनस्य सञ्चाराद्प्युपासनोपादाननियमोऽवगम्यते । तेनेति हि प्रकृतपरामर्शशब्दः, प्रकृतं सोपासनमेव प्रणवं परामृशति । अतः पूर्वोक्त उद्गीथाद्युपासनानामनियमो न संभवति ॥ इति प्राप्ते सिद्धान्त उच्यते—

सू ॥ न वा तत्सहभावाश्रुतेः ॥ ६३ ॥

अङ्गभावो हि सहभावः । तदश्रवणादेषां न तद्भावः । 'यदेव विद्यया करोति तदेव वीर्यवत्तरम्' इति फलान्तरसाधनतयाऽवगतानामुपासनानामङ्गभावाभावात् । 'उद्गीथमुपासीत' इत्युद्गीथाश्रयतामात्रप्रतिपादनान्न तेषामङ्गावबद्धानां क्रत्वङ्गभावः ॥

सू ॥ दर्शनाच्च ॥ ६४ ॥

'एवंविद्ध वै ब्रह्मा यज्ञं यजमानं सर्वांश्चर्त्विजोऽभिरक्षति' इति ब्रह्मणो वेद-

---

गोदोहनवाक्ये पशुकामपदसमभिव्याहारात्तृतीयया फले गोदोहनं विनियुङ्क्त इति युक्तं । तस्य फलार्थत्वात् । इह तु स्ववाक्ये फलश्रवणेन तादर्थ्याप्रतीतेः । प्रत्युत द्वितीयया क्रत्वङ्गसंस्कारस्यैव च प्रतीतेरुत्पत्तिवाक्येन क्रत्वङ्गत्वावधारणे सति विद्ययेति वाक्यान्तरे फलश्रवणमकिञ्चित्करमिति भावः ॥ सू० ॥ शिष्टेश्च ॥ ६० ॥ उद्गीथाङ्गत्वे विधिश्रवणमस्ति न फलार्थत्व इति वैषम्यान्तरम् । यदि तु विधिश्रवणाभावेऽपि 'यदेव विद्यये'ति तृतीयाश्रवणमस्तीति तत्फलार्थत्वे विधिः कल्प्येत, तथापि न तत्प्रथमप्रतीतक्रत्वङ्गत्वबाधकम् । यथा प्रस्तरप्रहरणस्य सूक्तवाक्येन 'प्रस्तरं प्रहरती'ति विहितस्य दर्शपूर्णमासप्रकरणावगते

नेन सर्वरक्षणं वदन्ती श्रुतिरुद्गातृप्रभृतीनां वेदनस्यानियमेनानङ्गतां दर्शयति। अतः पूर्वोक्त उपासनानामनियमो युक्त एव ॥

इति यथाश्रयाधिकरणम् ॥ ३६ ॥

इति श्रीकण्ठशिवाचार्यविरचिते ब्रह्ममीमांसाभाष्ये तृतीयाध्यायस्य तृतीयः पादः ॥ ३ ॥ ३ ॥

तदङ्गत्वे सत्येव मान्त्रवर्णिकेन फलेनाप्यन्वयः तथात्राप्युपपत्तिरिति भावः ॥

इति शिवातिवादिमूर्द्धन्यशिवदर्शनस्थापनधुरंधरसकलदेवभूदेवप्रतिष्ठापकश्रीमचिन्नबोम्मभूपालहृदयकमलकुहरविहरमाणश्रीसाम्बशिवप्रेरितस्य श्रीभरद्वाजकुलजलधिकौस्तुभविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पय्यदीक्षितस्य कृतौ श्रीकण्ठशिवाचार्यविरचितब्रह्ममीमांसाभाष्यव्याख्यायां शिवार्कमणिदीपिकाख्यायां तृतीयाध्यायस्य तृतीयः पादः ॥ ३ ॥ ३ ॥

नयमणिमालायाम्

अथ यथाश्रयभावाधिकरणम् ॥ ३६ ॥

सू० ॥ अङ्गेषु यथाश्रयभावः ॥ ५९ ॥ शिष्टेश्च ॥ ६० ॥ समाहारात् ॥ ६१ ॥ गुणसाधारण्यश्रुतेश्च ॥ ६२ ॥ न वा तत्सहभावाश्रुतेः ॥ ६३ ॥ दर्शनाच्च ॥ ६४ ॥

अङ्गाश्रितविद्यानामङ्गत्वं पर्णतादिवद्युक्तम् । तेनोभाविति वचसो हेतोरुद्गीथवचनेन ॥ २९१ ॥

न नयोऽत्र पर्णतायास्तृतीयया फलकारणतावगता । स्यात्तु दुरुद्गीथवचः फलार्थिनः प्रतिविधानपरम् ॥ २९२ ॥

इति यथाश्रयभावाधिकरणम् ॥ ३६ ॥

इति श्रीमदप्पय्यदीक्षितकृतौ अधिकरणसारसङ्ग्रहे नयमणिमालाख्ये तृतीयपरिच्छेदे तृतीयाध्यायस्य तृतीयः पादः ॥ ३ ॥ ३ ॥

॥ श्रीः ॥

शिवाभ्यां नमः ।

श्रीकण्ठाचार्यकृतौ

ब्रह्ममीमांसाभाष्ये

अथ तृतीयाध्यायस्य चतुर्थः पादः

अथ पुरुषार्थाधिकरणम् ॥ १ ॥

पूर्वत्रोपपादितः परविद्याप्रकारः । इह तु विद्यासहकारिण आश्रमधर्मादीन् निरूपयितुं विद्यात एव पुरुषार्थ इति दर्शयति—

सू ॥ पुरुषार्थोऽतः शब्दादिति बादरायणः ॥ १ ॥

अतो विद्यात एव पुरुषार्थः 'ब्रह्मविदाप्नोति परम्' 'ज्ञात्वा शिवं शान्तिमत्यन्तमेति' इत्यादिशब्दादिति भगवान् बादरायणो मन्यते ॥ तत् संभवति न वेत्युभयश्रुतिदर्शनात् संशये सति पूर्वपक्षः प्रवर्तते—

सू ॥ शेषत्वात् पुरुषार्थवादो यथाऽन्येष्विति जैमिनिः ॥ २ ॥

न विद्यातः पुरुषार्थः कुतः? 'तत्त्वमसि' इत्यादिसामानाधिकरण्येन कर्मसु

शिवार्कमणिदीपिकायाम्

तृतीयाध्यायस्य चतुर्थः पादः ॥

अथ पुरुषार्थाधिकरणम् ॥ १ ॥

सू० ॥ पुरुषार्थोऽतश्शब्दादिति बादरायणः ॥ १ ॥ प्रधानभूतविद्याप्रकारनिरूपणानन्तरं तदङ्गभूताश्रमधर्मादिनिरूपणमिति पूर्वपादसङ्गतपादार्थप्रदर्शनपूर्वकं विद्यायाः स्वातन्त्र्येण फलसाधनत्वे सिद्ध एव तदङ्गकर्मविशेषचिन्तनं युक्तमिति, विद्यायाः कर्माङ्गत्वशङ्कानिराकरणार्थं प्रथमाधिकरणं तदुपोद्घातत्वेनावतारयति—पूर्वत्रेति । सिद्धान्तोपक्रममिदमधिकरणमिति सिद्धान्तप्रतिज्ञापरतया सूत्रं व्याचष्टे—अत इति । 'नाना शब्दादिभेदादित्याद्य'(ब्र० अ० ३ पा० ३ सू० ५६)धिकरणेषु प्रस्तुता विद्या सर्वनाम्ना परामृश्यत इति भावः । तदिति । विद्यातः पुरुषार्थ इत्येतत्संभवति न वेति विद्यास्वातन्त्र्यतत्कर्माङ्गभावपर्यवसाय्युभयविधश्रुतिदर्शनात्संशय इत्यर्थः ॥ सू० ॥ **शेषत्वात्पुरुषार्थवादो यथान्येष्विति जैमिनिः** ॥ २ ॥ **शेषत्वादिति** हेतुमुपपादयन्व्याचष्टे—**तत्त्वमसीति** । 'द्रव्यसंस्कारकर्मसु परार्थत्वात्फलश्रुतिरर्थवादः स्या'दिति जैमिनिसूत्रे

---

(१) 'पूर्वकमुद्देश्यफलसाधनत्वे सिद्ध एव' इति ख. पाठः । (२) 'व्याचष्टे—**न विद्यातएवेति** । द्रव्यसंस्कार' इति. ख. पाठः ।

कर्तुरेव ब्रह्मत्वावगमात् । तद्वेदनस्य तत्संस्कारतया कर्मशेषत्वात् । फलश्रुतिस्तु 'द्रव्यसंस्कारकर्मसु' इति न्यायेनार्थवाद एव । अतो न विद्यातः पुरुषार्थ इति जैमिनिराचार्यो मन्यते ॥

सू ॥ आचारदर्शनात् ॥ ३ ॥

आचारोऽपि दृश्यते । अश्वपतिः केकयो ब्रह्मवित् 'यक्ष्यमाणो ह वै भगवन्तोऽहमस्मि' इत्याह । एवं केकयप्रभृतीनां ब्रह्मविदामपि कर्म प्राधान्येनावगम्यते । अतोऽपि विद्या कर्माङ्गमेव ॥

सू ॥ तच्छ्रुतेः ॥ ४ ॥

'यदेव विद्यया करोति' इति श्रुत्यैव विद्यायाः कर्मसु विनियोगादपि कर्माङ्गत्वम् । यत् करोति तद्विद्यया इति हि श्रुतेरर्थः ॥

'यस्य पर्णमयी जुहूर्भवति न स पापꣳश्लोकं शृणोति यदाङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते यत्प्रयाजानूयाजा इज्यन्ते वर्म वा एतद्यज्ञस्य क्रियते वर्म यजमानस्य भ्रातृव्याभिभूत्या' इत्यादिविधिविधेयेषु वाक्यप्रकरणावगतक्रत्वङ्गभावेषु पर्णादिद्रव्येष्वञ्जनादिसंस्कारेषु प्रयाजादिकर्मसु च फलश्रवणमर्थवाद इति निर्णीतम् । तन्न्यायेनेत्यर्थः । तत्र ह्यव्यभिचरितक्रतुसम्बन्धिजुहूद्वारा वाक्येन पर्णतायाः क्रतुशेषत्वमुक्तम् । स न्याय इहापि समानः । जीव एव हि ब्रह्म । 'तत्त्वमसी'त्यादिसामानाधिकरण्यात् । स यद्यपि लौकिकेष्वपि कर्मसु कर्ता भवति । तथापि तत्कर्तृत्वस्य देहादिव्यतिरेकेऽप्युपपत्तेः देहातिरिक्त आत्मा पारलौकिकफलैः क्रतुभिरेवापेक्ष्यत इति स तावत्क्रत्वव्यभिचारी । अत'आत्मानमुपासीते'त्यादिषु द्वितीयाश्रुत्या तत्संस्कारतयावगता विद्या तद्द्वारा क्रतुशेषभूतैवेत्यर्थः ॥ ननु 'तत्त्वमसी'त्यादिसामानाधिकरण्यं शरीरशरीरिभावनिबन्धनमित्यसकृदुपपादितं कथमिह तदपह्नवेन पूर्वपक्ष इत्याशङ्क्य विद्यायाः क्रतुशेषत्वप्रत्यायकं श्रुतिलिङ्गादिकं तदुपोद्बलकमस्तीति दर्शयितुमुत्तरसूत्राणि ॥ सू० ॥ आचारदर्शनात् ॥ ३ ॥ यद्यपि विद्यानिष्ठानां केकयप्रभृतीनां कर्मानुष्ठानं कर्मणो विद्याङ्गत्वेऽपि संभवति । तथाप्युभयथोपपन्नं 'तदात्मानमुपासीत' 'आत्मा द्रष्टव्य' इति द्वितीयाश्रुतिप्रत्ययावगतविद्यासंस्कार्यभावपारलौकिकात्मरूपकर्त्रुपस्थापितक्रतुशेषत्वावगतिस्वारस्यानुरोधात्कर्मप्राधान्ये तल्लिङ्गं भवतीति भावः ॥ विद्ययेति तृतीयाश्रुतेश्चैवमित्याह—सू० ॥ तच्छ्रुतेः ॥ ४ ॥ ननु 'यदेव विद्यया करोती'ति विद्यया क्रियमाणमनूद्यते । तच्च प्रागुद्गीथविद्यया क्रियमाणत्वेन प्रस्तुतं कर्मैव पर्यवस्यति । अतो नात्र विद्यामात्रस्य कर्मसु विनियोगावगतिरित्याशङ्क्याह —यत्करोतीति । सर्वनामावधारणाभ्यां व्याप्तिरधिगम्यते । 'य एव धूमवान्देशस्स एव वह्निमानि'तिवत् । ततश्च कर्ममात्रमनूद्य विद्यासाधनत्वेन विधीयते । न च सोमाङ्गोद्गीथसंस्काररूपा विद्या सर्वकर्मान्वयिनी भवितुमर्हतीत्यतः कर्तृभूतात्मसंस्कारद्वारि-

---

(१) 'रूपाया' इति ग. पाठः ।

सू ॥ समन्वारम्भणात् ॥ ५ ॥

'तं विद्याकर्मणी समन्वारभेते' इति विद्याकर्मणोरेकस्मिन् पुरुषे साहित्यं दृश्यते । अतश्च तदङ्गत्वमेव विद्यायाः ॥

सू ॥ तद्वतो विधानात् ॥ ६ ॥

'आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्त्य कुटुम्बे शुचौ देशे स्वाध्यायमधीयानो धार्मिकान् विदधत्' इत्यादावर्थज्ञानपर्यन्ताध्ययनवतः कर्म विधीयते । अतश्च ज्ञानस्य कर्माङ्गत्वम् ॥

सू ॥ नियमात् ॥ ७ ॥

'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳसमाः' इत्यात्मविदो जीवनस्य कर्मसु विनियोगो नियम्यते । अतश्च विद्या कर्माङ्गमिति । नातः पुरुषार्थ इति ॥ अथ सिद्धान्त उच्यते—

सू ॥ अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् ॥ ८ ॥

न विद्यायाः कर्मशेषत्वम् । अपितु विद्ययैव पुरुषार्थ इति बादरायणस्य मतमेव युक्तम् । कर्तुः प्रत्यगात्मनोऽर्थान्तरभूतस्यैव वेद्यतयोपदेशात् । तथा हि 'बहु स्यां प्रजायेयेति' 'स कारणं करणाधिपाधिपः' 'विश्वाधिको रुद्रो महर्षिः'

काया आत्मविद्याया अपि कर्माङ्गत्वमवसीयत इति भावः ॥ सू० ॥ समन्वारम्भणात् ॥ ५ ॥ तं परलोकं प्रयान्तं पुरुषं विद्याकर्मणी अनुवर्तेते इति द्वन्द्वावगतसाहित्ययोर्विद्याकर्मणोः फलदानायानुवृत्तिवचनमपि प्रागुक्तन्यायादुक्तरूपाङ्गप्रधानभावाभिप्रायमेवेति भावः ॥—सू० ॥ तद्वतो विधानात् ॥ ६ ॥ आचार्यकुलादिति । आचार्यकुलवासी सन्वेदमधीत्य यथाविधानं श्रुत्युक्तनियमैर्युक्तस्सन्नित्यर्थः । स्मृत्युक्तनियमेष्वपि गुरुशुश्रूषायाः प्राधान्यमुच्यते।गुरोः कर्मातिशेषेण गुरुशुश्रूषावशिष्टकालेनाधीत्येत्यन्वयः । अभिसमावृत्त्य गुरुकुलान्निवृत्त्य दारपरिग्रहपूर्वकं कुटुम्बे गार्हस्थ्याश्रमे स्थित्वा गार्हस्थ्येऽप्यविस्मरणार्थं वेदाभ्यासं कुर्वाण एव धार्मिकान्विदधत् पुत्रशिष्यादीन् धर्मनिरतान् कुर्वन् धर्मोपयुक्तार्थान् सम्पादयन्निति वा । एवमर्थज्ञानपर्यन्ताध्ययनवतः कर्मसु निरतेर्विधानं कर्मणां तदपेक्षत्व एवोपपद्यत इति तस्य कर्माङ्गत्वसिद्धिरिति भावः ॥ सू० ॥ नियमात् ॥ ७ ॥ 'ईशावास्यमिदꣳसर्व'मित्यात्मोपदेशपूर्वकं कुर्वन्नेवेति श्रवणमात्मविदो जीवनस्य कर्मसु विनियोगपरमिति विद्यायाः कर्मांगत्वसिद्धिरिति भावः । एवमौपनिषदस्यात्मज्ञानस्य कर्मसु विनियोगसिद्धौ तदुपोद्बलितं तत्त्वमस्यादिवाक्यं जीवस्वरूपमेव ब्रह्म नान्यदिति प्रतिपादनपरम् । तत्र च जगत्कारणत्वापहतपाप्मत्वादिवर्णनं स्तुत्यर्थमिति पूर्वपक्षाभिप्रायः ॥ सू० ॥ अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् ॥ ८ ॥ 'अधिकन्तु भेदनिर्देशा'दित्यादि (ब्र० अ० २ पा० १ सू० २२) सूत्रैः प्राग्व्यवस्थापित एव जीवाधिकब्रह्मोपदेशोऽनेन सूत्रेण स्मार्यते । 'तत्त्वम'स्यादिसामानाधिकरण्यस्य शरीरात्मभाव-

---

(१) 'तदपेक्षत्वादङ्गभाव इति' ग. पाठः । (२) 'विद्यायां विनियोजकमिति' इति. ग. पाठः ।

इत्यादिवाक्येषु वेद्यस्य ब्रह्मण आधिक्यं दृश्यते। अतो न विद्यायाः कर्मशेषत्वम् ॥ यदुक्तमाचारदर्शनं तत्राह—

सू ॥ तुल्यं तु दर्शनम् ॥ ९ ॥

विद्यायाः प्राधान्येऽपि तुल्यमाचारदर्शनम्, न केवलं कर्मण एव । 'एतद्ध स्म वै तद्विद्वांस आहु ऋषयः कावषेयाः किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे किं प्रजया करिष्याम' इत्यादौ ब्रह्मविदां कर्मत्यागो हि दृश्यते । अनुष्ठानं तु फलाभिसन्धानरहितस्य कर्मणो विद्याङ्गत्वेन। त्यागस्तु फलाभिसन्धानयुक्तस्येति विरोधाभावात् कर्मण एव विद्याङ्गत्वमिति विद्यायाः प्राधान्यमेव ॥ 'यदेव विद्यया' इति यदुक्तं तत्राह—

सू ॥ असार्वत्रिकी ॥ १० ॥

'यदेव विद्यया करोति' इति न सार्वत्रिकी विद्योच्यते, यदेव विद्ययेति प्रसिद्धवन्निर्देशात्। प्रसिद्धिरप्युद्गीथविद्याया एव । 'यदेव विद्यया करोति तदेव वीर्यवत्तरम्' इति प्रकृतोद्गीथविद्यायास्तद्युक्तस्य कर्मणो वीर्यवत्तरत्वसाधनभावो विधीयत इति न विद्या कर्माङ्गम् ॥ यदुक्तं 'तं विद्याकर्मणी' इति तत्राह—

सू ॥ विभागः शतवत् ॥ ११ ॥

'तं विद्याकर्मणी समन्वारभेते' इत्यत्र विद्याकर्मणोर्भिन्नफलत्वेन विद्या च स्वस्मै फलायान्वेति, कर्म च स्वस्मै फलायान्वेति इति विभागः, यथा क्षेत्ररत्नविक्रयणेन शतद्वयमित्यत्र क्षेत्रार्थं शतं रत्नार्थं शतमिति विभागः ॥

सू ॥ अध्ययनमात्रवतः ॥ १२ ॥

१ 'वेदमधीत्य' इत्यध्ययनमात्रवत एव कर्माविधानान्न विद्या कर्माङ्गम् । अध्यय-

निबन्धनत्वं प्राक्सिद्धमाचारदर्शनादिभिर्विद्यायाः कर्माङ्गत्वहेतुभिश्चालनीयं। न तु तद्युज्यते तेषामनन्तरसूत्रैर्निराकरिष्यमाणत्वादिति तत्स्मरणस्याभिप्रायः ॥ सू० ॥ तुल्यं तु दर्शनम् ॥ ९ ॥ ब्रह्मविदां कर्मानुष्ठानतत्त्यागदर्शनयोः कथं विरोधसमाधानमित्याकाङ्क्षायामाह—अनुष्ठानमिति ॥ सू० ॥ असार्वत्रिकी ॥ १० ॥ 'प्रसिद्धवन्निर्देशा'दित्युपलक्षणं 'यश्चैतदेवं वेदे'त्येवंशब्देन प्रकृतोद्गीथविद्याया एव परामर्शादित्यपि द्रष्टव्यम्। ततश्च विद्ययेत्यस्य प्रकृतोद्गीथविद्यामात्रपरत्वावश्यंभावात् 'यदेवेति' क्रतुप्रयोगपरमङ्गीकृत्य यं यं सोमयागप्रयोगं प्रकृतोद्गीथविद्यया करोति स सर्वोऽपि वीर्यवत्तरो भवतीत्यर्थो वर्णनीय इति भावः। अतो नौपनिषदात्मज्ञानस्य कर्माङ्गत्वशङ्कानवकाशः। 'यो वा एतदक्षरं गार्ग्यविदित्वास्मिन् लोके जुहोति यजते तपस्तप्यते अन्तवदेवास्य तद्भवती'ति कर्मनिन्दाप्रदेशेष्वौपनिषदात्मज्ञानरहितेन कृतानामपि कर्मणामन्तवत्स्वफलजनकत्वस्योक्तत्वादिति भावः ॥ सू० ॥ विभागः शतवत् ॥ ११ ॥ 'विद्याकर्मणी' इत्युद्देश्यगतं साहित्यमविवक्षितं तद्विवक्षायामपि कर्मणां विद्याङ्गत्वेऽपि तदुपपद्यत इति भावः ॥ सू० ॥ अध्ययनमात्रवतः ॥ १२ ॥ अध्ययनस्याक्षरावाप्तिफलकत्वमर्थज्ञानपर्यन्तत्वं चेति पक्षद्वयं प्रागुपपादितम्। पक्षद्वयेऽपि मीमांसापाठाधीनाद्वेदार्थनिर्णयादन्यस्याः कर्मवत्त-

नविधिरक्षरग्रहणमात्रे पर्यवस्यति । अर्थावबोधपर्यन्तत्वेऽप्यर्थज्ञानादर्थान्तरभूता विद्या । उपासीतेति विहिता विद्या प्रत्ययावृत्तिरूपा । अतोऽस्याः क्वापि न विशेषणभावः ॥

सू ॥ नाविशेषात् ॥ १३ ॥

'कुर्वन्नेवेह कर्माणि' इत्यत्र स्वतन्त्रे कर्मणि विद्वदायुषो विनियोग इति विशेषहेतुर्न दृश्यते । 'ईशावास्यमिदꣳसर्वम्' इति विद्याप्रकरणाच्च विद्याङ्गभूतमेतत् कर्मेति विज्ञायते । अतो न विद्यायाः कर्माङ्गत्वम् ॥

सू ॥ स्तुतयेऽनुमतिर्वा ॥ १४ ॥

विद्यामाहात्म्यात् सर्वदा कर्माणि कुर्वन्नपि तैर्न लिप्यते इति हि वाक्यशेषः । अतश्च विद्याया एव प्राधान्यम् ॥

सू ॥ कामकारेण चैके ॥ १५ ॥

'किं प्रजया करिष्याम' इत्यादिना कामकारेण विदुषो गार्हस्थ्यस्य त्यागमधीयत एके । अतोऽपि विद्या प्रधानभूता लक्ष्यते ॥

सू ॥ उपमर्दं च ॥ १६ ॥

विद्यया सर्वकर्मोपमर्दं चाधीयत एके—'क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे' इति । अतो न कर्मप्राधान्यम् ॥

दनन्तरमनुष्ठेयायाः प्रत्ययावृत्तिरूपाया विद्यायाः कर्माङ्गत्वं न प्रसज्यत इत्यर्थः । न च कृत्स्नवेदार्थनिर्णयवतः कर्मविधाने कृत्स्नस्यापि वेदार्थनिर्णयस्य सर्वापेक्षितत्वपर्यवसानात् । कर्मार्थ एव कृत्स्नो वेद इति स्वतन्त्रा विद्या प्रतिक्षिप्ता भवेदिति वाच्यम् । तद्वतो विधानेन हि वेदार्थनिर्णयः कर्मापेक्षित इत्येतावन्मात्रं सिध्यति । नत्वेकस्य कर्मानुष्ठाने कृत्स्नवेदार्थनिर्णयोऽप्यपेक्षित इति राजसूयादिवाक्यार्थनिर्णयस्य ब्राह्मणादिकर्मानुष्ठानानुपयोगित्वेन तथा तात्पर्यकल्पनायोगादिति भावः ॥ सू० ॥ नाविशेषात् ॥ १३ ॥ विद्या कर्माङ्गं न भवतीति सिद्धान्ते विदुषां सर्वथा कर्म नापेक्षितमिति नाभ्युपगमः । किन्तु विद्याङ्गं कर्मेति विदुषोऽपि कर्मापेक्षाभ्युपगम्यत एव । अत एव 'यो वा एतदक्षरं गार्ग्यविदित्वे'त्यादिवाक्येनाविद्वत्कर्मणामन्तवत्फलोक्त्या विद्यासाध्यमनन्तवत्फलमेव विद्वत्कर्मणां फलमिति तेषां विद्याङ्गत्वं सूच्यते । अतः 'कुर्वन्नेवे'त्यादिकं विद्याङ्गकर्मविषयतयोपपन्नमिति भावः ॥ सू० ॥ स्तुतयेऽनुमतिर्वा ॥ १४ ॥ 'विद्यामाहात्म्या'दित्यादिना वाक्यशेषोऽर्थतः पठितः । एवं त्वयि नान्यथेतोऽस्ति । न कर्म लिप्यते नर इति मन्त्रशेषः । विदुषा यावज्जीवं यत्किञ्चित्कर्म क्रियतां नाम । एवं कर्म कुर्वत्यपि त्वयि नरे कर्मश्लेषयोग्ये मनुष्येऽपि तत्कर्म न श्लिष्यते इतोऽन्यथा नास्ति इदं तत्त्वमिति विद्यामाहात्म्यस्तुतिः ॥ सू० ॥ कामकारेण चैके ॥ १५ ॥ अतोऽपि विद्येति । न हि कर्मप्राधान्ये बुद्धिपूर्वं प्रधानं त्यक्त्वाङ्गानुष्ठानमुपपद्यत इति भावः ॥ सू० ॥ उपमर्दं च ॥ १६ ॥ सर्वकर्मेति । विद्योदयात्प्राचीनं विद्याफलविरोधिफलं यत्कर्म तस्य सर्वस्याप्युपमर्दमि-

(१) 'मनन्तफलमेव' इति ग. पाठः । (२) 'प्राग्विरोधिफलं' इति ग. पाठः ।

सू ॥ ऊर्ध्वरेतस्सु च शब्दे हि ॥ १७ ॥

ऊर्ध्वरेतस्सु चाश्रमेषु विद्यादर्शनात् तेष्वग्निहोत्राद्यसंभवाच्च न विद्या कर्माङ्गम् । तथाहि—'त्रयो धर्मस्कन्धाः' इति वैदिके दृश्यन्ते त्रय आश्रमधर्माश्रयाः । अतो विद्यैव प्रधानभूता पुरुषार्थहेतुः । तस्यास्त्वङ्गतया प्रधानफलाभिसन्धिरहितस्य विहितकर्मणोऽनुवृत्तिरिति सिद्धम् ॥

इति पुरुषार्थाधिकरणम् ॥ १ ॥

अथ परामर्शाधिकरणम् ॥ २ ॥

सू ॥ परामर्शं जैमिनिरचोदनाच्चापवदति हि ॥ १८ ॥

पूर्वत्र 'त्रयो धर्मस्कन्धाः' इति त्रयाणामेवाश्रमाणां धर्माधारत्वमुक्तम् । अत

त्यर्थः । एवमेव हि चतुर्थाध्याये भाष्यकारो वक्ष्यति—'एतेन शङ्काप्येषा निरस्ता । सत्यपि निवर्त्यनिवर्तकभावविरोधे यथा कर्मणां विद्याङ्गत्वमभ्युपगम्यते तथा विद्यायाः कर्माङ्गत्वमभ्युपगम्यता'मिति । सिद्धान्ते हि येषां कर्मणां विद्यानिवर्त्यत्वं न तेषां विद्याङ्गत्वमिष्यते । उपनिषदां जीवातिरिक्तब्रह्मपरत्वमपहुत्य देहातिरिक्तात्ममात्रपरत्वमुपगम्य तद्वेदनं पारलौकिकसर्वकर्माङ्गमिति समर्थयमानस्य जैमिनेर्मते विद्यानिर्वर्त्यकर्मणामपि पारलौकिकात्मवेदनसाध्यत्वाविशेषेण विद्यां प्रति प्राधान्यमेष्टव्यमिति वैषम्यात् ॥ सू० ॥ ऊर्द्ध्वरेतस्सु च शब्दे हि ॥ १७ ॥ 'स्तुतयेनुमतिर्वे'त्येतदन्तैस्सूत्रैर्विद्यायाः कर्माङ्गत्वे पराभिमतानि साधकानि दूषितानि ॥

इति पुरुषार्थाधिकरणम् ॥ १ ॥

अथ परामर्शाधिकरणम् ॥ २ ॥

उपमर्दं चेति सूत्रेणानेन सूत्रेण च तत्र बाधकमुक्तम् । तत्रैतत्सूत्रोक्तं बाधकमाक्षिप्य समर्थयितुमधिकरणान्तरमारभ्यते—सू० ॥ परामर्शं जैमिनिरचोदनाच्चापवदति हि ॥ १८ ॥ अत्रायमाक्षेपप्रकारः । ऊर्द्ध्वरेतस्सु विद्यासद्भावो न विद्यायाः कर्माङ्गत्वबाधकः ।

नयमणिमालायाम्

अथ तृतीयस्याध्यायस्य तुरीयः पादः ॥ ३ ॥ ४ ॥

अथ पुरुषार्थाधिकरणम् ॥ १ ॥

सू० ॥ पुरुषार्थोऽतश्शब्दादिति बादरायणः ॥ १ ॥ शेषत्वात्पुरुषार्थवादो यथान्येष्विति जैमिनिः ॥ २ ॥ आचारदर्शनात् ॥ ३ ॥ तच्छ्रुतेः ॥ ४ समन्वारम्भणात् ॥ ५ ॥ तद्वतो विधानात् ॥ ६ ॥ नियमात् ॥ ७ ॥ अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् ॥ ८ ॥ तुल्यं तु दर्शनम् ॥ ९ ॥ असार्वत्रिकी ॥ १० ॥ विभागः शतवत् ॥ ११ ॥ अध्ययनमात्रवतः ॥ १२ ॥ नाविशेषात् ॥ १३ ॥ स्तुतयेऽनुमतिर्वा ॥ १४ ॥ कामकारेण चैके ॥ १५ ॥ उपमर्दं च ॥ १६ ॥ ऊर्ध्वरेतस्सु च शब्दे हि ॥ १७ ॥

ज्ञानं न मोक्षहेतुः कर्मसु तत्कर्तृसंस्मृतित्वेन । शेषत्वात्कर्तैव हि तत्त्वमसीत्युच्यते ब्रह्म ॥ २९३ ॥

अधिकोपदेशतस्तु ज्ञानं तद्विषयमत्र विधिविषयः । तस्य फलाकाङ्क्षायां मोक्षः स्याद्रात्रिसत्त्रनयात् ॥ २९४ ॥

इति नयमणिमालायां पुरुषार्थाधिकरणम् ॥ १ ॥

एवात्र चतुर्थाश्रमधर्मसद्भावे सन्देहे सति पूर्वः पक्षः—'त्रयो धर्मस्कन्धाः' इत्यादौ चतुर्थाश्रमाचोदनात् 'एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति' इत्यादि चतुर्थाश्रमवचनमुपासनस्तुत्यर्थवादमेव जैमिनिर्मन्यते । अपवदति हि 'वीरहा वा एष देवानां योऽग्निमुद्वासयते' इति श्रुतिः चतुर्थाश्रमम् । अतोऽग्निहोत्रपरित्यागे महान् दोष इति नास्ति तत्परित्यागेनाश्रमान्तरमिति ॥ अथ सिद्धान्तः—

सू ॥ अनुष्ठेयं बादरायणः साम्यश्रुतेः ॥ १९ ॥

गृहस्थाश्रमादिवदाश्रमान्तरमप्यनुष्ठेयमिति भगवतो बादरायणस्य मतम् । तत्र 'त्रयो धर्मस्कन्धाः' 'एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति' इति सर्वाश्रमसाम्यश्रुतेः । अभ्युद्वासनदोषो गृहस्थविषय एव । अतश्चतुर्थाश्रमधर्मसद्भावः ॥

पत्नीसन्निहिते वानप्रस्थे अग्निहोत्रादीनां सत्त्वान्नैष्ठिके पत्नीसापेक्षकर्मणामभावेऽपि जपतपोदानप्रभृतीनां स्वातन्त्र्येण पुण्यलोकसाधनानां सत्त्वात् । अत इत्थं पूर्वोक्तं बाधकमुपपादनीयम् । सन्यासिनि न विद्यायाः कर्माङ्गत्वं संभवति । मुमुक्षवेकाधिकारे सन्यासे अभ्युदयफलानां कर्मणामप्रसक्तेः । नित्यानामपि पत्नीसाध्यानामग्निहोत्रादीनामभावात् । स्नानशौचाद्याचाराणा'मानर्थक्यमिति चेन्न तदपेक्षत्वा'दिति (ब्र० ३-१-१०) सूत्रोक्तन्यायेन वैदिककर्माधिकारमात्रापादकानां स्वतन्त्रफलरहितानां कर्मवत्स्वाश्रमान्तरेषु कर्माधिकारार्थत्वस्येव मोक्षार्थविद्यावति सन्यासिनि विद्याधिकारार्थत्वस्यैव प्राप्तेरिति । नैतदुपपद्यते । सन्यासस्यैव शशशृङ्गायमाणत्वात् । 'त्रयो धर्मस्कन्धा यज्ञोऽध्ययनं दानमिति । प्रथमस्तप एव, द्वितीयो ब्रह्मचार्याचार्यकुलवासी, तृतीयोऽत्यन्तमात्मानमाचार्यकुलेऽवसादयन् सर्व एते पुण्यलोका भवन्ति ब्रह्मसंस्थोऽमृतत्वमेती'ति श्रुतौ गृहस्थवानप्रस्थनैष्ठिकानां त्रयाणामेवाश्रमाणां विधानेन सन्यासस्याचोदितत्वात् । न च 'ब्रह्मसंस्थोऽमृतत्वमेती'त्येषा सन्यासचोदनेति शङ्कनीयम् । 'त्रयो धर्मस्कन्धा'इत्युपक्रान्तसंख्याविरोधापत्तेः । 'ब्रह्मसंस्थोऽमृतत्वमेती'त्यस्य त्रिष्वेवाश्रमेषु कर्माङ्गभूतविद्याप्रशंसार्थत्वोपपत्तेः । न 'चैतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ती'ति श्रुत्यन्तरं सन्यासविधायकं स्यादिति वाच्यम् । अभ्युद्वासननिन्दाविरोधेन तस्यापि विद्याप्रशंसामात्रपरत्वादिति ॥ **सू० ॥ अनुष्ठेयं बादरायणः साम्यश्रुतेः ॥ १९ ॥** आश्रमान्तरं गार्हस्थ्यातिरिक्तमाश्रमत्रयम् । यद्यपि पूर्वपक्षिणस्सन्यासमात्रे विप्रतिपत्तिः । तथापि यथा 'त्रयो धर्मस्कन्धा' इत्यत्र विधिविभक्तिराहित्येऽपि ब्रह्मचर्यवानप्रस्थाश्रमयोर्गृहस्थाश्रमवदविगीतमनुष्ठेयत्वं एवं सन्यासस्यापि युक्तम् । 'एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ती'त्यत्रापि विधिविभक्तिराहित्यस्यानुष्ठेयत्वाविघातकत्वादिति दृष्टान्तदार्ष्टान्तिकतात्पर्येण त्रयमप्युपात्तम् ॥ नन्वभ्युद्वासने दोषश्रवणं सन्यासस्यानुष्ठेयत्वकल्पनाविरोधीत्याशङ्क्याह—**अभ्युद्वासनदोष इति** । गृहस्थस्यापि हि निमित्ते सति विधित उत्सर्गेष्टिपूर्वके त्यागे न दोषः । तस्मादवैधत्यागविषया दोषश्रुतिरिति प्रविव्रजिषोः त्यागविधिसद्भावात् । तस्यापि विधितस्त्यागो न दोषावह इति भावः । न चाश्रमत्रित्वसङ्ख्याविरोधः मो-

---

(१) 'पत्नीसाहित्यवानप्रस्थे' इति ग. पाठः । (२) 'वैराग्ये सति' इति ग. पाठः ।

सू ॥ विधिर्वा धारणवत् ॥ २० ॥

'उपरि हि देवेभ्यो धारयति' इत्यत्राप्राप्तत्वेन यथा विधिः। तद्वदत्रापि विधिरेव। अथवा। जाबालश्रुतौ प्रत्यक्षविधिरप्यस्ति 'ब्रह्मचर्यं समाप्य गृही भवेत् गृही वा

क्षाश्रमस्य चतुर्थस्य सद्भावेऽप्यभ्युदयसाधनधर्मप्रधानानामाश्रमाणां त्रित्वोपपत्तेः । अत एव 'सर्वे एते पुण्यलोका भवन्ती'ति तेषां धर्मफलभूता पुण्यलोकावाप्तिरुच्यते। न हि सन्न्यासस्य पुण्यलोकावाप्तिः फलम्। 'एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ती'त्यवधारणेन परब्रह्मातिरिक्तलोकेषणाव्यवच्छेदात्। तदनन्तरं 'ते ह स्म पुत्रेषणायाश्च वित्तेषणायाश्च लोकेषणायाश्च व्युत्थाय अथ भिक्षाचर्यं चरन्ती'ति स्फुटमेव लोकेषणाव्यावर्तनात्। 'सन्न्यासाद्ब्रह्मणः स्थानं ब्राह्मं सन्न्यासिनां स्मृत'मित्यादिवचनानि त्विहापरिपूर्णविद्यानां सन्न्यासिनां 'प्राप्य पुण्यकृतां लोका'निति स्मृतिवदान्तरालिकफलाभिप्रायाणि। अन्यथा श्रुतिविरोधापत्तेः। 'ब्रह्मसंस्थोऽमृतत्त्वमेती'त्येतत्तु ब्रह्मसंस्थशब्दस्य आग्नेयीन्यायेन यौगिकतया प्रकृतपरत्वेन त्रयाणामेतेषामाश्रमिणां मध्ये भाग्यवशाद्यस्य ब्रह्मसंस्था जाता तस्य मुक्तिरित्येतत्परम्। यथा 'राजगृहे ब्राह्मणा दशदश स्वर्णान् लभन्त' इति वचनानन्तरं 'ब्रह्मनिष्ठः शतं सुवर्णा'निति वचनं तेषां ब्राह्मणानां मध्य एव यो ब्रह्मनिष्ठस्तस्याधिकफलप्राप्तिप्रतिपादनपरम्। परिव्राजकस्य तु मुक्ति'रेतमेव प्रव्राजिन' इति। वचनान्तरेणैव प्रतिपाद्यत इति ॥ ननु त्रयो धर्मस्कन्धा इत्य'त्रैतमेव प्रव्राजिन' इत्यत्र च विधिविभक्त्यभावे कथमाश्रमाणामनुष्ठेयत्वसिद्धिरित्याशङ्क्य सार्वत्रिकीं गतिमाह—सू० ॥ विधिर्वा धारणवत् ॥ २० ॥ 'अधस्तात्समिधं धारयन्ननुद्रवेदुपरि हि देवेभ्यो धारयती'ति मृताग्निहोत्रप्रकरणगतश्रुतौ लिङ्विभक्तियोगादधोधारण इवाप्राप्तत्वादुपरिधारणेऽपि विधिराश्रीयते। 'विधिस्तु धारणेऽपूर्वत्वा'दिति पूर्वतन्त्राधिकरणे। स इह दृष्टान्तीकृतः। अवधारणार्थो वाकारः। एवं जाबालोपनिषदि श्रुतानाश्रमविधीन्करेण पिधाय प्रत्यक्षविध्यभावेऽपि गार्हस्थ्यादिवत्सन्न्यासस्यापि विधिकल्पनेनानुष्ठेयत्वसिद्धिरप्रत्यूहेति समर्थितम्। इदानीं विधिं सिद्धं कृत्वा चिन्तामुद्घाटयति—अथवेति। अस्मिन्पक्षे 'त्रयो धर्मस्कन्धा'इत्यादौ गार्हस्थ्यादिषु विधिर्न कल्पनीयः। अन्यतः प्राप्तिसंभवात्। अत्रापि तेषु विधिकल्पने विध्यनेकत्वेन वाक्यभेदापत्तेश्चेत्यनुवादत्वसूचनार्थस्सौत्रो हि वाकारः। यद्वा—गार्हस्थ्यादीनां क्षुद्रं फलमिति तत उत्कृष्टफलत्वेन स्तुत्या सन्न्यासमात्रे विधिः कल्पनीयः। ब्रह्मसंस्थशब्दस्य यौगिकत्वेऽपि संपूर्वस्य तिष्ठतेः समाप्तिवाचकतया कर्मव्यवच्छेदेन ब्रह्मैकनिष्ठत्वार्थकस्य सन्न्यासिन्येव व्यवस्थितत्वात्। तथा सत्येव गार्हस्थ्याद्यसाधारणधर्मोपन्यासपूर्वकतत्तदाश्रमसंकीर्तनप्रायपाठानुग्रहलाभाच्च । न चैवं सति सन्न्यासिनामेव मुक्तिः स्यान्न गृहस्थादीनामिति वाच्यम्। इतरनिन्दायाः स्तोतव्यस्तुत्यर्थतया स्वार्थे तात्पर्याभावेन 'स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभिसम्पद्यते ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसंभवन्ति' इत्यादिश्रुतिप्राप्तस्यार्थस्य तदप्रतिक्षे-

वनी भूत्वा प्रव्रजेत्' इति । नात्र क्रमे नियमः । 'उत्सन्नाग्निरनग्निको वा यदहरेव विरजेत् तदहरेव प्रव्रजेत्' इति श्रुतेः । जन्मान्तरसुकृतपरिपाकेन विशुद्धान्तःकरणस्य ब्रह्मचर्यादेव पारिव्राज्यं भवति ॥ "ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् । अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः ॥" इत्यादिनिषेधस्त्वविरक्तविषयः । 'वीरहा वा एष देवानां योऽग्निमुद्वासयते' इत्यग्न्युद्वासननिषेधात् ब्रह्मचर्यादेव पारिव्राज्यं न गार्हस्थ्यात्परमिति केचित् । तथा सति 'वनी भूत्वा प्रव्रजेत्...उत्सन्नाग्निरनग्निको वा यदहरेव विरजेत् तदहरेव प्रव्रजेत्' इत्यादिविधिवैयर्थ्यं स्यात् । अतो ब्रह्मचर्यादेव प्रव्रजेदिति वा, वनी भूत्वा प्रव्रजेदिति वा न निर्बन्धः कार्यः । ब्रह्मचर्यादेव प्रव्रजेदिति वदतामयमभिप्रायः—साग्निरनग्निकश्चेति द्वावेवाश्रमौ । तत्र ब्रह्मचारी परिव्राट् च अनग्निः, गृहस्थो वानप्रस्थश्च साग्निः । अग्निमाधायोद्वास्य पारिव्राज्यात् ब्रह्मचर्यात् पारिव्राज्यमेवातीव मुख्यमिति । अन्यथा श्रुतिविरोधापत्तेः । अतः सर्वाश्रमधर्मसिद्धिः ॥

इति परामर्शाधिकरणम् ॥ २ ॥

ध्यत्वात् । **नात्रेति** । अत्र सन्न्यासे उक्तक्रमो नियतो न भवतीत्यर्थः । इतरेषु त्रिष्वप्युक्तक्रमो नियत एव । **अविरक्तविषय इति** । अनत्यन्तविरक्तो यः क्रमसंपादनीयवैराग्यस्तद्विषय इत्यर्थः । **तथा सतीति** । तथा चोदाहृतवाक्यजाते दृढवैराग्यस्यैवाधिकारिविशेषणत्वश्रवणात् । सति तस्मिन् यदाकदाचित् सन्न्यस्तव्यमित्यर्थः । 'अथ यदि व्रती वाव्रती वा स्नातको वास्नातको वा उत्सन्नाग्निरनग्निको वे'ति विशिष्य केषाञ्चित्कीर्तनस्यायमभिप्रायः । उपक्रान्तमासोपवासादिव्रतेनान्तरा वैराग्ये सति व्रतसमाप्तिपर्यन्तं न विलम्बनीयम् । अनुपक्रान्तव्रतेनेव तदानीमेव सन्न्यस्तव्यम् । तथाध्ययनार्थमुपक्रान्तगुरुकुलवासेन समावर्तनपर्यन्तं न विलम्बनीयम् । समावृत्तेनेव तदानीमेव सन्न्यस्तव्यम् । विच्छिन्नाग्निना 'तथैके प्राजापत्यामेवेष्टिं कुर्वन्ति तदु तथा न कुर्यात् । आग्नेयीमेव कुर्या'दित्यादिना वक्ष्यमाणेष्टिपूर्वकाग्निसमारोपणाय अग्न्याधानपर्यन्तं न विलम्बनीयम् । अनग्निकेनेव अकृताग्निसमारोपणेनैव सन्न्यस्तव्यमिति ॥ ननु कथं प्रत्यक्षश्रुतौ विद्यमानायामेव तामविगणय्य केचिद्ब्रह्मचर्यादेव पारिव्राज्यं वदन्तीत्याशङ्क्य मुख्यत्वाभिप्रायेणेत्याह—**ब्रह्मचर्यादेवेति** । मुख्यत्वमपि सर्वत्र समानम् । अधिकारिविशेषणस्य वैराग्यस्यैकरूपत्वादिति केचिदित्यनेनैव ध्वनितम् ॥

इति परामर्शाधिकरणम् ॥ २ ॥

नयमणिमालायाम्

अथ परामर्शाधिकरणम् ॥ २ ॥

सू० ॥ परामर्शं जैमिनिरचोदनाच्चापवदति हि ॥ १८ ॥ अनुष्ठेयं बादरायणः साम्यश्रुतेः ॥ १९ ॥ **विधिर्वा** धारणवत् ॥ २० ॥

संन्यासे नास्ति विधिर्न कल्पनं वीरहेति दोषगतेः । तस्माद्विद्यास्तुतये श्रुतिषु परामर्शमेवास्य ॥ २९५ ॥

धारण इव विधिकल्पनमुचितं तस्मिन्नपूर्वत्वात् । दोषस्य श्रवणं तु तदुत्सन्नाग्निकगृहस्थपरम् ॥ २९६ ॥

इति परामर्शाधिकरणम् ॥ २ ॥

अथ स्तुतिमात्राधिकरणम् ॥ ३ ॥

सू ॥ स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ॥ २१ ॥

'ओमित्येतदक्षरमुद्गीथमुपासीत' इत्युपक्रम्य 'स एष रसानां रसतमः परमः परार्ध्योऽष्टमो य उद्गीथः' इत्येवंजातीयकोदाहरणे उद्गीथादिषु रसतमत्वादिदृष्टिर्विधीयते न वेति संशयः ॥ किं तावत् प्राप्तम् ? नोद्गीथादिषु रसतमत्वादिदृष्टिर्विधीयते, किंतु, 'इयमेव जुहूः स्वर्गो लोक आहवनीयः' इतिवत् कर्माङ्गभूतोद्गीथाद्युपादाय तस्य रसतमत्वादिवचनं स्तुतिमात्रमिति चेदिति पूर्वपक्षसमाप्तिः॥ सिद्धान्त उच्यते—नापूर्वत्वादिति । न स्तुतिमात्रं किंतूद्गीथादिषु रसतमत्वादिदृष्टिर्विधीयत एव, अपूर्वत्वात् । न चैवं जुहूरित्यादिन्यायावतारः, जुह्वादिविधिवदुद्गीथादिविधेरत्रासन्निधानात् । अतो रसतमत्वादिदृष्टिविधिरेव ॥

सू ॥ भावशब्दाच्च ॥ २२ ॥

'उद्गीथमुपासीत' इति विधिप्रत्ययश्चात्र श्रूयते । अतोऽपि रसतमत्वादिदृष्टि-

---

अथ स्तुतिमात्राधिकरणम् ॥ ३ ॥

सू० ॥ स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ॥ २१ ॥ स्तुतिविधिप्रसङ्गादिदमधिकरणम् । इत्युपक्रम्येति । श्रूयत इति शेषः । स एष इति । 'एषां भूतानां पृथिवी रसः पृथिव्या आपो रसो अपामोषधयो रसः ओषधीनां पुरुषो रसः पुरुषस्य वाग्रसः वाच ऋग्रसः ऋचस्साम रसः साम्न उद्गीथो रस' इत्यनुक्रान्तानां पृथिव्यादीनां रसानां रसतमः अतिशयितो रसः परमः उत्कृष्टः । उत्कृष्टत्वे हेतुः परार्ध्यः परस्य ब्रह्मणोऽर्धं स्थानमर्हति परमात्मोपासनास्थानभूत इत्यर्थः । अष्टमः पृथिव्यादिरसापेक्षया । कोऽसावेवंभूतः यदुद्गीथः उद्गीथावयवप्रणव एवंभूत इत्यर्थः । 'एवंजातीयक'मित्यनेन 'इयमेवर्गग्निस्साम'त्यादिकं गृह्यते 'इयमेव जुहू'रित्यादिनिर्देशसाम्यादुद्गीथादिविधिसमभिव्याहाराभावाच्च संशयं दर्शयति—किमिति । यद्यपि कर्माङ्गविषयगुणप्रतिपादनमात्रे स्तुत्यर्थत्वनियमो नास्ति । वर्णमय्यादिवाक्येषु व्यभिचारात् । उत्कृष्टत्वेन गुणविशेषणेऽपि नास्ति नियमः । 'हिरण्मय्यः स्रुचो भवन्ती'त्यादिषु व्यभिचारात् । तथाप्यननुष्ठेयत्वेनापि गुणविशेषणेऽस्ति नियमः । रसतमादिवाक्यानामुद्गीथादिसमभिव्याहाराभावेऽप्यव्यभिचरितविधिसम्बन्धिनोद्गीथादिनोपस्थापितेषु तत्तद्विधिषु स्तावकत्वेनान्वयस्संभवति । न च स्तावकवाक्यानां स्तुत्यविधिसमभिव्याहारनियमोऽस्ति । 'एतद्ब्राह्मणान्येव पञ्च हवींषि यद्ब्राह्मणानीतराणी'त्यतिदिष्टेषु पञ्चसञ्चरार्थवादेषु व्यभिचारात् तस्मादुद्गीथादिषु न रसतमत्वादिदृष्टिविधिरिति पूर्वपक्षमाह—नोद्गीथादिष्विति । असन्निधानादिति । प्रकरणे संभवदन्वयस्योत्कर्षो न युक्तः । पञ्चसञ्चरार्थवादानां तु वचनबलादन्यत्राप्यन्वय इति भावः ॥ सू० ॥ भावशब्दाच्च ॥ २२ ॥ न केवलं स्तुत्यर्थत्वप्रतिक्षेपकमुद्गीथादिविध्यसंनिधानमात्रं । किन्तु दृष्ट्यर्थत्वोपपादकमुपासनाविधिसन्निधानं चास्तीत्यनेन सूत्रेणोच्यते।

---

१ 'दृष्टिविधित्वोपपादक'मिति ग. पाठः ।

विधिरिति ॥

इति स्तुतिमात्राधिकरणम् ॥ ३ ॥

अथ पारिप्लवाधिकरणम् ॥ ४ ॥

सू ॥ पारिप्लवार्था इति चेन्न विशेषितत्वात् ॥ २३ ॥

वेदान्तेषु विद्यारम्भे—'प्रतर्दनो ह वै दैवोदासिः' इत्याद्याख्यायिका आम्नाताः। ताः पारिप्लवार्था उत विद्यास्तुत्यर्था इति संशयः ॥ किं तावत्प्राप्तम्? पारिप्लवार्था इति। अश्वमेधयागे राजानं सकुटुम्बमुपवेश्य तत्पुरतो वैदिकान्याख्यानान्यध्वर्युणा वक्तव्यानि। तदिदं पारिप्लवाख्यं कर्म 'पारिप्लवमाचक्षीत' इति वाक्येन विहितम्। तत्र 'सर्वाण्याख्यानानि पारिप्लवे शंसन्ति' इति विनियोगादुपनिषदारम्भगता अप्याख्यायिकास्तदर्था इति चेदिति पूर्वः पक्षः ॥ तत्रो-

---

न चोपासनविधिनान्वयेऽपि स्तुत्यर्थता किं न स्यादिति शङ्कनीयम्। विधिविषयसमर्पकतया प्रवृत्तिविशेषकरत्वे संभवति व्यर्थप्रायस्तुत्यर्थत्वकल्पनायोगादिति भावः। विधिप्रत्यययुक्तक्रियाशब्दोऽत्र भावशब्दो विवक्षितः ॥

इति स्तुतिमात्राधिकरणम् ॥ ३ ॥

अथ पारिप्लवाधिकरणम् ॥ ४ ॥

सू० ॥ पारिप्लवार्था इति चेन्न विशेषितत्वात् ॥ २३ ॥ रसतमत्वादीनामुपास्यविषयसमर्पकत्ववदाख्यानानां पारिप्लवप्रयोगविधिशेषत्वं स्तुत्यर्थत्वापेक्षया ज्यायः। प्रवृत्तिविशेषकरत्वादिति पूर्वपक्षोत्थानात्सङ्गतिः। 'सर्वाण्याख्यानानी'त्यविशेषश्रवणाद्वाक्यशेषे विशेषसंकीर्तनाच्च संशयः। उपक्रमश्रुतस्य 'सर्वाण्याख्यानानी'त्यस्य वाक्यशेषगतेनाख्यानविशेषसंकीर्तनेन सङ्कोचो न युक्तः। उपक्रमस्योपसंहारतः सर्वाख्यानश्रुतेराख्यानविशेषसन्निधानतश्च प्रबलत्वात्। अन्यथा 'एष वाव प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोमो य एतेनेमानिष्ट्वाथान्येन यजते' इत्यत्रान्यशब्दस्य ज्योतिष्टोमेतरसर्वक्रतुपरामर्शिनो 'यो हि त्रिवृदन्यं यज्ञक्रतुमापद्यते स तं दीपयति यः पञ्चदशस्स तं यस्सप्तदशस्स तं य एकविंशस्स त'मिति वाक्यशेषगतत्रिवृदादिस्तोमकक्रतुसंकीर्तनानुसारेण तावन्मात्रे सङ्कुचितवृत्तित्वापत्तेरिति पूर्वपक्षयति—तत्रेति। तदर्था इति। न्यायतौल्यात् कर्मकाण्डगताख्यानेष्वपि समानोऽयमाक्षेपः। न च यथा जपपारायणादिविनियुक्तानां विधिवाक्यानां विधायकत्वमपि। एवं पारिप्लवे विनियुक्तानामाख्यानानां स्तुत्यर्थत्वमप्यस्त्विति वाच्यम्। व्यर्थप्रायं हि स्तुत्यर्थत्वं सर्वथा प्रयोजनान्तराभावे कल्पनीयम्। पारिप्लवार्थत्वेन सार्थकत्वसंभवे च न व्यर्थं तल्लक्षणाक्लेशाश्रयणेन कल्पनी-

---

नयमणिमालायाम्

अथ स्तुतिमात्राधिकरणम् ॥ ३ ॥

सू० ॥ स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ॥ २१ ॥ भावशब्दाच्च ॥ २२ ॥

दृष्टिर्नोद्गीथादिषु रसतमतादेर्विधीयते श्रुत्या। कर्माङ्गगोचरतया यूपादित्यादिवत्स्तुतिपरत्वात् ॥ २९७ ॥

कर्माङ्गप्रकरणवैधुर्यान्नात्र तत्स्तवनम्। स्याद्विधिरुपासनाविधिसन्निहितत्वादपूर्वत्वात् ॥ २९८ ॥

इति स्तुतिमात्राधिकरणम् ॥ ३ ॥

त्तरम्—न विशेषितत्वादिति । न पारिप्लवार्थास्ताः । 'प्रथमेऽहनि मनुर्वैवस्वतो राजा…द्वितीयेऽहनि यमो वैवस्वतो राजा' इत्यादिना पारिप्लवार्थानामाख्यायिकानां विशेषितत्वात् ॥ औपनिषदाख्यायिकाः संनिहितविद्याविधिभिरेकवाक्यत्वात् विद्यार्था इत्याह—

सू ॥ तथाचैकवाक्यतोपबन्धात् ॥ २४ ॥

यथा 'सोऽरोदीत्' इत्याद्याख्यानानां कर्मविधिभिरेकवाक्यता, तथा विद्याविधिभिरेकवाक्यतोपसंबन्धाच्च विद्यास्तुत्यर्था एवेति ॥

इति पारिप्लवाधिकरणम् ॥ ४ ॥

यमिति भावः । विशेषितत्वादिति । युक्त 'मेष वाव प्रथम' इत्यादिवाक्यगतान्यशब्दस्य ज्योतिष्टोमेतरसर्वक्रतुपरत्वं । तस्य स्वतस्संकोचाकाङ्क्षाविरहात् । तदभिप्रायेणैव पूर्वतन्त्रे 'एकस्तोमे वा क्रतुसंयोगात्' 'सर्वेषां वा चोदनाविशेषात्प्रशंसास्तोमाना'मिति पूर्वोत्तरपक्षसूत्राभ्यां वाक्यशेषानुसारेण सङ्कोचो निरस्तः । इह त्वस्ति 'सर्वाण्याख्यानानी'त्यस्य 'अथैतस्यैव ही'ति योजनस्य 'सर्व एव लिप्सन्त' इत्यत्र सर्वशब्दस्येव सङ्कोचाकाङ्क्षा । अनन्तशाखागतसर्वाख्यानशंसनस्याशक्यत्वात् । सत्यां च तदाकाङ्क्षायां वाक्यशेषश्रुतेष्वेवाख्यानविशेषेषु सङ्कोचो युक्त इति भावः ॥ एवं 'सर्वाण्याख्यानानी'त्यस्य सङ्कोचे सत्यौपनिषदानामाख्यानानां विद्याविधिसमभिव्याहारात् स्तुत्यर्थतया तदन्वय एव स्यादित्युत्तरसूत्राभिप्रायं दर्शयन्नवतारयति—औपनिषदेति ॥ सू० ॥ तथा चैकवाक्यतोपबन्धात् ॥ २४ ॥ एकवाक्यतयान्वयः एकवाक्यतोपबन्धः । यथा सोऽरोदीदिति । तत्रापि समानोऽयं सिद्धान्तन्याय इति भावः । न चाख्यायिकानां स्तुतिमात्रप्रयोजनत्वेन व्यर्थप्रायता । विद्याप्रतिपत्तिसौकर्यस्यापि तत्प्रयोजनत्वात् । आख्यायिकाश्रवणे ह्यवहिता अव्यवधानं लभन्ते । यथा—उपायेन तु यच्छक्यं न तच्छक्यं पराक्रमै'रिति नीतिशास्त्रार्थोपदेशे 'काकः कनकसूत्रेण कृष्णसर्पममारय'दित्याख्यायिकया आर्थवादिकलिङ्गदर्शनैश्च बहवो विध्यर्थाः पूर्वतन्त्रे निर्णीयन्ते । इहापि 'सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शना' (ब्र० ३–४–२८) दित्यादौ आर्थवादिकानि च फलादीनि विध्यपेक्षितानि शास्त्रद्वयेऽपि गृह्यन्ते । तत्सर्वमर्थवादानां प्रयोजनमिति साक्षात्प्रवृत्तिविशेषकरत्वाभावेऽपि नात्यन्तवैयर्थ्यमिति समभिव्याहृतविध्येकवाक्यत्वमाख्यानानां युक्तमिति भावः ॥

इति पारिप्लवाधिकरणम् ॥ ४ ॥

नयमणिमालायाम्

अथ पारिप्लवाधिकरणम् ॥ ४ ॥

सू० ॥ पारिप्लवार्था इति चेन्न विशेषितत्वात् ॥ २३ ॥ तथा चैकवाक्यतोपबन्धात् ॥ २४ ॥

उपनिषदाम्नातान्यपि सर्वोपाख्यानशंसनख्यानात् । आख्यानानि भजेयुः पारिप्लवकर्मशेषत्वम् ॥ २९९ ॥

विद्याविध्युपयुक्तान्येतानि तदेकवाक्यतादृष्टेः । सर्वाख्यानविधिस्स तु मन्वाद्याख्यानमात्रपरः ॥ ३०० ॥

इति पारिप्लवाधिकरणम् ॥ ४ ॥

अथ अग्नीन्धनाधिकरणम् ॥ ५ ॥

सू ॥ अत एव चाग्नीन्धनाद्यनपेक्षा ॥ २५ ॥

पूर्वत्रोपपादितोऽन्त्याश्रमसद्भावः । तस्य विद्यार्थमाधानाद्यपेक्षाऽस्ति न वेति संशयः ॥ किं तावत् प्राप्तम्? विद्याङ्गत्वेन कर्मणो विधानात् विद्यावतामूर्ध्वरेतसां विद्याङ्गत्वेनाधानाद्यनुष्ठेयम् । इति प्राप्ते ब्रूमः । न तेषामाधानाद्यपेक्षा विद्या। 'एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति' इत्यादिश्रुतेस्तेषां कर्मत्यागेनैव

अथ अग्नीन्धनाधिकरणम् ॥ ५ ॥

सू० ॥ अत एव चाग्नीन्धनाद्यनपेक्षा ॥ २५ ॥ स्तुतिविधिप्रसङ्गागतमधिकरणद्वयमपहाय 'परामर्शं जैमिनि'रित्यधिकरणेन (ब्र० ३-४-१८ सू०) सङ्गतिं दर्शयति— पूर्वत्रेति । यज्ञादिश्रुतेः कर्मत्यागश्रुतेश्च संशयः । आधानाद्यपेक्षाया'मूर्ध्वरेतस्सु चे'ति पुरुषार्थाधिकरणगुण (ब्र० ३-४-१७) सूत्रोक्तार्थाक्षेपात्तेनापि मूलभूताधिकरणेनास्य सङ्गतिरनुसन्धेया । ऊर्ध्वरेतसामपीति । यद्यपि सन्न्यासिनो विधिबलात् त्यक्तपूर्वदाराग्निहोत्रादयः । तथापि निरङ्गेन विद्यामात्रेण फलानिष्पत्तेरङ्गभूतयज्ञाद्यनुष्ठानस्यावश्यकत्वात् । तदर्थं दारान्तरं परिगृह्याग्न्याधानं कार्यम् । न च दारपरिग्रहे सत्यूर्ध्वरेतस्त्वविरोधापत्तिः । विद्याङ्गकर्मार्थं दारपरिग्रहेऽपि भीष्मवदूर्ध्वरेतस्त्वोपपत्तेरिति चशब्देन द्योत्यते। सोऽय'मुपायनादधीत होमसंयोगा'दिति पूर्वतन्त्राधिकरणपूर्वपक्षरीत्या पूर्वपक्षः। तत्र ह्युपनयनाङ्गहोमः आहवनीये कर्तव्यः । 'यदाहवनिये जुह्वती'त्यविशेषश्रवणात् । आहवनीयसिद्ध्यर्थं चाग्नय आधातव्याः । अग्न्याधानसिद्ध्यर्थं दारसङ्ग्रहश्च कार्यः। अस्मिन् दारसङ्ग्रहे कर्मार्थे सत्यप्युपनयनपूर्वकविद्याग्रहणोत्तरकालविहितो दारसङ्ग्रहः प्रजार्थो भविष्यतीति पूर्वपक्षः कृतः । नचाश्रमधर्मैरेव विद्यायास्साङ्गत्वसिद्धेर्यज्ञाद्यनुष्ठानार्थमाधानदारसङ्ग्रहयोराक्षेपो न प्राप्नोतीति वाच्यम् । 'यज्ञेने'त्यादितृतीयाश्रुत्या विशिष्य यज्ञादीनामपि विद्याङ्गत्वविधानात् । कर्मत्यागश्रुतिस्तु विद्यानङ्गकर्मविषया स्यादिति भावः । कर्मत्यागेनैवेति । तथा च विशेषविध्यनुसारेण यज्ञादिश्रुतिर्गृहस्थविषया भविष्यति । न च यज्ञादिश्रुत्यनुसारेण कर्मत्यागश्रुतिरेव यज्ञाङ्गकर्मातिरिक्तकर्मविषयास्त्विति वाच्यम्। गृहस्थैरपि संसाराद्विरज्य मुक्त्यर्थां विद्यामनुतिष्ठद्भिरैहिकामुष्मिकफलसाधनानां काम्यकर्मणां त्यक्तत्वेन विशिष्य सन्न्यासिनां कर्मत्यागविधेर्विद्याङ्गयज्ञादिपर्यन्तत्वस्यावश्यवक्तव्यत्वात् । 'सर्वार्थत्वाच्च पुत्रार्थे न प्रयोजये'दिति पूर्वोदाहृतपूर्वतन्त्राधिकरणसिद्धान्तसूत्रोक्तन्यायेन 'धर्मे चार्थे च कामे च नातिचरितव्ये'ति स्मृतेः केवलं पुत्रार्थमिव केवलं धर्मार्थमपि दारसङ्ग्रहाद्योगाच्च । भीष्मस्य तु धर्मप्रजोभयार्थे दारसङ्ग्रहे निवृत्त एव पितृप्रीत्यर्थमूर्ध्वरेतस्त्वप्रतिज्ञया पुत्रोत्पादनान्निवृत्तौ सत्यां दाराणां धर्मार्थ-

विद्यावत्त्वावगमात्। किंतु स्वाश्रमधर्मापेक्षा सा। तेषामाधानाद्यनुपपत्तेरिति ॥

इति अग्नीन्धनाधिकरणम् ॥ ५ ॥

अथ सर्वापेक्षाधिकरणम् ॥ ६ ॥

सू ॥ सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ॥ २६ ॥

पूर्वाधिकरणे निरूपितमन्याश्रमिणामनुपपत्तेराधानाद्यनपेक्षा विद्येति। तदिह गृहिणां विद्या तदपेक्षा न वेति संशयः ॥ एवं सति गृहस्थानामपि विद्याऽग्नीन्धनादिकर्मानपेक्षिणीति ब्रूमः। तस्य व्यभिचारेण विद्याङ्गत्वानुपपत्तेः। यत्तु विमता विद्या स्वाङ्गभूतकर्मापेक्षा अङ्गित्वात् प्रयाजाद्यपेक्षदर्शपूर्णमासवत्, इत्यनुमानम्। तत्राधानादेः कीदृशमङ्गत्वं साध्यम्? प्रयाजादिवत् फलोपकारित्वं वा, अवघातादिवत् स्वरूपोपकारित्वं वा। नाद्यः। तज्जन्यत्वे मुक्तेरनित्यत्वं स्यात्। द्वितीये साध्यविकलो दृष्टान्तः। अतो न विद्याङ्गत्वं कर्मणः। तस्मात् गृहिणा-

---

त्वमात्रमवशिष्टमिति, तेन यज्ञाद्यनुष्ठानं। न तूर्ध्वरेतस्त्वप्रतिज्ञानन्तरं केवलं धर्मार्थदारसङ्ग्रहेण श्रुतिस्मृतिसिद्धानिकेतत्वादिसन्न्यासिधर्मपर्यालोचनयापि न सन्न्यासिनो दारसङ्ग्रहादिकमुपपद्यत इति भावः। सन्न्यासिनः स्वाश्रमधर्मास्त्रिषवणस्नानसमधिकशौचाष्टग्रासादयः ॥

इति अग्नीन्धनाधिकरणम् ॥ ५ ॥

अथ सर्वापेक्षाधिकरणम् ॥ ६ ॥

सू० ॥ सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ॥ २६ ॥ सन्न्यासिनामिव गृहस्थानामपि विद्या कर्मानपेक्षेति पूर्वपक्षोत्थानात्सङ्गतिः। यज्ञाद्यभावेऽपि विद्यादर्शनात् यज्ञादिश्रुतेश्च संशयः। व्यभिचारेणेति। न च षोडशिग्रहरहितक्रत्वपूर्वात्तत्सहितक्रत्वपूर्वस्यैव कर्मरहितविद्यातः कर्मवद्विद्याया उत्कर्षः कल्पनीयः मुक्तेरेकरूपत्वेन। तथेह फलोत्कर्षप्रयोजकस्य साधनोत्कर्षस्य समर्थयितुमशक्यत्वात् तदप्रयोजकस्य विद्योत्कर्षस्य संभवतोऽप्यनुद्देश्यत्वात् मुक्तिफलजननक्षमस्य विद्यामात्रस्य सन्न्यासिनामिव कर्मभिर्विनापि संभवे कर्मानुष्ठानक्लेशायोगादिति भावः। उक्तभङ्ग्या दूषितमप्यनुमानं प्रातिस्विकदोषेण दूषयितुमुद्भावयति—यत्त्विति। साध्यविकल इति। 'नन्ववघाताद्यपेक्षदर्शपूर्णमासव'दिति दृष्टान्तोपादाने साध्यवैकल्यं न भविष्यति। सत्यम्। तथाप्यासनबन्धप्राणायामादिभिश्चित्तैकाग्र्यसंपादनद्वारा विद्यास्वरूपनिर्वर्तकैरर्थान्तरं स्यात्। तस्माद्यज्ञादीनां

नयमणिमालायाम्

अथ अग्नीन्धनाधिकरणम् ॥ ५ ॥

सू० अतएवचाग्नीन्धनाद्यनपेक्षा ॥ २५ ॥

अन्याश्रमिणापि सता विद्यार्थत्वेन कार्यमाधानम्। यज्ञादिकर्मणां यद्विद्याङ्गत्वं समाम्नातम् ॥ ३०१ ॥

नोकार्यमेतमेव प्रव्राजिन इति विधानबलात्। विद्यार्थमेव कर्म त्यक्तवतस्सा हि न तदपेक्षेत ॥ ३०२ ॥

इति अग्नीन्धनाधिकरणम् ॥ ५ ॥

अपि विद्या कर्मानपेक्षेति पूर्वः पक्षः ॥ सिद्धान्तस्तु—कर्मवत्सु गृहस्थेषु विद्याऽग्निहोत्रादिसर्वकर्मापेक्षा । 'यज्ञेन दानेन' इति श्रुतेः, यज्ञादीनां पारमेश्वरनियोगसिद्धत्वाच्च । यथाऽश्वो गमनसाधनभूतोऽपि स्वपरिकरबन्धापेक्षो गमने, तथा विद्याऽपीति । कर्मणः फलाभिसन्धिरहितत्वेन विद्यास्वरूपोपकार्यङ्गत्वान्न तज्जन्यत्वं मोक्षफलस्य । किंतु साक्षात् ज्ञानफलमेव मोक्षः । अतो गृहस्थानां यज्ञादिसापेक्षा विद्या । सर्वेषामाश्रमिणां स्वाश्रमविहितकर्मापेक्षेति युक्तं विद्यायाः कर्मापेक्षत्वम् ॥

इति सर्वापेक्षाधिकरणम् ॥

विद्याङ्गत्वायोगा'द्यज्ञेने'त्यादिश्रुतिर्विद्यास्तुत्यर्था । वर्तमानापदेशत्वात् । दृश्यते ह्यतदर्थस्यापि तादर्थ्यवर्णनं स्तुत्यर्थं । 'यज्ञार्थं पशवस्सृष्टा'इत्यादौ । अतस्सन्न्यासिभिरिव गृहस्थैरपि विद्यार्थं कर्म नानुष्ठेयमिति भावः । पारमेश्वरनियोगसिद्धत्वाच्चेति । तथा च परमेश्वरः स्वनियोगानुवर्तनेन प्रसन्नस्सन्नाप्रायणमहरहरविच्छेदेनानुष्ठेयां विद्यां चित्तैकाग्र्यादिप्रदानद्वारा निर्वर्तयेदिति विद्यास्वरूपोपकारकाणि यज्ञादीनीत्येवं यज्ञादिश्रुतेरर्थवत्त्वसंभवे नानर्थकमर्थवादत्वमाश्रयणीयमिति भावः । यज्ञादीनां विद्याव्यभिचारं परिहरति —सर्वेषामाश्रमिणामिति । यस्मिन्नाश्रमे स्थित्वा यो विद्यामनुतिष्ठति तस्य तदाश्रमधर्मैर्विद्यास्वरूपोपकार इति नियमे नास्ति व्यभिचारः । 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेने'त्यादिश्रुतेरप्यत्रैव तात्पर्यम् । तत्र 'वेदानुवचनेने'ति ब्रह्मचारिधर्मजातं लक्ष्यते । अध्ययनार्थमुपक्रान्तमेव हि गुरुकुलवासमाप्रायणमनुवर्तयेन्नैष्ठिकब्रह्मचारी । 'यज्ञेन दानेने'त्यनेन यज्ञदानप्रधानं गृहस्थधर्मजातं लक्ष्यते । 'तपसे'त्यनेन कृच्छ्रचान्द्रायणपञ्चाग्निमध्यतपश्चर्यादिप्रधानं वैखानसधर्मजातम् । 'अनाशकेने'त्यनेन अनशनप्रायाष्टग्रासनियमप्रधानं यतिधर्मजातं लक्ष्यते । एवमाश्रमधर्मभेदेऽपि तदुपकार्यविद्याभेदो न प्रसज्यते । 'यस्य यावत्स्वगृह्योक्तं बहु वा स्वल्पमेव वा । तस्य तावति शास्त्रार्थे कृते सर्वं कृतं भवे'दिति स्मृत्युक्तरीत्या वर्णाश्रमकुलविशेषादिप्रयुक्तपारमेश्वरनियोगानुवर्तनस्यैकरूपफलत्वोपपत्तेरिति भावः ॥

इति सर्वापेक्षाधिकरणम् ॥ ६ ॥

नयमणिमालायाम्

अथ सर्वापेक्षाधिकरणम् ॥ ६ ॥

सू० ॥ सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ॥ २६ ॥

तद्वैव सेति विद्या गृहिणामपि न तदपेक्षेत । एकस्यास्तदपेक्षानपेक्षताया विरुद्धत्वात् ॥ ३०३ ॥

यज्ञेनेति श्रवणात्तस्याः कर्म ह्यपेक्षास्ति । आश्रमभिदया सा स्याद्गमनस्याश्व इव पुंभिदया ॥ ३०४ ॥

इति सर्वापेक्षाधिकरणम् ॥ ६ ॥

अथ शमदमाद्यधिकरणम् ॥ ७ ॥

सू ॥ शमदमाद्युपेतः स्यात्तथाऽपि तु तद्विधेस्तदङ्गतया तेषामप्यवश्यानुष्ठेयत्वात् ॥ २७ ॥

'शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवात्मानं पश्येत्' 'श्रद्धाभक्तिध्यानयोगादवेहि' इत्यादिना विद्यायाः शमादिसंपत्त्यपेक्षा श्रूयते । सा शमादिसंपत्तिर्गृहिणां संभवति न वेति संशयः ॥ यज्ञादिमत्तया बहुव्यापारव्याकुलानां तेषां तदुपरतिरूपा शमदमादिसंपत्तिर्न संभवति इति प्राप्ते उच्यते—गृहस्थो विहितकर्मव्यापृतोऽपि निषिद्धकाम्यादिकर्मसु व्यापाररहितः शमाद्युपेतः स्यात् 'शान्तो दान्तः' इत्यादिना 'श्रद्धाभक्तिध्यानयोगादवेहि'-इत्यादिना च शमादेर्विहितत्वात्, विद्यानिष्पत्तये तदङ्गत्वेन तेषामवश्यानुष्ठेयत्वात् । आन्तराणां रागद्वेषादीनामनाविर्भूतिः शमः । सर्वेषामिन्द्रियाणामविहितव्यापारेभ्यो निवर्तनं दमः । निषिद्धकाम्यकर्मव्यापारोपरम उपरतिः । द्वन्द्वसहिष्णुत्वं तितिक्षा । विसृष्टतन्द्रादिव्याक्षेपस्य चित्तस्य परतत्त्वाभिमुख्यं समाधानम् । अपुरुषार्थसकलेतरशास्त्रपराङ्मुखी परविद्यामयपरमात्मतन्त्रोपनिषद्गोष्ठीसमुत्कण्ठारूपा सत्त्वकला श्रद्धा । विनिर्मुक्तसकलेतरदेवताराधना त्रिविधकरणसंपाद्या विशिष्टाष्टाङ्गयोगिनी परमशिवपरिचर्यामयी वैदिकी क्रिया भक्तिः । परमानन्दावेशमयमहामोक्षलक्ष्मीदर्शनत्वरा मुमुक्षा । ऐहिकामुष्मिकसकलभोगपराङ्मुखत्वरूपेण वैराग्येण नित्यानित्यवस्तुनिर्धारणाकारेण विवेकेन

अथ शमदमाद्यधिकरणम् ॥ ७ ॥

सू० ॥ शमदमाद्युपेतः स्यात्तथाऽपि तु तद्विधेस्तदङ्गतया तेषामप्यवश्यानुष्ठेयत्वात् ॥ २७ ॥ पूर्वाधिकरणे विद्याङ्गत्वेन गृहस्थानुष्ठेयतया व्यवस्थापितैर्यज्ञादिभिः शमादीनां विरोधाविरोधाभ्यां संशयः । शमादीनां सर्वव्यापारोपरतिरूपतया यज्ञादिभिर्विरोधोऽस्तीति पूर्वः पक्षः । तेषां तत्तदाश्रमविहितदेहयात्रोपयुक्तेतरोपरतिरूपतया नास्ति विरोध इति सिद्धान्तः । विद्याविरोधिनामन्तरिन्द्रियव्यापाराणामुपरमः शमः । ज्ञानेन्द्रियव्यापाराणामुपरमो दमः । कर्मेन्द्रियव्यापाराणामुपरम उपरतिः । परमात्मतन्त्रं परमाप्तेन शिवेन प्रणीतं सर्वज्ञानोत्तरादिशिवशास्त्रम् । तत्र विशिष्टानि भक्तेरष्टाङ्गानि—'मद्भक्तजनवात्सल्यं पूजायाञ्चानुमोदनम् । स्वयमभ्यर्चनं चैव मदर्थे चाङ्गचेष्टनम् ॥ मत्कथाश्रवणे प्रीतिः स्वरनेत्राङ्गविक्रिया । मन्नामकीर्तनं नित्यं मयि कैतववर्जन'मिति शिवेनैव निरूपितानि । वैदिकी क्रियेति । न तु तन्त्रोक्तप्रकारेति भावः । 'मुमुक्षुर्वै शरणमहं प्रपद्ये' इत्यादि श्रुत्युक्ताधिकारिविशेषणरूपां मुमुक्षामुपायमुखेन संभावयति—ऐहिकेति । नित्यानित्यवस्तुनिर्धारणादनित्येषु विषयेषु वैराग्यं ततः शमादिसम्पत्त्या मुमुक्षेति क्रमः ॥ ननु 'यज्ञेने'त्यादिश्रुतिविहितविद्यासाधनकर्मानुष्ठानं विद्यानुष्ठानारंभात्प्रागिति 'विहितत्वाच्चाश्रमकर्मापी' त्यधिकरणे भाष्यकारो वक्ष्यति । शमादिकं तु चित्तैकाग्र्यद्वारा विद्यास्वरूपोपकारकं विद्यानुष्ठानारंभप्रभृत्यनुष्ठेयम् । अतो यज्ञादेः

च विशिष्टस्य शमादिसंपत्तिक्रमेण संभवति मुमुक्षा । एते विवेकादयो मुमुक्षापर्यन्ताः परमधर्माः सर्वेषामाश्रमिणां विद्यार्थमविशेषेणानुष्ठेया इति ॥

इति शमदमाद्यधिकरणम् ॥ ७ ॥

अथ सर्वान्नानुमत्यधिकरणम् ॥ ८ ॥

सू ॥ सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ॥ २८ ॥

प्राणविद्यायां पठ्यते 'न ह वा एवंविदि किंचनानन्नं भवति' इति । इह प्राणविद्यानिष्ठस्य सर्वान्नानुमतिः प्रतीयते । तदेषा युक्ता न वेति संशयः ॥ किं तावत् प्राप्तम्? मानान्तरप्राप्तस्य भोजनस्याविधेयत्वादिह सर्वान्नानुमतिरप्राप्ता विधीयते । इति प्राप्ते समाधीयते । प्राणविद्यानिष्ठस्यापि सर्वान्नानुमतिर्न स-

---

शमादेश्च विरोधशङ्कैव नास्तीति नेदमधिकरणमारंभणीयमिति चेन्मैवम् । विद्यासाधनं कर्मसञ्जातमुमुक्षेणा हि विद्योपायसम्पत्तिद्वारा विद्यालाभार्थमनुष्ठेयं । तदानीमपि निषिद्धकाम्यरुचिवासनानां समूलोन्मूलनार्थं शमादिकमनुष्ठेयमिति विरोधशङ्कावतरणात् विद्यारंभप्रभृत्यपि 'विद्याञ्चाविद्याञ्चे'ति श्रुतिविहितविद्यासहकारिकर्मानुष्ठानस्य वक्ष्यमाणतया तेन सह शमादेर्विरोधशङ्कावतरणाच्च ॥

इति शमदमाद्यधिकरणम् ॥ ७ ॥

अथ सर्वान्नानुमत्यधिकरणम् ॥ ८ ॥

सू० ॥ सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ॥ २८ ॥ यज्ञादीनां शमादीनाञ्च ब्रह्मविद्याशेषत्वमुक्तम् । तत्प्रसङ्गात्सर्वान्नानुमतेः प्राणविद्याशेषत्वमस्ति न वेति विचार्यते । 'न हवा' इत्यादिविधिस्तुत्यर्थत्वानवधारणात्संशयः । तत्र पूर्वः पक्षः । अदनस्य रागप्राप्तत्वेऽपि तदाश्रिता सर्वान्नानुमतिरप्राप्ताप्राणविद्याङ्गत्वेन विधीयते। अभक्ष्यभक्षणनिषेधस्तु पुरुषार्थत्वान्न तां क्रत्वर्थामास्कन्दति । उषस्तिचरितदर्शनमपि न तस्या बाधकम् । उषस्तेर्ब्रह्मविदः प्राणविद्यानिष्ठत्वाभावात् । ब्रह्मविदश्च 'नाविरतो दुश्चरिता'दिति श्रुत्या सकलनिषिद्धव्यावृत्तेरुक्तत्वादिति । सिद्धान्तस्तु, प्राणविद्यानिष्ठस्यापि सर्वान्नानुमतिरितरसाधारण्येन प्राणात्यय एव । 'न हवा एवंवि'दित्यादिकं, तु 'यत्किञ्चिदिदमा श्वभ्य आशकुनिभ्य' इति विहितस्याश्वादिकं सर्वमिदं प्राणस्यान्नमित्यनुचिन्तनस्य फलार्थवादमात्रम् ॥ न चापूर्वत्वात्प्रवृत्तिविशेषकरत्वाच्च तत्र विधिरिति युक्तम् । विधिविभक्तेरश्रवणात् तत्कल्पने च प्रत्यक्षस्य सामान्यनिषेधशास्त्रस्यपरिपन्थित्वादिति अव-

---

नयमणिमालायाम्

अथ शमदमाद्यधिकरणम् ॥ ७ ॥

सू० ॥ शमदमाद्युपेतः स्यात्तथापि तु तद्विधेस्तदङ्गतया तेषामप्यवश्यानुष्ठेयत्वात् ॥ २७ ॥

एवं तर्हि शमादेर्विधानमत्याश्रमिष्वेव । स्याद्विद्यार्थे गृहिणां यज्ञादिव्यापृतेस्यस्त्वात् ॥ ३०५ ॥

तेषामपि स विधातुर्निषिद्धकार्यादिविषयेषु । शक्यस्ततश्चसकलो विद्यार्थीशमदमाद्युपेतः स्यात् ॥ ३०६ ॥

इति शमदमाद्यधिकरणम् ॥ ७ ॥

वेद्या, किंतु प्राणात्यय एव। अधिकशक्तेरुषस्तेर्ब्रह्मविदोऽपि हि प्राणात्यय एवोच्छिष्टभक्षणादौ श्रुतिर्दृश्यते—"मटचीहतेषु कुरुष्वाटक्या सह जायया उषस्तिर्ह चाक्रायण इभ्यग्रामे प्रद्राणक उवास। स हेभ्यं कुल्माषान् खादन्तं बिभिक्षे। स होवाच, नेतोऽन्ये विद्यन्ते यच्च ये म इमा उपनिहिता इति। एतेषां मे देहीति होवाच। तानस्मै प्रददौ। हन्तानुपानमिति। उच्छिष्टं मे पीतं स्यादिति होवाच। न स्विदेतेऽप्युच्छिष्टा इति? न वा अजीविष्यमिमानखादन्निति होवाच कामो म उदपानम्॥" इत्यादिरूपा। अतः प्राणात्यय एव सर्वान्नानुमतिः परविद्यावतोऽपीति॥

सू॥ अबाधाच्च ॥ २९॥

"आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः। स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः॥" इत्याहारशुद्धेरबाधाच्च प्राणसंशय एव सर्वान्नानुमतिः॥

सू॥ अपि च स्मर्यते ॥ ३०॥

प्राणसंशय एव सर्वान्नानुमतिः स्मर्यतेऽपि—"प्राणसंशयमापन्नो योऽन्नमत्ति यतस्ततः। लिप्यते न स पापेन पद्मपत्रमिवाम्भसा॥"

धारणार्थेन सौत्रचकारेण सूचितोऽयं विधिकल्पनाबाधको हेतुः। 'प्राणविदोऽपि सर्वान्नानुमतिरितरवत्प्राणात्यय' एवेति प्रतिज्ञायां ब्रह्मविदोऽप्येवं किमुत प्राणविद इति कैमुतिकन्यायहेत्वन्तरप्रदर्शनार्थं 'तद्दर्शना'दिति सूत्रशेषं व्याचष्टे—अधिकशक्तेरित्यादिना। मटच्यः शकुनिविशेषाः। ताभिर्हतेषु कुरुषु कुरुदेशसस्येषु आटक्या अनुपजातस्तनादिव्यञ्जनया जायया सह उषस्तिर्ह उषस्तिरिति नाम्ना प्रसिद्धः च चाक्रायणः चक्रस्यापत्यम्। इभ्यग्रामे इभमर्हतः हस्त्यारोहस्य ग्रामे प्रद्राणकः अन्नालाभात्कुत्सितां गतिं गतः अत्यन्तकष्टावस्थां प्राप्तस्सन्नुवास मार्गवशात्कस्मिंश्चिद्दिवसे उषितवान्। स ह स किल कुल्माषान् कुत्सितान् माषान् जलपक्वकुलुत्थादिकान् वा खादन्तं इभ्यं बिभिक्षे। स ह इभ्यः किल उवाच। इतोऽस्मान्मया भक्ष्यमाणादुच्छिष्टकुल्माषराशेरन्ये कुल्माषा न विद्यन्ते यच्च ये यस्मिन् राशौ मे मदर्थमुपनिहिताः भक्षणार्थं प्रक्षिप्ता इमे कुल्माषा इतोऽन्ये न विद्यन्त इति पूर्वेण सम्बन्धः। इत्युक्त उषस्तिरुवाच। एतेषां मे देहि एतान्मह्यं देहीति। तानस्मा ऋषये प्रददौ। पानाय समीपस्थमुदकं गृहीत्वोवाच। हन्तेति हर्षे। अनुपानं इदमनुपानमपि गृहाण इत्युक्त ऋषिः प्रत्युवाच उच्छिष्टं वै मे मया पीतं स्यात् यदीदमुदकं पिबेयमित्युक्त इभ्यः प्रत्युवाच न स्विदेतेऽप्युच्छिष्टाः किमेते कुल्माषा अपि नोच्छिष्टा इति। एवमुक्त उषस्तिरुवाच। नवा अजीविष्यं नैव जीविष्यामीमानखादन् कामो म उदपानम् इच्छातो ममोदकपानं लभ्यत इति। एवं ब्रह्मविद्येऽप्यत्यन्तकष्टावस्थायामप्यनन्यलभ्यस्य कुल्माषमात्रस्योच्छिष्टस्य ग्रहणम् अन्यलभ्यस्योदकस्य परिहरणं च दृष्टमित्यन्येषां च सर्वान्नानुमतिरत्यन्तकष्टावस्थायामेवेति कैमुतिकन्यायसिद्धमित्युपसंहरति—अत इति॥ ब्रह्मविदनुष्ठानेनैव ब्रह्मविद्विषयवचनेनापि कैमुतिकन्यायः सिद्ध्यतीत्याह—सू०॥ अबाधाच्च॥२९॥ सत्त्वशुद्धिरन्तःकरणशुद्धिः। ध्रुवास्मृतिः निरन्तरस्मृतिसन्तानरूपध्यानलाभः॥ सू०॥ अपि च स्मर्यते॥ ३०॥ सर्वसाधारण-

सू ॥ शब्दश्चातोऽकामकारे ॥ ३१ ॥

तस्मात् 'ब्राह्मणः सुरां न पिबेत्' इति कामकारनिवृत्तौ शब्दश्च भवति। अतश्च प्राणसंशय एव विदुषोऽपि सर्वान्नानुमतिः। अन्यथा निषिद्धाचरणेन परमेश्वरस्याद्रोही स्यादिति भावः ॥

इति सर्वान्नानुमत्यधिकरणम् ॥ ८ ॥

अथ आश्रमकर्माधिकरणम् ॥ ९ ॥

सू ॥ विहितत्वाच्चाश्रमकर्मापि ॥ ३२ ॥

विद्याहीनस्य गृहस्थस्याश्रमकर्म यज्ञादिकं 'यावज्जीवमग्निहोत्रं जुहोति' इति विहिततया च 'यज्ञेन दानेन' इति श्रुतेर्विद्यासाधनतया चानुष्ठेयमवगम्यते ॥

सू ॥ सहकारित्वेन च ॥ ३३ ॥

विद्यावतोऽपि 'विद्यां चाविद्यां च' इति श्रुतेर्विद्याङ्गतया विहिततया चानुष्ठेयमवगम्यते। तदिह विद्याहीनेन विद्यावता च यज्ञादिकं विद्यायास्साधनत्वेन

स्मृतिबलादप्येवमिति भावः ॥ सू० ॥ शब्दश्चातोऽकामकारे ॥ ३१ ॥ सर्वान्नानुमतिबाधनक्षमप्रत्यक्षश्रुतिप्रदर्शनार्थमिदं सूत्रम्। तस्मा 'द्ब्राह्मणः सुरां न पिबे'दिति शब्दः कठशाखायां श्रूयते। कामकारनिवृत्ताविति प्रयोजनस्य निमित्तत्वविवक्षया सप्तमी। अतश्चेति। सौत्रश्चकारो भिन्नक्रमतया योजितः ॥

इति सर्वान्नानुमत्यधिकरणम् ॥ ८ ॥

अथ आश्रमकर्माधिकरणम् ॥ ९ ॥

सू० ॥ विहितत्वाच्चाश्रमकर्मापि ॥ ३२ ॥ विद्यानुष्ठानारंभात्प्राक्तदारंभप्रभृति च यज्ञादीनां द्विरनुष्ठानं सकृद्वेति विचारं प्रवर्तयिष्यन् विचारप्रसञ्जकं 'विहितत्वा'दित्यादिसूत्रद्वयेन दर्शयति। यज्ञादिकर्माश्रमकर्मापि भवति। अपिशब्दाद्विद्यासाधनं च। 'यावज्जीवमग्निहोत्रं जुहोती'त्यादि श्रुत्याश्रमधर्मत्वेन विहितत्वात् चकारा 'द्यज्ञेन दानेने'त्यादिश्रुत्या विद्यासाधनत्वेन बोधितत्वाच्चेत्यस्य सूत्रस्यार्थः ॥ सू० ॥ सहकारित्वेन च ॥ ३३ ॥ 'विहितत्वाच्चे'त्यनुवर्तते। विद्यारंभप्रभृति यज्ञादिकं विद्यासहकारित्वेनानुष्ठेयम् चकारादाश्रमधर्मत्वेनाप्यनुष्ठेयम्। 'विद्याञ्चाविद्याञ्चे'ति श्रुत्या विद्यासहकारित्वेन बोधितत्वात् यावज्जीवादिश्रुत्याश्रमधर्मत्वेन विहितत्वाच्चेत्यर्थः। एवं मुमुक्षोर्विद्यारंभात्प्राक् विद्यारंभप्रभृति च यज्ञादिष्वधिकारद्वित्वे सिद्धे संशयं प्रवर्तयति—तदिहेति।

नयमणिमालायाम्

अथ सर्वान्नानुमत्यधिकरणम् ॥ ८ ॥

सू० ॥ सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ॥ २८ ॥ अबाधाच्च ॥ २९ ॥ अपि च स्मर्यते ॥ ३० ॥ शब्दश्चातोऽकामकारे ॥ ३१ ॥

प्राणविदस्सर्वान्नानुमतौ विधिरस्त्वपूर्वत्वात्। सामान्यनिषेधः खलु संकुचितः स्याद्विशेषविधेः ॥ ३०७ ॥

क्लृप्तस्सामान्यविधिर्विरुद्धविधिकल्पनां विशेषेऽपि। बाधेत ततस्सा स्यात् प्राणात्ययगोचरा यथोक्तेः ॥ ३०८ ॥

इति सर्वान्नानुमत्यधिकरणम् ॥ ८ ॥

अङ्गत्वेन विहितत्वेन च द्विरनुष्ठेयं सकृदनुष्ठेयं वेति संशये सत्युभयविधिबलात् द्विरनुष्ठेयमिति प्राप्ते सिद्धान्त उच्यते—

सू ॥ सर्वथापि त एवोभयलिङ्गात् ॥ ३४ ॥

उभयत्र विनियोगेनोभयाकारत्वेऽपि त एव यज्ञादयः, सर्वत्र प्रत्यभिज्ञानात्।

किं विद्याहीनेन विद्यायास्साधनत्वेन विहितत्वेन च द्विरनुष्ठेयम् । विद्यावता च विद्याङ्गत्वेन विहितत्वेन च द्विरनुष्ठेयम् उत विद्याहीनेन विद्यावता च सकृत्सकृदनुष्ठेयमिति संशयप्रकारः । यद्याश्रमधर्मरूपाद्यज्ञादेर्विद्यासाधनं यज्ञादिकं नित्याग्निहोत्रात्कौण्डपायिनामयनाग्निहोत्रमिव भिद्येत तदानीमाश्रमधर्मरूपान्मुख्याद्यज्ञादेर्विद्यासाधनं गौणं यज्ञादिकं पृथगनुष्ठेयमिति मुख्यगौणात्मकस्य यज्ञादेर्द्विरनुष्ठेयत्वं सिध्यति । यदि 'यावज्जीवमग्निहोत्रं जुहोती'ति श्रुतान्नित्याग्निहोत्रात् 'अग्निहोत्रं जुहुयात्स्वर्गकाम' इति श्रुतं काम्याग्निहोत्रमिव न भिद्येत तदा काम्यप्रयोगान्नित्यानुष्ठानसिद्धिरिति प्रसङ्गन्यायेन यज्ञादिकं सकृदेवानुष्ठेयं सिध्यति । अतोऽत्र किं नित्याग्निहोत्रमासाग्निहोत्रन्यायेन भेदः उत नित्याग्निहोत्रकाम्याग्निहोत्रन्यायेनाभेदः इति कर्मभेदाभ्यामयं संशयः । तत्र पूर्वपक्षमाह **—उभयविधिबलादिति** । अयमाशयः—युक्तमेकस्यैवाग्निहोत्रस्य नित्यत्वेन काम्यत्वेन च प्रयोगभेदमात्रमिति यावज्जीवस्वर्गकामवाक्ययोरेकत्रैव प्रकरणे श्रवणात् । 'यज्ञेने'त्यादिवाक्यस्य 'विद्याश्चाविद्याश्चे'ति वाक्यस्य च प्रकरणान्तरे श्रवणात् मासाग्निहोत्रन्याय एव प्रवर्तते । न च तत्र 'जुहोती'ति होमे विधिः श्रूयते । अतो विहितस्य विधानायोगेन विहितात्प्रसिद्धाग्निहोत्रहोमादस्य होमस्यान्यत्वसिद्धौ तत्र वर्तमानं नाम तत्परतन्त्रं सत्प्रसिद्धाग्निहोत्रप्रत्यभिज्ञापकं न भवतीति तत्र प्रकरणभेदात्कर्मान्तरत्वमस्तु । इह तथा यज्ञादिषु विधिर्न श्रूयते । किन्तु विविदिषायामिति वाच्यम् । अत्रापीष्यमाणविद्योद्देशेन यज्ञादिकं विधेयमिति यज्ञादिनाम्नो विधेयपरत्वेनाग्निहोत्रनामतुल्यत्वात् । एतेन 'मासमग्निहोत्रं जुहोती'त्यनुपादेये काले विधिसंक्रमायोगेन होमस्यैव विधेयत्वं वाच्यमिति विहितस्य विधानायोगात्तत्र कर्मभेद इति निरस्तम् । कालवत्फलस्याप्यनुपादेयत्वेनात्रापि यज्ञादेरेव विधेयत्वस्य वाच्यत्वात्प्रसिद्धस्य यज्ञादेः प्राप्तत्वेन तस्याप्राप्तो विद्याफलसंबन्धो बोधयितुं शक्य इत्येतत्तु तत्रापि तुल्यम्, प्रसिद्धस्यैवाग्निहोत्रस्य मासगुणसम्बन्धो बोधयितुं शक्यत इति । तस्मादनुपादेयसम्बन्धे कर्मण एव विधेयत्वमिति मासाग्निहोत्रन्यायस्येहापि तुल्यत्वात्प्रकरणान्तरात्कर्मभेदः स्यादेवेति ॥ सू० ॥ **सर्वथापि त एवोभयलिङ्गात् ॥ ३४ ॥** उभयलिङ्गादित्यस्योभयत्र कर्मैक्ये प्रत्यभिज्ञानरूपाल्लिङ्गादित्यर्थमाह **—सर्वत्र प्रत्यभिज्ञानादिति** । अयमाशयः—'मासमग्निहोत्रं जुहोती'त्यत्र विधेयं कर्माग्निहोत्रादन्यदपि होमरूपतयावगम्यत इति युक्तम् । तत्राग्निहोत्रशब्दस्य साध्यसादृश्यावलम्बनया गौण्या वृत्त्या वर्तनम् । इह तु यज्ञादिशब्दोपात्तं कर्म यज्ञादेरन्यच्चेत्तत्किंरूपमित्यवगन्तुं न शक्यते । इष्टिपशुसोमादिरूपाणां यज्ञादीनां मध्ये केन यज्ञादिना सादृश्यमवलम्ब्य प्रवृत्तया गौण्या वृत्त्या यज्ञादिशब्दवृत्तिरित्यप्यवगन्तुं न शक्यते । यज्ञादिनाम्ना द्रव्यदेवताद्यतिदेशे सति देवतोद्देश्यकद्रव्यत्यागत्वादिरूपयज्ञादिशब्दप्रवृत्तिनिमित्तप्राप्तेरनिवार्यत्वेन यज्ञादिभिन्नत्वमपि विधेयस्य कर्मणस्समर्थयितुं न शक्यते । तस्मादिह यज्ञादिशब्दानां 'यज्ञोऽध्ययनं दानमिति प्रथमः, तप एव द्वितीयः ।' 'भोक्तारं यज्ञतपसां सर्वलोकमहेश्वर'मित्यादिश्रुतिस्मृतिष्विव प्रसिद्धयज्ञादिपरत्वमेव युक्तमिति ॥

एवं च कर्मस्वरूपैक्ये सति संयोगपृथक्त्वन्यायेन न विरोधः । सकृत्प्रयोगेऽपि वचनद्वयबलेन कर्मण एकस्याप्याकारद्वयोपपत्तेः । यथा 'खादिरो यूपो भवति— खादिरं वीर्यकामस्य यूपं कुर्वन्ति' इत्यत्र वचनद्वयबलेन नित्यत्वं काम्यत्वं चैकस्य खादिरत्वस्य, तद्वत् । ततो विदुषोऽप्यविदुषोऽपि विद्याङ्गतया विद्याहेतुतया विहिततया च सकृदेवानुष्ठेयं यज्ञादिकमिति ॥

सू ॥ अनभिभवं च दर्शयति ॥ ३५ ॥

'धर्मेण पापमपनुदति' इति श्रुतिर्विद्योत्पत्तिप्रतिबन्धकदुरितनिवर्तनेन विद्याया अनभिभवं कर्मानुष्ठानकार्यं च दर्शयति । अतो न पूर्वोक्तविरोधः ॥

इत्याश्रमकर्माधिकरणम् ॥ ९ ॥

नन्वेवमैक्यप्रत्यभिज्ञया नित्यस्यैव यज्ञादेः काम्यत्वेनानित्यत्वाङ्गीकारे विरोधः स्यादित्याशङ्क्याह—**संयोगेति** । 'एकस्य तूभयत्वे संयोगपृथक्त्व'मिति जैमिनिसूत्रोक्तन्यायस्संयोगपृथक्त्वन्यायः । एकस्यानुष्ठेयस्य नित्यानित्योभयरूपत्वे संयोगपृथक्त्वं कारणमिति तस्य सूत्रस्यार्थः । सिद्धरूप इवानुष्ठेये वस्तुनि नित्यत्वानित्यत्वयोर्न वस्तुकृतो विरोधोऽस्ति षोडशिग्रहकर्तव्यत्वाकर्तव्यत्वयोरिव । विनियोजकप्रमाणैक्ये शब्दकृतो विरोधः स्यात् । एकस्य वाक्यस्योभयसम्बन्धबोधकत्वासंभवात् । सोऽपि नास्ति । 'खादिरो यूपः' 'खादिरं वीर्यकामस्ये'त्यादिविनियोजकप्रमाणभेदसद्भावादिति तस्य सूत्रस्याभिप्रायः ॥ ननु कर्मैक्ये नित्यत्वानित्यत्वविरोधाभावेऽपि नित्यार्थं फलार्थं च द्विःप्रयोगः स्यादित्याशङ्क्याह—**सकृत्प्रयोगेऽपीति** । कर्मैक्यवत्प्रयोगैक्येऽपि सति न विरोधः काम्यानुष्ठानतः प्रसङ्गान्नित्यार्थसिद्धेरिति भावः । कर्मैक्ये प्रमाणान्तरसमुच्चयार्थं सूत्रम्—**सू० ॥ अनभिभवं च दर्शयति ॥ ३५ ॥** 'कषाये कर्मभिः पक्के ततो ज्ञानं प्रवर्तते'इत्यादिभिः कर्मणां विद्यासाधनत्वे विद्योत्पत्तिप्रतिबन्धकदुरितनिवृत्तिर्द्वारमितीत्यवगतम् । तदेव चाश्रमधर्माणां कार्यमिति 'धर्मेण पापमपनुदती'ति श्रुतिर्दर्शयति—अतो विद्यापेक्षितद्वारजनकत्वेन कृत्स्नस्यैव कर्मणो विद्यासाधनत्वं युक्तमित्यपीतोऽपि कर्मैक्यमवसीयत इति भावः । **अतो न पूर्वोक्तेति** । एवं दृढे कर्मैक्ये नित्यत्वानित्यत्वविरोधः संयोगपृथक्त्वन्यायेनैव परिहरणीय इति भावः । 'विद्याञ्चाविद्याञ्च यस्तद्वेदोभयꣳसह । अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुत' इति मन्त्रस्यायमर्थः—विद्यां ब्रह्मोपासनां अविद्यां तत्सहकारिकर्मवृन्दं चेति तदुभयं यः सह वेद सहकारिसहकार्यभावेन युगपदनुष्ठेयं वेद स विद्वानहरहरनुष्ठीयमानेन तेन कर्मणा मृत्युं तीर्त्वा विद्यानुवृत्तितद्वैशद्यादिप्रतिबन्धकदुरितजातमभिभूय विद्यया साक्षात्कारपर्यन्तया मुक्तिं प्राप्नोतीति ॥

इत्याश्रमकर्माधिकरणम् ॥ ९ ॥

नयमणिमालायाम्

अथ आश्रमकर्माधिकरणम् ॥ ९ ॥

सू० ॥ विहितत्वाच्चाश्रमकर्मापि ॥ ३२ ॥ सहकारित्वेन च ॥ ३३ ॥ सर्वथापि त एवोभयलिङ्गात् ॥ ३४ ॥ अनभिभवं च दर्शयति ॥ ३५ ॥

प्राङ्ज्ञानानुष्ठानात्तदिच्छता तदनुतिष्ठता वापि । कर्म द्विरनुष्ठेयं साधनसहकारिनित्यभावेन ॥ ३०९ ॥

कर्मैकमेव तावद्यज्ञादिप्रत्यभिज्ञानात् । कर्मैक्ये सति काम्यानुष्ठानान्नित्यसिद्धिः स्यात् ॥ ३१० ॥

इति आश्रमकर्माधिकरणम् ॥ ९ ॥

अथ अन्तराधिकरणम् ॥ १० ॥

सू ॥ अन्तरा चापि तु तद्दृष्टेः ॥ ३६ ॥

उक्तमाश्रमिणां विद्या संपद्यत इति । इदानाश्रमिणां विद्या संपद्यते न वेति संदेहः॥ अनाश्रमिणः स्नातका विधुराश्च, तेषां ब्रह्मविद्या न संभवति, विद्यासाधनभूतानामाश्रमधर्माणामभावात् ॥ इति प्राप्ते वदामः—रैक्वादिषु विद्यादर्शनादनाश्रमिणामपि विद्या संभवत्येव ॥ यदुक्तं विद्यासाधनाश्रमधर्माभावादिति, तत्राह—

सू ॥ अपि च स्मर्यते ॥ ३७ ॥

अनाश्रमिणामपि जपादिना विद्यानुग्रहः स्मर्यते 'जप्येनैव तु संसिध्येद्ब्राह्मणो नात्र संशयः । कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते ॥' इति ॥

सू ॥ विशेषानुग्रहश्च ॥ ३८ ॥

आश्रमनियतधर्मविशेषेणापि विद्याऽनुग्रहः श्रूयते । 'तपसा ब्रह्मचर्येण श्रद्धया विद्यया चात्मानमन्विष्य' इति ॥

सू ॥ अतस्त्वितरज्ज्यायो लिङ्गाच्च ॥ ३९ ॥

अनाश्रमित्वादितरदाश्रमित्वं ज्यायः, धर्मभूयस्त्वात्, 'अनाश्रमी न तिष्ठेत्तु

अन्तराधिकरणम् ॥ १० ॥

सू० ॥ अन्तरा चापि तु तद्दृष्टेः ॥ ३६ ॥ 'विहितत्वाच्चाश्रमकर्मापी'त्याश्रमकर्मणां विद्यासाधनत्वं विद्यासहकारित्वं चोक्तम् । तर्ह्यनाश्रमिणामाश्रमकर्माभावाद्विद्या न सम्पद्यत इति पूर्वपक्षोत्थानात्सङ्गतिः । अनाश्रमिणां विद्यासाधनसहकारिकर्मासंभवसंभवाभ्यां संशयः । ये गुरुकुलात्समावृत्तौ सत्यामकृतदारसङ्ग्रहाः स्नातकाः ये च मृतपत्नीका विधुराः तेषां विद्या न सम्पद्यते 'विविदिषन्ति यज्ञेने'त्यादिश्रुतावाश्रमधर्माणामेव विद्यासाधनत्वेन वर्णितत्वात् 'विद्याञ्चाविद्याञ्चे'ति श्रुतावविद्याशब्दस्यापि तत्समानन्यायत्वेनाश्रमधर्मपरत्वात् आश्रमानियतजपादिमात्रेण तेषां विद्यानुग्रहाङ्गीकारे भूयसामाश्रमधर्माणामेव विद्यासाधनत्वेन विधानस्य वैयर्थ्यप्रसङ्गादिति पूर्वः पक्षः । आश्रमान् अन्तरा वर्तमानानामपि स्नातकविधुराणां विद्या सम्पद्यत एव । रैक्वादिषु संवर्गविद्यादिदृष्टेरिति सिद्धान्तः ॥ नन्वन्यार्थदर्शनरूपलिङ्गमात्रं न साधकमिति प्रतिपादकप्रमाणप्रदर्शनार्थं सूत्रम्—सू० ॥ अपि च स्मर्यते ॥ ३७ ॥ संसिध्येत् ब्रह्मविद्यां लभत इत्यर्थः । निरपेक्षप्रापकप्रमाणदर्शनार्थं सूत्रम्—सू० ॥ विशेषानुग्रहश्च ॥ ३८ ॥ विद्यार्थाश्रमधर्मविधिवैयर्थ्यपरिहारार्थं सूत्रम्—सू० ॥ अतस्त्वितरज्ज्यायो लिङ्गाच्च ॥३९॥ धर्मभूयस्त्वादिति । तेनाविलम्बिता विद्योत्कर्षप्राप्तिर्लभ्यत इति भावः । लिङ्गादित्येतद्व्याचष्टे—

दिनमेकमपि द्विजः' इति स्मृतेश्च। एवमनाश्रमित्वादाश्रमित्वं वरमेव; तथाऽप्यापद्विषयेऽनाश्रमिणामपि जप्यादिसाधनेन विद्या संपद्यत एवेति ॥

इति अन्तराधिकरणम् ॥ १० ॥

अथ तद्भूताधिकरणम् ॥ ११ ॥

सू ॥ तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमात्तद्रूपाभावेभ्यः ॥ ४० ॥

इहोर्ध्वरेतसां पूर्वाश्रमावरोहोऽस्ति न वेति संदेहः। 'ब्रह्मचर्यं समाप्य गृही भवेत् गृहाद्वा वनी भूत्वा प्रव्रजेत्' इत्याश्रमारोहो यथा स्वेच्छाधीनस्तथाऽवरोहोऽपि ॥ इति प्राप्ते सिद्धान्तयामः—नैष्ठिकादिभूतस्यातद्भावः ततः प्रच्युतिर्न संभवति। कुतः? नियमात् तद्रूपाभावेभ्यः। नियच्छन्ति हि 'अत्यन्तमात्मानमाचार्यकुलेऽवसादयन्' इति। 'अरण्यमियात् ततो न पुनरेयात्' इति 'संन्यस्याग्नीन् न पुनरावर्तयेत्' इति च शास्त्राणि नियच्छन्ति। न चारोहरूपशास्त्रवदवरोहरूपशास्त्राणि सन्ति। अतस्तेषामप्रच्युतिनियमश्रुतेः प्रच्युतौ श्रुत्याद्यभावाच्च न तेषां विद्याऽधिकारः। जैमिनेरप्येवमेव मतम् ॥ आरूढपतितस्य प्रायश्चित्तादिना विद्याऽधिकारो नास्तीत्याह—

अनाश्रमीति। आपद्विषय इति। आश्रमान्तरप्राप्त्युपायासंपत्तिविषय इत्यर्थः ॥

इति अन्तराधिकरणम् ॥ १० ॥

अथ तद्भूताधिकरणम् ॥ ११ ॥

सू० ॥ तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमात्तद्रूपाभावेभ्यः ॥ ४० ॥ ऊर्ध्वरेतसामाश्रमं प्राप्य पुनर्दारपरिग्रहं कृतवतां विद्याधिकारोऽस्ति न वेति विद्याधिकारविशेषणभूतशास्त्रापर्युदाससम्पत्त्यसंपत्तिभ्यां संशये पूर्वपक्षः। आश्रमाणामारोहवदवरोहोऽप्यस्तु नाम वृक्षाणामिव। ततश्च दारपरिग्रहेण गार्हस्थ्ये सति विद्याङ्गकर्मभूयस्त्वमपि लभ्यत इति 'अतस्त्वितरज्ज्यायो लिङ्गाच्चे'ति न्यायः प्रवर्तेत। यदि तु 'ब्रह्मचर्यं समाप्य गृही भवे'दिति क्रमस्योक्तत्वात् व्युत्क्रमे गृहस्थाश्रमप्राप्तिर्न स्यात् तदानीं तेषां स्वाश्रमप्रच्युतानामनाश्रमित्वेऽ'प्यन्तरा चापि तु तद्दृष्टेरिति' न्यायः प्रवर्तेत। तस्मादुभयथापि तेषां विद्याधिकारोऽस्तीति। नेति सिद्धान्तः। यतस्तद्भूतस्य ऊर्ध्वरेतसामाश्रमं प्राप्तस्य नातद्भावः तदाश्रमपरित्यागो नास्ति। 'अत्यन्तमात्मान'मित्यादिशास्त्रैस्तथा नियमनात् अतद्रूपापत्तौ शास्त्राभावाच्च। तथा च नियमोल्लङ्घनेन शास्त्रपर्युदस्तानां नास्ति विद्याधिकार इति ॥ ननु तर्ह्यवरुह्य कृतप्रायश्चित्तानां तत्राधिकारोऽस्त्वित्याशङ्कानिराकरणार्थं

नयमणिमालायाम्

अथ अन्तराधिकरणम् ॥ १० ॥

सू० ॥ अन्तरा चापि तु तद्दृष्टेः ॥ ३६ ॥ अपि च स्मर्यते ॥ ३७ ॥ विशेषानुग्रहश्च ॥ ३८ ॥ अतस्त्वितरज्ज्यायो लिङ्गाच्च ॥ ३९ ॥

विद्यायामधिकारो विदुरादेर्नास्त्यनाश्रमिणः। विद्यार्थस्याभावादाश्रमधर्मस्य कस्यापि ॥ ३११ ॥
रैक्कादिषु तद्दृष्टेरस्ति तु तस्यापि तदधिकृतिः। तदनुग्रहश्च युक्तो जपैश्च सामान्यधर्मैश्च ॥ ३१२ ॥

इति अन्तराधिकरणम् ॥ १० ॥

सू ॥ न चाधिकारिकमपि पतनानुमानात्तदयोगात् ॥ ४१ ॥

यदवकीर्णिनो गर्दभपश्वालम्भनम् 'अवकीर्णिपशुश्च तद्वत्' इत्यधिकारिलक्षणोक्तं प्रायश्चित्तं, तदप्यारूढपतितस्य न संभवति—'आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते नरः । प्रायश्चित्तं न पश्यामि येन शुद्ध्येत्स आत्महा ॥' इति तस्य प्रायश्चित्तानधिकारस्मृतेस्तदसंभवात् ॥

सू ॥ उपपूर्वमपीत्येके भावमशनवत्तदुक्तम् ॥ ४२ ॥

उपपातकत्वात् प्रायश्चित्तमप्येके मन्यन्ते, मध्वशनप्रायश्चित्तवत् । तदुक्तम्—'उत्तरेषां चैतदविरोधि' इति । उपकुर्वाणस्य यदुक्तं तत् स्वाश्रमाविरोध्यन्येषामप्याश्रमिणां भवतीत्यर्थः ॥

सू ॥ बहिस्तूभयथाऽपि स्मृतेराचाराच्च ॥ ४३ ॥

उपपातकत्वे महापातकत्वेऽपि कर्माधिकारादिबहिष्कृता एते, 'प्रायश्चित्तं न

सूत्रम् ॥ सू० ॥ न चाधिकारिकमपि पतनानुमानात्तदयोगात् ॥ ४१ ॥ अवकीर्णिपशुश्च तद्वदिति । पूर्वतन्त्रे अधिकाराध्याये यदधिकरणं तत्रावकीर्णिप्रायश्चित्तरूपपशुबन्धप्रकारश्चिन्तितः । अवकीर्णिपशुः स्थपतीष्टिवल्लौकिकाग्नौ कर्तव्यः निषादस्थपतेरिव ब्रह्मचारिणोऽप्याधानासंभवादिति । एवंभूतं प्रायश्चित्तमपि तेषां नास्ति । 'आरूढो नैष्ठिकं धर्म'मिति व्रतभ्रष्टानां पतितत्वस्मरणेन प्रायश्चित्तानर्हत्वादित्यर्थः । अतोऽवकीर्णिप्रायश्चित्तस्मरणमुपकुर्वाणब्रह्मचारिविषयमिति भावः ॥ सू० ॥ उपपूर्वमपीत्येके भावमशनवत्तदुक्तम् ॥ ४२ ॥ एके आचार्याः नैष्ठिकादीनां ब्रह्मचर्यप्रच्यवनमुपपातकं न तु महापातकं तेष्वपरिगणनादिति मन्यमाना मध्वशनस्येव प्रायश्चित्तसद्भावं मन्यन्ते । तथैव स्मृतावुक्तमित्यर्थः । गौतमस्मृतौ उपनयनादिर्नियम इत्यारभ्योपकुर्वाणस्य नियमान्विधायातिदिष्टम् 'उत्तरेषां चैतदविरोधी'ति । उपकुर्वाणस्य यावन्नियमजातमुक्तं तत्र यदुत्तरेषामाश्रमाणां विरोधि यथा गृहस्थस्य भैक्षचरणं सन्न्यासिनोऽग्नीन्धनमित्यादि तत्परित्यज्यान्यत्सर्वं भवतीत्यर्थः । एवञ्चोपकुर्वाणस्योक्तं गर्दभपश्वालम्भनं नैष्ठिकस्यापि भवति । वानप्रस्थसन्न्यासिनोस्तु कृच्छ्रचान्द्रायणादिकं विशिष्य विहितं प्रायश्चित्तं भवति । यत्तु 'प्रायश्चित्तं न पश्यामी'ति स्मरणं तद्दुर्बलम् । विलम्बितत्वात् । अदर्शनेन हि प्रायश्चित्ताभावोऽनुमेयः । तेन निषेधश्रुतिः कल्पनीयेति । अतस्तत्स्मरणं प्रायश्चित्तगौरवख्यापनार्थमिति न तद्विरोध इति भावः ॥ एवं च कृतप्रायश्चित्तानां तेषां विद्याधिकारोऽस्त्विति शङ्कासूत्रमेतत्—सू० ॥ बहिस्तूभयथापि स्मृतेराचाराच्च ॥ ४३ ॥ पापानां द्वे शक्ती । इह कर्माधिकारशिष्टसंसर्गविरोधिनी परत्र नरकापादिनी च । नैष्ठिकानां प्रायश्चित्तसद्भावेऽपि तेन परत्र नरकापादिन्येव पापशक्तिर्हीयते न त्विह प्रत्यापस्यापा-

पश्यामि येन शुद्ध्येत् स आत्महा' इति स्मृतेः, शिष्टबहिष्काराच्च । अतः सर्वथैवारूढपतितानां न विद्याऽधिकारः ॥

इति तद्भूताधिकरणम् ॥ ११ ॥

अथ स्वाम्यधिकरणम् ॥ १२ ॥

सू ॥ स्वामिनः फलश्रुतेरित्यात्रेयः ॥ ४४ ॥

उक्तमुद्गीथाद्युपासनम् । तदनुष्ठानं यजमानस्य, उत ऋत्विजामिति संशयः ॥ किं प्राप्तम्? उद्गीथाद्युपासनं यजमानस्यैवानुष्ठेयम्, तस्यैव वीर्यवत्तरत्वफलश्रवणात्, नर्त्विजामित्यात्रेयमतम् ॥ सिद्धान्त उच्यते—

सू ॥ आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रियते ॥ ४५ ॥

'एवंविदुद्गाता ब्रूयात्' इति वाक्यशेषे उद्गातुरुपासकत्वं स्फुटं श्रूयते । आ-

---

दिनी । 'नास्यास्मिँल्लोके प्रत्यापत्तिर्विद्यते कल्मषं तु निर्हण्यते' 'प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत् । कामतो व्यवहार्यस्तु वचनादिह जायत'इत्यादिस्मरणात् । अतः 'प्रायश्चित्तं न पश्यामी'त्यादिस्मरणमप्यैहिकप्रत्यापत्त्यापादकप्रायश्चित्ताभिप्रायमिति भावः ॥

इति तद्भूताधिकरणम् ॥ ११ ॥

अथ स्वाम्यधिकरणम् ॥ १२ ॥

सू० ॥ स्वामिनः फलश्रुतेरित्यात्रेयः ॥ ४४ ॥ उपासनानुष्ठातृविचारप्रसङ्गागतमिदमधिकरणम् । फलस्य कर्तृगामित्वात् ऋत्विक्परिक्रयाच्च संशयः । तस्यैवेति । ऋत्विक्परिक्रयस्याङ्गानुष्ठानार्थत्वात् पृथक्फलवदुपासनं प्रधानमिति फलार्थिना यजमानेनैवोपासनं कार्यं गोदोहनादेः पृथक्फलत्वेऽपि ऋत्विक्कर्तृकप्रणयनादित्याश्रितस्य पृथक्कृत्य यजमानेनोपादातुमशक्यत्वात् न याजमानत्वम् । उपासनानां तु क्रियारूपाणामुद्गीथादिभ्यः पृथक्कृत्य यजमानेन कर्तुं शक्यत्वात् प्रधानत्वाच्च याजमानत्वमेव युक्तम् । औद्गात्रसमाख्यादिकं तु 'शास्त्रफलं प्रयोक्तरी'ति न्यायविरोधान्नादरणीयमिति भावः ॥ सू० ॥ आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रियते ॥ ४५ ॥ 'एवंविदुद्गाता ब्रूयात् । कं ते काममागायानीत्येष ह्येव कामागानस्येष्टे य एवंविद्वान्साम गायती'ति । 'य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यत' इत्याद्युद्गीथविद्याप्रकरणे श्रूयते । एवंविदन्तरादित्येऽन्तर-

---

नयमणिमालायाम्

अथ तद्भूताधिकरणम् ॥ ११ ॥

सू० ॥ तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमात्तद्रूपाभावेभ्यः ॥ ४० ॥ नचाधिकारिकमपि पतनानुमानात्तदयोगात् ॥ ४१ ॥ उपपूर्वमपीत्येके भावमशनवत्तदुक्तम् ॥ ४२ ॥ बहिस्तूभयथापि स्मृतेराचाराच्च ॥ ४३ ॥

आरोहवदवरोहानुमत्यभावेऽपि चाश्रमिणाम् । अवरुह्य कृतनिष्कृतिरधिकारी भवतु विद्यायाम् ॥ ३१३ ॥

पतितस्यास्य न निष्कृतिरस्ति तु यदि चोपपातकत्वेन । विद्याधिकारबाह्यस्मृत्याचारात्तथाप्येषः ॥ ३१४ ॥

इति तद्भूताधिकरणम् ॥ ११ ॥

र्त्विज्यमेव तदनुष्ठानमित्यौडुलोमिमतम्। कथमन्यकर्तृकमन्यगामिफलं स्यादिति चेत्, ऋत्विजां कर्मस्वरूपवदशेषाङ्गानुष्ठानाय यजमानेन क्रीतत्वात्। साङ्गकर्मानुष्ठानाय हि ऋत्विजो यजमानेन परिक्रियन्ते। तस्मादृत्विक्कृतं यजमानकृतमेवेति, फलं च तस्य स्वामिन एवेति न विरोधः ॥

इति स्वाम्यधिकरणम् ॥ १२ ॥

क्षिणि चोपदिष्टं परमेश्वरस्वरूपं सर्वपापोदितत्वादिधर्मैः देवलोककामावाप्तिमनुष्यलोककामावाप्तिरूपफलाभ्यां च सह विद्वानुद्गाता यजमानं प्रति ब्रूयात्। कं ते काममैहिकमामुष्मिकं वा किं फलमुद्दिश्य आगायानि तत्फलानुकूलोपासनासहितं गानं करवाणीति। हि यस्मादेष एवोद्गाता कामागानस्याभिमतफलसाधनोपासनासहितगानस्येष्टे। कः। य एवं-विद्वान् अधिदैवताध्यात्मोपदिष्टपरमेश्वरस्वरूपं विद्वान् साम गायतीत्यर्थः। अत्रोद्गातृकर्तृकमेव वेदनमिति स्पष्टम्। एवं 'यदेव विद्यया करोति' 'य एतदेवंविद्वान् साम गायत्युभौ स गायती'त्यादिकमप्युदाहरणम्। न च यागदानादीनां फलवतां यजमानकर्तृकत्वे प्राधान्यं प्रयोजकम्। किं तु यजमानस्य द्रव्ये स्वत्वत्यागो नान्येन कर्तुं शक्य इत्येतत्प्रयोजकम्। अत एवाङ्गत्वेऽपि दक्षिणादानं याजमानम्। एवं च यदृत्विग्भिः कारयितुं शक्यं तस्य सर्वस्याप्यर्थे ऋत्विजां परिक्रीतत्वादौद्गात्रादिसमाख्यानुसाराच्च उद्गीथाद्युपासनमुद्गात्रादिभिरेव कर्तव्यम्। तदिदं हेत्वन्तरं 'तस्मै हि परिक्रियत' इति सूत्रशेषेण कण्ठोक्तम्। तत्सूत्रशेषं शंकोत्तरत्वेनापि योजयति—**कथमन्यकर्तृकमिति**। 'साङ्गकर्मानुष्ठानायेत्यनेन प्राधान्यं यजमानकर्तृकत्वे प्रयोजकं न भवति। परिक्रयस्य दृष्टार्थत्वाय सर्वमपि ऋत्विग्भिरेव कर्तव्यमित्युत्सर्गो दर्शितः। अत एव 'निर्देशाच्छेषभक्षोऽन्यैः प्रधानव'दिति पूर्वतन्त्राधिकरणे शंयुवाककालकर्तव्यं हविश्शेषभक्षणं ऋत्विग्भ्योऽन्यैः कर्तव्यम्। सर्वेष्वपि भक्षणेषु ऋत्विग्यजमानकर्तव्यत्वेन प्राप्तेषु 'यजमानपञ्चमा इडां भक्षयन्ती'ति तैरिडाभक्षणमेव कार्यमिति परिसंख्यातत्वादिति पूर्वपक्षं कृत्वा तद्वचनमृत्विजां भक्षणान्तरनिवृत्त्यर्थं न भवति। किं तु सर्वत्रापि प्रयोगे कर्तृत्वेन प्राप्तानामृत्विजामेवेडाभक्षणमिति यजमानस्याप्राप्तौ तत्प्राप्त्यर्थम्। अतः शंयुवाककालभक्षणमृत्विग्भिः कर्तव्यमिति सिद्धान्तितम्। एवं यत्र वचनेन याजमानसमाख्यया न्यायेन वा यजमानस्य कर्तृत्वं प्राप्नोति तत्रैवोत्सर्गस्यापवादः। अन्यत्र सर्वत्र ऋत्विजामेव कर्तृत्वमित्युद्गीथाद्युपासनास्वपि तथैवेति भावः ॥

इति स्वाम्यधिकरणम् ॥ १२ ॥

नयमणिमालायाम्

अथ स्वाम्यधिकरणम् ॥ ३० ॥

सू० ॥ स्वामिनः फलश्रुतेरित्यात्रेयः ॥ ४४ ॥ आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रियते ॥ ४५ ॥

यजमानेनैव भवेदुद्गीथादावुपासनं कार्यम्। फलकृत्येकाश्रयतोत्सर्गाख्याने विशिष्यनियमाच्च ॥ ३१५ ॥

ऋत्विक्कर्तृकमेतद्गोदोहनवत्तदीयकर्माश्रयणात्। उद्गातैवंविदिति स्फुटमक्ष्यादित्यवाक्यशेषाम्नानात् ॥ ३१६ ॥

इति स्वाम्यधिकरणम् ॥ १२ ॥

अथ सहकार्यन्तरविध्यधिकरणम् ॥ १३ ॥

सू ॥ सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ॥ ४६ ॥

कहोलब्राह्मणे श्रूयते—'तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत् बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिः' इति बहूपनिषत्तात्पर्यनिर्णयरूपं पाण्डित्यं निश्शेषेण संपाद्य बाल्येन रागद्वेषादिरहितत्वात् बाल्यसदृशेनावस्थान्तरेणावतिष्ठेत । ततः पाण्डित्यबाल्ये निश्शेषं संपाद्याथ मुनिः इति । अत्र पाण्डित्यबाल्यवन्मौनमपि विधीयते न वा । इति संशये मुनिरित्यत्र भवेदित्यादिविधिप्रयोगाभावान्न विधीयते ॥ इति प्राप्तेऽभिधीयते—विद्यावतो यज्ञादिवत् पाण्डित्यबाल्ययोस्तृतीयं सहकार्यन्तरं मौनं विधीयत एव, प्रकृष्टमननशीले मुनिशब्दस्य प्रसिद्धेः । विद्यानिष्पत्त्यर्थमुपास्यविषयाभ्यासरूपमिदं प्रकृष्टमननं

अथ सहकार्यन्तरविध्यधिकरणम् ॥ १३ ॥

सू० ॥ सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ॥ ४६ ॥ यज्ञादीनां शमादीनां च विद्यासहकारिणां निरूपणानन्तरं संगतिविशेषप्राप्तां सर्वान्नानुमत्यादिचिन्तां कृत्वा पुनरपि विद्यायामेव सहकार्यन्तरं निरूप्यत इति संगतिः । रागप्राप्तत्वेन श्रवणमननयोरविधेयत्वस्य प्रथमाधिकरणभाष्ये निरूपितत्वादिह तयोर्विधिश्रवणं तेन विरुध्येतेत्याशङ्क्य पाण्डित्यबाल्यशब्दयोरर्थान्तरमाह—बहूपनिषदिति । ऊहापोहक्षमादिः पण्डा सास्य सञ्जातेति पण्डितः तस्य कर्म पाण्डित्यं श्रवणमननानन्तरं तदभ्यासपाटववशालब्धया ऊहापोहक्षमया नवनवोन्मेषशालिन्या प्रतिभया श्रुतमतार्थानुकूल्येन सकलोपनिषत्तात्पर्यप्रतिष्ठापनं पाण्डित्यं तदनुकूलप्रतिभाशक्तौ सत्यामपि बालवद्रागद्वेषस्वमाहात्म्यप्रख्यापनाहंकारादिराहित्यं बाल्यं तदुभयं श्रवणमननानन्तरभाविविद्यासहकारित्वेन विधेयमिति सम्प्रतिपन्नमेव । इह पुनरथ मुनिरित्युक्तं तृतीयमपि सहकार्यन्तरं विधीयते न वेति विध्यर्हत्वानर्हत्वाभ्यां संशये श्रवणमननबाल्यपाण्डित्येभ्योऽन्यस्य विध्यर्हस्य कस्यचिददर्शनाद्विधिशब्दाश्रवणाच्च न विधीयते किं तु मननमेवानूद्यत इति प्राप्ते सौत्रपदानि व्याचक्षाण एव सिद्धान्तयति—विद्यावत इति । तद्वत इत्यस्य व्याख्यानमिदम् । 'विध्यादिव'दित्यस्य व्याख्यानं—यज्ञादिवदिति । विधीयत इति । विधिर्यज्ञादिः शमादिश्च । आदिशब्देन विधिसरूपवाक्याभ्यामनूदितं श्रवणं मननं च गृह्यते । तृतीयशब्दस्यावध्यपेक्षापूरणं पाण्डित्यबाल्ययोरिति । तृतीयशब्दसामानाधिकरण्येन सहकार्यन्तरविधिपदव्याख्यानम्—सहकार्यन्तरमिति । विधीयत इति विधिः । सहकार्यन्तरं चासौ विधिश्चेति समानाधिकरणसमास इति भावः । 'पक्षेणे'ति पदं साध्याहारं व्याचष्टे—प्रकृष्टेति । मननमात्रं न मुनिशब्दस्य प्रवृत्तिनिमित्तं किं तु प्रकृष्टं मननम् । प्रकर्षश्च मननस्य स्नेहपूर्वकतया चिरविरहिताया नायिकायाः नायकविषयस्येव निरन्तरमनुवर्तमानत्वरूप इह पक्षेणेत्यनेनाध्याहार्यपदयुक्तेन विवक्षित इति भावः । तमेवं प्रकर्षं दर्शयति—विद्यानिष्पत्त्यर्थमिति । यस्योपासनानुष्ठानकालव्यतिरिक्तकालेष्वपि गच्छतस्तिष्ठतः शयानस्य वा उपास्यविषया चिन्तानुवर्तते । तस्यैवोपा-

तिष्ठासेदिति पदानुवृत्त्या विधीयते । ततो मौनविधिः संभवति विद्यावत इति ॥

इति सहकार्यन्तरविध्यधिकरणम् ॥ १३ ॥

अथ कृत्स्नभावाधिकरणम् ॥ १४ ॥

सू ॥ कृत्स्नभावात्तु गृहिणोपसंहारः ॥ ४७ ॥

इह सर्वेषामाश्रमाणां विद्या साधारणी, उत विशेषोऽस्तीति संशयः ॥ ब्रह्मचारिणो वेदाभ्यासे आचार्यपरवशत्वात् गृहस्थस्य कुटुम्बभरणायासित्वात् वनस्थस्य वैखानसधर्मव्यापृतत्वान्न तेषां ज्ञानध्याने संभवतः । 'वेदान्तविज्ञानसुनिश्चितार्थास्सन्न्यासयोगाद्यतयश्शुद्धसत्त्वाः' इति वेदान्तार्थज्ञानवतां सन्न्यासयोगश्रवणात् 'अन्त्याश्रमस्थः' इति ध्यानविधौ दर्शनाच्चान्त्याश्रमिणामेव ज्ञान-

---

सनाकालेऽपि तद्विषयचित्तैकाग्र्याद्विद्या दृढीभवति । यस्य तूपासनाकाले यथाकथंचिद्विद्यानुष्ठानेऽपि समयान्तरेषु चिन्तान्तरावेशः तस्योपासनानुष्ठानकालेऽपि चेतसि समयान्तरचिन्तितविषयान्तरानुप्रवेशाद्विद्या न दृढीभवेदित्युपास्यविषयाभ्यासोऽपि विद्यासहकारीत्येवंरूपं प्रकृष्टं मननमेव 'अथ मुनि'रित्यत्र विधीयते । श्रवणप्रतिष्ठार्थस्य मननमात्रस्य प्रागेव निर्वृत्तत्वेन तत्राथशब्दानन्वया'त्तिष्ठासे'दिति पदानुवृत्त्या मननस्य विधेयत्वसंभवाच्चेति भावः ॥

इति सहकार्यन्तरविध्यधिकरणम् ॥ १३ ॥

अथ कृत्स्नभावाधिकरणम् ॥ १४ ॥

सू० ॥ कृत्स्नभावात्तु गृहिणोपसंहारः ॥ ४७ ॥ यदि विद्यादार्ढ्यार्थमुपासकानां चेतसस्सर्वदोपास्यप्रावण्येन भाव्यं तर्हि सन्न्यासिनामेव विद्यास्वधिकारः स्यात् नेतरेषामिति पूर्वपक्षोत्थानात्सङ्गतिः । इतरेषां सार्वदिकोपास्यप्रावण्यसंभवासंभवाभ्यां संशयः । इतरेषां तत्तदाश्रमविहितकर्मानुष्ठानवैयग्र्यमावश्यकमिति तदसंभवेन पूर्वपक्षः । सन्न्यासयोगादित्यादिश्रवणं च तदुपोद्बलकम् । 'अत्याश्रमस्थः सकलेन्द्रियाणि निरुध्य भक्त्या स्वगुरुं प्रणम्ये'ति कैवल्योपनिषत्पाठः प्रसिद्धः । न 'त्वन्त्याश्रमस्थ' इति । अत्याश्रमस्थस्तु 'अग्निरित्यादिभिर्मन्त्रैर्भस्मनोद्धूलनं तथा । त्रिपुण्ड्रधारणं चैव वदन्त्यत्याश्रमं बुधा' इति पुराणोक्तलक्षणस्सर्वाश्रमसाधारणः । तस्मा'दन्त्याश्रमस्थ' इति ध्यानविधौ 'दर्शनाच्चे'ति

नयमणिमालायाम्

अथ सहकार्यन्तरविध्यधिकरणम् ॥ १३ ॥

सू० ॥ सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ॥ ४६ ॥

अथ मुनिरित्यत्र विधेरश्रवणाद् ज्ञानमविधेयम् । पाण्डित्यशब्दितं यज्ज्ञानं विहितं तदनुवाक्यम् ॥ ३१७ ॥

पाण्डित्याद्यनुविदितं प्रकृष्टमननात्मकं मौनम् । ध्याने तदकालेष्वपि सहशीलनमम्बिकासहायस्य ॥ ३१८ ॥

पाण्डित्यबाल्ययोस्तु तृतीयमधिकारिणो···षः । विद्यासहकारितया यज्ञादिकवद्विधेयमिह मौनम् ॥ ३१९ ॥

इति सहकार्यन्तरविध्यधिकरणम् ॥ १३ ॥

ध्याने, नापरेषामिति पूर्वः पक्षः ॥ सर्वेष्वाश्रमेषु विद्या संभवत्येव । छान्दोग्ये 'कुटुम्बे शुचौ देशे स्वाध्यायमधीयानः' इत्यारभ्य 'स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसंपद्यते न च पुनरावर्तते' इति कृत्स्नाश्रमेषु विद्यासद्भावप्रदर्शनात् । तत्र गृहिणोपसंहारः सर्वेषां प्रदर्शनार्थः । एवमन्त्याश्रमवचनमपि सर्वेषामाश्रमाणां प्रदर्शनार्थम् । अतः सर्वेषामाश्रमिणां विद्याऽस्त्येव । फलत्यागः सन्न्यासः । यतित्वं जितेन्द्रियत्वम् । सर्वमिदं सर्वेषां संभवत्येव ॥

इति कृत्स्नभावाधिकरणम् ॥ १४ ॥

अथ मौनवदधिकरणम् ॥ १५ ॥

सू ॥ मौनवदितरेषामप्युपदेशात् ॥ ४८ ॥

अथर्वशिरसि श्रूयते—'तृष्णां छित्त्वा हेतुजालस्य मूलं बुद्ध्या संचिन्त्य स्था-

---

भाष्यं शाखान्तरपाठाभिप्रायं द्रष्टव्यम् । एवञ्चाश्रमधर्माणां विद्यासाधनत्ववचनानि विद्यारम्भप्राक्कालानुष्ठेयकर्मविषयाणि, न तु विद्यारम्भप्रभृत्यनुष्ठेयकर्मविषयाण्यपीति पूर्वपक्षाभिप्रायः ॥ ननु छान्दोग्ये गृहिणामेव फलद्वारा विद्यासद्भावः प्रदर्शितो न तु नैष्ठिकवैखानसयोरित्याशङ्क्याह—तत्र हीति । यज्ञादिबहुव्यापारव्यग्रेण गृहिणोपसंहारः कैमुतिकन्यायेन सर्वेषां प्रदर्शनार्थः । सर्वेष्वाश्रमेषु मुमुक्षादिविद्याधिकारिविशेषणसंभवेन विद्याधिकारसद्भावात् सर्वेषामाश्रमिणां स्वस्वाश्रमविहितकर्मानुष्ठानार्थवैयग्र्यग्रस्तकालव्यतिरिक्तकालेषूपास्यविषयचेतस्समाधानसंभवाच्च कर्मानुष्ठानवैयग्र्यस्य चेतस्समाधानविरोधिदुरितनिवृत्त्यर्थत्वेन तस्योपासनाकालापेक्षितचेतस्समाधानविरोधित्वाप्रसङ्गाच्चेति भावः । एवमन्त्याश्रमवचनमपीति । यथा 'जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते । तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य तमेवं वेदानुवचनेन ब्राह्मणा विविदिषन्ती'त्यादिषु ब्राह्मणग्रहणमधिकारिविशेषवत्त्वाविशेषात् क्षत्रियवैश्ययोरप्युपलक्षणम् । एवमिहापीति भावः । 'सन्न्यासयोगाद्यतय' इत्यत्र तु नाश्रमान्तरव्यवच्छेदशङ्केत्याह—फलत्याग इति । 'काम्यानां कर्मणां न्यासं सन्न्यासं कवयो विदु'रिति गीतावचनात् । 'ये निर्जितेन्द्रियग्रामा यतिनो यतयश्च त' इति कोशकारवचनाच्चेति भावः ॥

इति कृत्स्नभावाधिकरणम् ॥ १४ ॥

अथ मौनवदधिकरणम् ॥ १५ ॥

सू० ॥ मौनवदितरेषामप्युपदेशात् ॥ ४८ ॥ द्विविधमत्याश्रमाख्यं पाशुपतव्रतम् एकमथर्वशिरःकालाग्निरुद्रोपनिषदादिषु श्रुतं भस्मोद्धूलनत्रिपुण्ड्रधारणमात्ररूपम् । तत्स-

---

नयमणिमालायाम्

अथ कृत्स्नभावाधिकरणम् ॥ १४ ॥

सू० ॥ कृत्स्नभावात्तु गृहिणोपसंहारः ॥ ४७ ॥

न गृही विद्याधिकृतः कर्मकुटुंबभृतिवैयग्र्यात् । नाचार्यकुलनिवासी परतन्त्रत्वादमुष्यापि ॥ ३२० ॥

कृत्स्नेष्वप्याश्रमिषु स्याद्विद्याकर्मणां छिद्रे । अत एव हि छान्दोग्ये दृष्टो गृहिणोपसंहारः ॥ ३२१ ॥

इति कृत्स्नभावाधिकरणम् ॥ १४ ॥

पयित्वा च रुद्रे । रुद्र एकत्वमाहुः । रुद्रं शाश्वतं वै पुराणमिषमूर्जं तपसा नियच्छत व्रतमेतत् पाशुपतम्' इति । तत् पाशुपतव्रतमथर्वशिरसि श्रुतं पुराणेषु च प्रसिद्धमेव । तन्निष्ठानां विद्याप्राप्तिर्मुक्तिश्च संभवति न वेति संशयः ॥ किं प्राप्तम्? आश्रमेष्वनन्तर्भावात्, अवसानदर्शनात्, पुत्राद्यर्थं कृष्णादिभिरनुष्ठितत्वात् अवान्तरफलसिद्धिमन्तरेण तेषां न मोक्षसिद्धिरस्ति ॥ इति प्राप्ते ब्रूमः— तेषामत्यन्तव्रतधारिणां मुक्तिरेव फलं संभवति । विद्यासंपत्तिश्च परब्रह्मणो रुद्र-

---

र्वविद्याङ्गत्वेन सर्वाश्रमसाधारणमिति 'प्रागङ्गावबद्धास्त्वि'त्य (ब्र० ३–३–५३)धिकरणे व्यवस्थापितम् । द्वितीयं द्वादशाब्दाद्यवधिसंकल्पविरजाहोमादिपूर्वकं यावत्सङ्कल्पितावधि भस्मोद्धूलनत्रिपुण्ड्रधारणं ब्रह्मचर्यजपधारणादियुक्तं वायुसंहितादिषु पुराणेषु प्रसिद्धम् । तदधिकृत्य चिन्ता प्रवर्तते । सर्वेषामाश्रमाणां ब्रह्मविद्या तत्फलं मुक्तिश्च संभवतीति वर्णितम् । इहाश्रमानन्तर्गतत्वेन प्रतीयमानेऽत्याश्रमे स्थितानां तदुभयं संभवति न वेति मुक्त्यर्थभस्मोद्धूलनत्रि[1]पुण्ड्रादिविद्याङ्गयोगात् पुत्रादिफलश्रवणाच्च संशये पूर्वपक्षः । किमेतत्पाशुपतव्रतं यावज्जीविकं मुक्तिफलम् उत द्वादशाब्दाद्यवधिकम् । नाद्यः— तस्याश्रमेष्वनन्तर्भावात् । तद्धि न तावद्ब्रह्मचर्यं कैश्चित्पारमहंस्यधर्मैरपि योगात् । नापि सन्न्यासः । अग्नीन्धनादियोगात् । नापि गार्हस्थ्यम् । दाराग्निहोत्रादिराहित्यात् । नापि वानप्रस्थम् । गार्हस्थ्यपूर्वकत्वाभावात् अग्निहोत्राद्यभावाच्च । आश्रमानन्तर्भावे[2] च नाश्रमधर्मा विद्यासहकारिणस्संभवन्ति । आश्रमानियतधर्मैर्जपादिभिर्विद्योपकाराच्चापद्विषयो न बुद्धिपूर्वं परिग्राह्य 'इत्यतस्त्वितरज्ज्यायो लिङ्गाच्चे'ति (ब्र० ३–४–३९) सूत्रे[3] दर्शितम् । अतो न यावज्जीविकस्य मुक्तिफलत्वं संभवति । नापि द्वादशाब्दाद्यवधियुक्तस्य । तस्याप्रायणानुष्ठेयविद्याङ्गत्वायोगात् तस्य पुत्राद्यर्थं कृष्णादिभिरनुष्ठितत्वस्यानुशासनिकवायुसंहितादिषु प्रतिपादितत्वाच्च । किंचास्य पाशुपतव्रतस्य मुक्तिफलत्वं साक्षाद्वा विद्याङ्गत्वेन वा । नाद्यः—विद्यासाध्याया मुक्तेः व्रतमात्रेणासंभवात् । द्वितीये सकलविद्याङ्गत्वेन मुक्तिफलत्वम् उत विद्याविशेषाङ्गत्वेन । नाद्यः—गृहस्थादीनां विद्यामात्रेऽनधिकारप्रसङ्गात् । न द्वितीयः । तथाभूतविद्याविशेषादर्शनादिति । एवं प्राप्ते सिद्धान्तः —यावज्जीविकस्यास्य विद्याङ्गत्वेन युक्तं[4] मुक्तिफलत्वं मौनवदितरेषामपि विद्याङ्गानामिहोपदेशात् । अत्र हि 'सहकार्यन्तरविधिरि'त्य(ब्र० ३–४–४६ सू)धिकरणे विद्याङ्गत्वेन निर्णीतं प्रकृष्टमननाख्यं मौनमुपदिष्टम् । यथा वायुसंहितायाम्—'यः कृत्वात्यन्तिकीं दीक्षामादेहान्तमनाकुलः । सुव्रतं तत्प्रकुर्वीत स तु वै नैष्ठिकः स्मृतः ॥ सोऽत्याश्रमी च विज्ञेयो महापाशुपतस्तथा । स एव तपतां श्रेष्ठः स एव तु महाव्रती । न तेन सदृशः कश्चित् कृतकृत्यो मुमुक्षुष्वि'त्युपक्रम्य 'शिवार्पितात्मा सततं न तेन सदृशः क्वचि'दित्युक्तम् । अत्र 'ह्यनाकुल' इति व्यापारान्तरवैयग्र्यं निषिध्य 'शिवार्पितात्मा सतत'मिति प्रकृष्टमननाख्यं मौनमेवोक्तम् । तथा मौनवदन्येषामपि विद्याङ्गानामुपदेशो दृश्यते । 'पयोव्रती वा भिक्षाशी भवेदेकाशनस्तथा । नक्तयुक्ताशनो नित्यं भूशय्याभिरतः शुचिः ।

---

(१) 'त्रिपुण्ड्रधारणादियोगात्' इति ग. पाठः । (२) 'आश्रमत्वाभावे च' इति ग. पाठः । (३) 'सूत्रोक्तरीत्या न यावज्जीविकस्य' इति ग. पाठः । (४) 'युक्तमुक्तं फलत्वमितरेषामपि विद्याङ्गानां' इति ग. पाठः ।

स्यानुसन्धानरूपा । मुनिधर्मवदितरेषामपि भिक्षाचर्यशमदमादीनां परधर्माणां पाशुपताख्ये व्रतेऽप्युपदेशात् तन्निष्ठानामपि 'रुद्र एकत्वमाहुः । रुद्रं शाश्वतं वै पुराणमिषमूर्जं तपसा नियच्छत व्रतमेतत् पाशुपतम्······अग्निरित्यादिना भस्म गृहीत्वा विमृज्याङ्गानि संस्पृशेत् तस्माद्व्रतमेतत् पाशुपतं पशुपाशविमोक्षाय' इति रुद्रध्यानस्य पाशविच्छेदरूपस्य मोक्षफलस्य संबन्धावगमाच्च । अतो यावदायुषं पाशुपतव्रतधारिणां मुक्तिरेव फलम् ॥ यदुक्तमाश्रमेष्वनन्तर्भाव इति तत्राह—

भस्मशायी तृणशायी चीराजिनशयोऽथवा । ब्रह्मचर्यरतो नित्यं व्रतमेतत्समाचरेत् । क्षमादानदयासत्याहिंसाशीलस्सदा भवेत् । सन्तुष्टश्च प्रशान्तश्च जपध्यानरतस्तथा ॥' इति ॥ ननु यावज्जीविकस्यापि पाशुपतव्रतस्याभ्युदयफलत्वमुत्तररामायणे प्रतिपादितम् । तत्र हि कुबेरवचनम्—"अहं तु हिमवत्पृष्ठं गतो धर्ममुपासितुम् । रौद्रं व्रतं समास्थाय नियतो नियतेन्द्रियः ॥" इति ॥ "ततोऽहमन्यद्विस्तीर्णं गत्वा तस्य गिरेस्तटम् । पूर्णं वर्षशतान्यष्टौ समवापं महाव्रतम् ॥" इति च ॥ तदनन्तरञ्च कुबेरं प्रति शिववचनम्—"प्रीतोऽस्मि तव धर्मज्ञ तपसानेन सुव्रत । मया चैतद्व्रतं चीर्णं त्वया चैव धनाधिप । तृतीयः पुरुषो नास्ति यश्चरेद्व्रतमीदृशम् । व्रतं हि दुस्तरं ह्येतन्मयैवोत्पादितं पुरा । तत्सखित्वं मया सौम्य रोचयस्व धनेश्वर ॥" इति ॥ अत्र यत्पशुपतेः शिवस्य परितोषणेन तत्सख्यप्राप्तिफलं रौद्रव्रताचरणमुपक्रान्तमित्युक्तम् । तत्र महाव्रतशब्दः प्रयुक्तः । स च यावज्जीविकस्य पाशुपतव्रतस्य वाचक इति 'स एव स्यान्महाव्रती'ति वायुसंहितावचनेनावगतम् । सत्यम् । इह महाव्रतशब्दो योगेन कतिपयकालावधावेव पाशुपतव्रते नेतव्यः । 'पूर्णं वर्षशतान्यष्टा'वित्यत्रैवावधेरुक्तत्वात् । पाशुपतव्रतस्याङ्गभूता विद्याप्यथर्वशिरस्येव श्रुतेत्याह —तन्निष्ठानामिति । "बालाग्रमात्रं हृदयस्य मध्ये विश्वं देवं जातवेदं वरेण्यम् । तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिश्शाश्वती नेतरेषा'मिति दहरपुण्डरीकान्तस्थपरमशिवसाक्षात्कारान्मुक्तिमुक्त्वा तत्साक्षात्कारसाधनं ध्यानमुच्यते । 'तृष्णां छित्त्वे'त्यादिना तृष्णां विषयरागं निरस्य हेतुजालस्य रागद्वेषमदमात्सर्यादिसंसारकारणजातस्य तामेव निरसनीयां तृष्णां मूलं कारणं बुद्ध्वा संचिन्त्य बुद्धिं रुद्रे स्थापयित्वा रुद्रे एकत्वं तादात्म्यमाहुः । शिवोऽहमिति भावनामभ्यसनीयामाहुरित्यर्थः । शाश्वतं नित्यम् । पुराणमनादिम् । इषमूर्जम् । 'सर्वो वै रुद्र' इति श्रुतेः प्राणिनामन्नम् । तत्प्रयुक्तबलात्मकं भोग्यानन्दतदनुभवरूपं वा रुद्रं तपसा सततमालोचनरूपेण ध्यानेन नियच्छत नियतं कुरुत । एतत्पाशुपतं नाम व्रतम् । 'अग्निरिति भस्मे'त्यादिना महामन्त्रजातेन भस्म गृहीत्वा अङ्गानि शिरोवदनादीनि निमृज्य संस्पृशेत् । तस्माद्भस्मोद्धूलनरूपाङ्गयोगादेतत्पाशुपतव्रतं यथोक्तं ध्यानरूपं पशूनां संसारिणां पाशस्य मलमायादिबन्धस्य मोक्षाय

---

(१) 'तत्र हि कुबेरवचन'मित्यारभ्य इदमधिकरणसमाप्तिपर्यन्तो ग्रन्थभागः ग. पुस्तके नोपलभ्यते । अन्यमातृकासु इदमध्यायसमाप्तिपर्यन्तो ग्रन्थ एव नास्ति । दिष्ट्या इदमध्यायसमाप्तिपर्यन्तस्य ग्रन्थस्य लाभः महीशूरमहाराजसंस्थानप्राचीनपुस्तकालयात्संपादितमातृकामात्रादिति महद्भाग्यमतिविस्मयनीयमेतत्संशोधकस्य ममेति आनन्दमावेदये इदः ।

सू ॥ अनाविष्कुर्वन्नन्वयात् ॥ ४९ ॥

आश्रमान्तररूपेणात्मानमनाविष्कुर्वन् अव्यक्तीभवन्नपि पाशुपताश्रमो विद्यासाधनब्रह्मचर्यादियतिधर्मसमन्वयादत्याश्रमसंज्ञकोऽयमाश्रमभेदः स्वतन्त्रः परमशिवप्राप्तिहेतुः । 'यावच्छरीरपातं वा द्वादशाब्दमथापि वा' इत्युक्तेरात्यन्तिकसावधित्वेन पाशुपतव्रतस्य विकल्पः । तत्रात्यन्तिकमत्याश्रमसंज्ञकमपवर्गहेतुः,

---

भवति इत्यर्थः ॥ सू० ॥ अनाविष्कुर्वन्नन्वयात् ॥ ४९ ॥ आत्मानमित्यध्याहृतपदयुक्तस्या'नाविष्कुर्व'न्निति सौत्रपदस्यार्थतो विवरणम्—अव्यक्तीभवन्नपीति। स्वतन्त्रः परमशिवप्राप्तिहेतुरिति । अयमाश्रमविशेषस्संवर्तादिषु महायोगिषु प्रसिद्धः । तथा ह्याश्वमेधिके पर्वणि संवर्तचरितं तावदेवंरूपं प्रसिद्धम् । तत्र हि—बृहस्पतिस्तु संवर्तं बाधते स्म पुनः पुनः । स बाध्यमानस्संवर्तो भ्रात्रा ज्येष्ठेन भारत । अर्थानुत्सृज्य दिग्वासा वनवासमरोचय'दिति । दिग्वासस्त्वलिङ्गेन संवर्तस्य पाशुपताश्रमपरिग्रहस्सूचितः । यतस्तत्र दिग्वासस्त्वमुक्तं शिवपुराणे—"ततस्तु जटिलो मुण्डः शिखैकजट एव वा । भूत्वा स्नातः पुनर्वीतलज्जश्चेत्स्याद्दिगम्बरः ॥" इति ॥ तथा—"उन्मत्तवेषं बिभ्रत्स चंक्रमीति यथासुखम् । वाराणसीं तु नगरीमभिक्षमुपसेवते ॥" इत्युक्तम् । शिवक्षेत्रसमाश्रयणमपि तत्र लिङ्गम्—"यस्य नित्यं विदुः स्थानं मोक्षमध्यात्मचिन्तकाः । योगिनस्तत्त्वमार्गस्थाः कैवल्यं परमं पदम् । यं विदुस्सङ्गनिर्मुक्तास्सामान्यं समदर्शिनः । तं प्रपद्ये जगद्योनिमयोनिं निर्गुणात्मकम् । असृजद्यस्तु भूतादीन् सप्तलोकान् सनातनान् । स्थितस्सत्योपरि स्थाणुस्तं प्रपद्ये सनातनम् । भक्तानां सुलभं तं हि दुर्लभं दूरपातिनाम् । अदूरस्थमजं देवं प्रकृतेः परतः स्थित"मिति । संवर्तेन मरुत्तायोपदिष्टे शिवस्तोत्रे शिवस्याद्यस्थानमेव मोक्षस्थानं परमपदमित्यादिप्रतिपादनं च संवर्तस्य शिवपदार्थितया पाशुपताश्रमपरिग्रहे लिङ्गम् । तथा 'मास्मैवं त्वं पुनरागाः कथञ्चिद्बृहस्पतिं परिधातुं मरुत्त मा त्वाधक्षे चक्षुषा दारुणेन संक्रुद्धोऽहं पावकं तं निबोधे'ति मरुत्तस्य यज्ञे वितते तदीयं यज्ञं प्रवर्तयता संवर्तेन सक्रोधमुक्तस्य बृहस्पतिमरुत्तयोस्सन्धानार्थमिन्द्रेण प्रेषितस्याग्नेः 'ततो नाकमगमद्धूमकेतुर्दाहाद्भीतो व्यथितोऽश्वत्थपर्णव'दिति संवर्तकोपभीत्या प्रत्यावृत्तिमुक्त्वा—'गन्धर्वराड्यात्वयं तत्र दूतो बिभेम्यहं वासव तत्र गन्तुम्। संरम्भान्मामुक्तवांस्तत्र तीक्ष्णं संवर्तो वाक्यं चरितब्रह्मचर्य' इत्यग्निवाक्ये यत्संवर्तस्य ब्रह्मचर्यानुष्ठानप्रयुक्तमहामहिमवर्णनं कृतं तदपि तत्र लिङ्गम् । न ह्यखिलानाश्रमान्परित्यज्य दिगम्बरतयोत्पथं प्रतिपन्नस्यैवंविधो महिमा संभावयितुमपि शक्यते । तथा जैगिषव्यचरितमप्येवंरूपं मोक्षधर्मे प्रसिद्धम् । तत्र हि 'अर्थः को वार्थशक्तिः का भगवन्ब्रूहि मेऽर्थितः ॥' इत्युमायाः प्रश्नम् 'अर्थोऽहमर्थशक्तिस्त्वं भोक्ताहं भोज्यमेव ते । रूपं विद्धि महाभागे प्रकृतिस्त्वं परो ह्यहम् । अहं विष्णुरहं ब्रह्मा ह्यहं यज्ञस्तथैव च । आवयोर्न च भेदोऽस्ति परमार्थस्ततोऽबले। तथापि विद्यते भेदः किं मां त्वं परिपृच्छसी'ति परमेश्वरस्योत्तरं च वर्णयित्वा—'एवमुक्ता ततः प्राह ह्यधिकं हि तयोर्वद' इति पुनरुमायाः प्रश्ने—'तदन्तरे स्थितो विद्वानस्थिरूपो महामुनिः । जैगिषव्यः स्मयन्प्राह ह्यर्थ इत्येव नादयन् । श्रेष्ठोऽर्थस्त्वहमाप्मोक्तलीना

तदन्यद्भोगहेतुरिति व्यवस्था । एवं भुक्तिमुक्तिहेतुतयोभयात्मकमिदं व्रतं शिवप्रसादकरं श्रुतिरेव विदधाति । यथा नाप्रामाण्यापातोऽस्या भवति तथा योजनीयम् ॥

इति मौनवदधिकरणम् ॥ १५ ॥

अथ ऐहिकाधिकरणम् ॥ १६ ॥

सू ॥ ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॥ ५० ॥

उक्तक्रमोपासननिष्ठानामैहिकं मुक्तिफलम्, उत जन्मान्तरे वा भवति ॥ इति

शक्तिकाऽवरा । मुद्रिकादिविशेषेण विस्मृता संहृतेति चे'ति जैगिषव्येण तस्योत्तरमुक्तमित्युक्तम् । ततः परमेश्वरं प्रति पृष्टे जैगीषव्येणोत्तरमुक्तमिति हेतुनार्थरूपस्य परमेश्वरस्य श्रैष्ठ्यम् अर्थशक्तिरूपाया उमायास्तद्धर्मत्वेन सर्गप्रलययोर्विकाससङ्कोचपरिणामित्वेन चावरत्वमुक्तमिति हेतुना चोमायास्तस्मिन्कोपे सति—'ततः प्रहस्य भगवान् सर्वपापहरो हरः । प्राह देवीं महादेवो जैगिषव्यो महामुनिः । भक्तो मम सखा चैव शिष्यश्चात्र महामुनि'रिति । 'निरपेक्षो मुनिर्योगी मामुपाश्रित्य संस्थितः । निर्द्वन्द्वस्सततं धीरो ममरूपस्वभावधृक् । तस्मात्क्षमस्व तं देवि रक्षितव्यस्त्वया हि स' इति च देव्याः कोपशान्त्यर्थं परमेश्वरेण तस्य चरितं वर्णितम् । तत्र 'मम रूपस्वभावधृ'गित्यनेन जैगिषव्यस्य भस्मोद्धूलनादिरूपपाशुपताश्रमनिषेवणमाविष्कृतम् । काशीखण्डेऽपि तथैव तच्चरितप्रपञ्चनं दृश्यते । एवमन्येषामपि महायोगिनां पाशुपताश्रमनिषेवणं पुराणेषु प्रपञ्चितमुदाहर्तव्यम्[1] ॥

इति मौनवदधिकरणम् ॥ १५ ॥

अथ ऐहिकाधिकरणम् ॥ १६ ॥

ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॥ ५० ॥ विद्याया मुक्तिः फलमित्येतदुपपद्यते वा न वेति तस्यास्तत्फलकत्वे विद्योदयदेहावसान एव मुक्त्यवश्यंभावतदनवश्यंभावाभ्यां संशये पूर्वपक्षः । विद्याया मुक्तिः फलमित्येतन्नोपपद्यते । तथा सति इहैव जन्मनि मुक्तः स्यामित्युपासककामनानुरोधाद्विद्योदयदेहावसान एव मुक्त्यवश्यंभावेन विदुषां जन्मान्तरश्रवणविरोधापत्तेः । जन्मप्रवाहोद्विग्नानां विरक्तानामिहैव जन्मनि मुक्तः स्यामित्येव

नयमणिमालायाम्

अथ मौनवदधिकरणम् ॥ १५ ॥

सू० ॥ मौनवदितरेषामप्युपदेशात् ॥ ४८ ॥ अनाविष्कुर्वन्नन्वयात् ॥ ४९ ॥

पाशुपतं सावधिकं व्रतमुदितं तन्न मुक्तिफलम् । पुत्राद्यर्थं हि पुरा कृष्णप्रभृतिभिरनुष्ठितं शृणुमः ॥ ३२२ ॥
आत्यन्तिकं तु तद्व्रतमाश्रमवर्गाद्बहिर्भूतम् । विद्याङ्गमेव न स्याद्दूरे मुक्त्यर्थता तस्य ॥ ३२३ ॥
मैवं मुक्त्यर्थमेव श्रुतिमुनिवचनादित्थमात्यन्तिकं तद्ध्यानं रुद्रस्य भिक्षाचरणशमदमाद्या हि यत्रोपदिष्टा ।
अस्त्येवास्याश्रमान्तर्गतिगतिविरहेऽप्याश्रमत्वं स्वतन्त्रं तस्यापि ब्रह्मचर्यप्रभृतिगुणसमायुक्तमत्याश्रमाख्यम् ॥ ३२४ ॥

इति मौनवदधिकरणम् ॥ १५ ॥

---

(१) 'प्रपञ्चितमुदाहर्तव्यम्' इत्यस्यानन्तरः पादशेषस्त्रुटितः क. ख. ग. मातृकासु । महीशूरमहाराजपुस्तकालयकोशमेकमेव शरणमवशिष्टाधिकरणद्वयसंपादने' इति लेखम् ।

संशये विचार्यते—इहैव मे जन्मनि मुक्तिर्जायतामित्यभिसंधाय पुरुष उपासने प्रवर्तते, न तु जन्मान्तर इति। कः प्रयोजनस्य विलम्बनमीहते। तस्मादैहिकमेव मुक्तिफलं यदि भवति। न चेत्, कदाचिदपि न भवति ॥ इति प्राप्ते वदामः—प्रबलकर्मान्तरप्रतिबन्धाभावे परोपासनफलमिह जन्मनि भवति; तत्सद्भावे तु जन्मान्तरे। यथाऽभ्युदयफलं स्वसाधनभूतपुण्यकर्मानन्तरमेव संपद्यत इति न नियमः, किंतु प्रतिबन्धकसद्भावे जन्मान्तरे भवति, तद्वत्, वामदेवादिषु जन्मा-

---

हि कामना नत्विह जन्मनि जन्मसहस्रानन्तरं वेति। न च वाच्यं श्रुतिषु मुक्तिमात्रं फलत्वेन श्रुतम्। न त्वैहिकी मुक्तिः। अतः स्वतन्त्रा पुरुषकामनानुरोध्येति स्वतः प्रवृत्तां पुरुषकामनामेव खल्वनुवदन्त्यधिकारवाक्यस्थाः कमिश्रुतयः। अतो यथाप्राप्त्यनुवाद इति। तासां श्रुतीनामपि तादर्थ्यमेव युक्तम्। न च 'मनोरथानामगतिर्न विद्यत' इति न्यायादनेनैव देहेन मुक्तः स्यां स्वर्गी स्यामित्यपि केचन कामयेरन्निति तदनुरोधोऽपि कार्यः स्यादिति वाच्यम्। स्वर्गमोक्षयोरर्थस्वाभाव्येन देहान्तरदेशान्तरप्राप्त्यवगत्या बाधितविषयायास्तथा कामनाया अननुरोद्धव्यत्वात् ॥ ननु तथाप्येतद्देहावसान एव स्वर्गी स्यामिति पुरुषकामनानुरोधे प्रबलकर्मान्तराप्रतिबन्धरूपयागादिवीर्यवत्तरत्वफलकोद्गीथविद्याविधानवैयर्थ्यं स्यादिति चेत्तर्हि कर्मफलश्रुतिषु तथा पुरुषकामनानुरोधो माभूत्तथापि विद्याफलश्रुतौ तदनुरोधः स्यादेव। बाधकाभावात्। ननु अत्रापि 'यावदधिकाराधिकरणो'(ब्र० ३-३-३१ सू०)क्तन्यायेनानेकदेहभोग्यप्रारब्धकर्मरूपविद्याफलप्रतिबन्धकसद्भावो बाधकोऽस्तीति चेन्न। कर्मफलाप्रतिबन्धफलकोद्गीथविद्याविधानसामर्थ्येन(१) यागादिफलोत्पत्तिप्रतिबन्धकप्रबलकर्मान्तरकल्पनेऽपि विद्याफलोक्तिप्रतिबन्धककर्मकल्पनायां प्रमाणाभावात्। न च 'भोगेन त्वितरे' (ब्र० ४-१-१९ सू) इत्यधिकरणन्यायेन यावत्प्रारब्धप्रतिबन्धककर्मक्षयं विद्याफलविलम्बं प्रतिपादयन्ती 'तस्य तावदेव चिर'मिति श्रुतिः प्रारब्धस्य विद्याफलप्रतिबन्धकत्वकल्पनायां प्रमाणं स्यादिति वाच्यम्। उद्गीथविद्यादिसहकृतत्वमात्रेण यागादीनां प्रबलकर्मान्तरप्रतिबध्यत्वश्रुतिसामर्थ्याद्विद्याजातेः कर्मजात्यपेक्षया प्राबल्यनिर्धारणेन कर्मणो विद्याप्रतिबन्धकत्वकल्पनस्यायुक्तत्वात्। 'तस्य तावदेवे'ति श्रुतेः शरीरावसाने मुक्तिफलकतया विद्यास्तावकत्वोपपत्तेः। तस्माद्विद्याया मुक्तिफलकत्वे विद्योदयदेहावसाने मुक्त्यवश्यंभावेन विदुषां जन्मान्तरश्रवणविरोधापत्तेः। मुक्तिफलश्रवणानि रात्रिसत्रन्यायेन फलविधिपरतया न विपरिणमयितव्यानि। किंतु विद्यास्तावकतयैव नेतव्यानि। ब्रह्मविद्यानां फलाकाङ्क्षायां तु उद्गीथविद्यानामिव 'यदेव विद्यये'ति श्रुत्युक्तं फलं ग्राह्यम्। तथा सति तत्र विद्याश्रुतेः प्रकरणेन सङ्कोचोऽपि न भविष्यतीति। सिद्धान्तस्तु—सर्वेषु वेदान्तेषु क्षयिष्णुत्वसातिशयत्वाभ्यां सकलकर्मफलनिन्दापुरस्सरं ब्रह्मविद्यानां मुक्तिफलश्रवणानि तावत् तासामप्रतिबन्धेन कर्मफलोत्पत्त्यर्थे तत्स्तावकतया नेतुमयुक्तानि। विरोधात्। अतस्तानि फलविधिपराण्येव। विदुषां जन्मान्तरश्रवणं तु प्रारब्धस्य विद्याफलप्रतिबन्धकतयोपपादनीयम्। विद्यायाः कर्मा-

(१) 'विद्यानुष्ठानसामर्थ्येन' इति मातृकान्तरपाठश्शिथिलमातृकान्तरपरिशीलनादवगम्यते।

न्तरश्रवणादिबलेन तत्फलदर्शनात्। ततोऽनैहिकत्वे मुक्तिफलस्य नियम इति॥

इति ऐहिकाधिकरणम् ॥ १६ ॥

अथ मुक्तिफलाधिकरणम् ॥ १७ ॥

सू ॥ एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः ॥ ५१ ॥

केवलकर्मफलाभ्युदयवन्मुक्तिफलमपि प्रबलकर्मान्तरप्रतिबन्धाभावे भवतीति निरूपितम्। तन्न्यायेन कर्मफलवत् ज्ञानफलस्यापि सातिशयत्वनियमोऽस्ति न वेति संशयः॥ किं तावत् प्राप्तम्? कर्मफलवन्मुक्तिफलमपि सातिशयम्—'ज्योतिष्टोमेन स्वर्गकामो यजेत' 'वाजपेयेन स्वाराज्यकामो यजेत' इत्यादिभिः

न्तरापेक्षया प्राबल्येऽपि प्रारब्धप्रतिबध्यत्वकल्पनायां न कश्चिद्विरोधः। प्राबल्यदौर्बल्ययोः फलबलकल्प्यत्वेन जातिभेदव्यवस्थितत्वाभावात्। जलविजातीयस्यापि वाडवाग्नेर्जलभक्षकत्वदर्शनात्। एवं च प्रारब्धावसाने मुक्तः स्यामित्येव कामना ब्रह्मविद्याधिकारविधिषु कमिश्रुतीनामर्थ इति कल्पनीयमिति॥

इति ऐहिकाधिकरणम् ॥ १६ ॥

अथ मुक्तिफलाधिकरणम् ॥ १७ ॥

एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः॥ ५१ ॥ ब्रह्मविद्यायाः कर्मप्रतिबध्यत्वेन कर्मविशेषात्तद्वदेव सातिशयफलत्वमप्यस्त्विति प्रत्यवस्थानात्सङ्गतिः। न्यूनाधिकगुणानामव्यवस्थितकालप्रायणपर्यन्तानुष्ठेयानां च विद्यानां वैषम्यात् फलवैषम्यमवश्यं कल्पनीयम्। न च वैषयिकानन्देभ्यो विरक्तस्य ब्रह्मविद्यास्वधिकारात् ब्रह्मानन्दे विशेषाभावाच्च फलवैषम्यकल्पनं बाधितमिति वाच्यम्। जीवन्मुक्तिदशायां योगभूमिकाभेदेनेव मुक्तिदशायां पुरुषभेदेन ब्रह्मानन्देऽभिव्यक्तितारतम्यकल्पनोपपत्तेः। आनन्दमीमांसायां मनुष्यगन्धर्वादिपरब्रह्मान्तपर्यायेषु 'श्रोत्रियस्य चाकामहतस्ये'ति श्रुतीनां विशेषे ब्रह्मोपासनलब्धमुक्तिकजीवविषयत्वसंभवेनासामपि श्रुतीनां मुक्तौ फलवैषम्ये प्रमाणतोपपत्तेश्च। मुक्तानां ब्रह्मणा परमसाम्यश्रुतिस्तु—यथा जगद्व्यापाराद्व्यावर्तिता तथा सर्वात्मना ब्रह्मानन्दभोगादपि व्यावर्तनीया। यथार्हं ब्रह्मानन्दभोगमात्रेण ब्रह्मसाम्यावलम्बना योजनीयेति पूर्वपक्षः। एवं प्राप्ते सिद्धान्तः—उपासनावैषम्येण फलवैषम्यकल्पने फलवैषम्यमनन्तविधं कल्पनीयम्। उपास्यगुणतारतम्येनाहरहरुपासना-

---

नयमणिमालायाम्

अथ ऐहिकाधिकरणम् ॥ १६ ॥

सू० ॥ ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॥ ६० ॥

ब्रह्मोपासीनानां जन्मनि तत्रैव मुक्तिफलम्। अभिसंधाय तथैव ह्युपासनायां प्रवर्तते पुरुषः॥ ३२५॥
प्रबलेन कर्मणा यदि नास्ति प्रतिबद्धमेवैतत्। तत्सत्त्वे जन्मान्तर एव स्यात्कर्मफलरीत्या॥ ३२६॥

इति ऐहिकाधिकरणम् ॥ १६ ॥

कर्मफलस्य सातिशयत्वमवगम्यते । तद्वदुपासनज्ञानफलस्यापि । इति प्राप्तेऽभिधीयते—कर्मफलस्येव ज्ञानोपासनफलस्य न सातिशयत्वनियमः । ब्रह्मस्वरूपावस्थाया एव फलत्वावधृतेः । सर्वेषामपि विद्यावतां ब्रह्मस्वरूपस्यैकत्वान्न वैषम्यकथाऽत्र संभवति । न चोपासनतारतम्यान्मुक्तिरूपस्य तत्फलस्य तारतम्यं स्यादिति वाच्यम् । उपासनकर्मणां मुक्तिफलव्यतिरेकेण फलान्तराभावात् । ब्रह्मण एकत्वेन तद्रूपस्य मुक्तिफलस्याप्येकत्वात् । अतो न मोक्षफलवैषम्यमिति ॥

इति मुक्तिफलाधिकरणम् ॥ १७ ॥

इति श्रीकण्ठशिवाचार्यविरचिते ब्रह्ममीमांसाभाष्ये तृतीयाध्यायस्य चतुर्थः पादः ॥ ३ ॥ ४ ॥

कालतारतम्येन तदुपासकजीवनकालतारतम्येन च उपासनावैषम्यस्यानन्तविषयत्वात् । 'श्रोत्रियस्य चाकामहतस्ये'ति तु दशैकादश वा पर्यायाः । अतस्ते मुक्तविषये उपासनावैषम्यप्रयुक्तानन्दाभिव्यक्तिवैषम्यविषयतया योजयितुं न शक्यन्ते । अपर्याप्तत्वात् । दिक्प्रदर्शनार्थश्रवणाभावाच्च । शक्यन्ते तु योगभूमिकाभेदाभिव्यक्तानन्दतारतम्यविषयतया । योगभूमिकाभेदानां कतिपयत्वेन योगशास्त्रेषु प्रसिद्धत्वात् । तेष्वानन्दविशेषाभिव्यक्तिभेदहेतवो योगभूमिकाभेदा एतावन्त एवेति श्रुतिप्रामाण्येनाभ्युपगन्तुं शक्यत्वात् । तस्मादुत्तमपर्यायगतं 'श्रोत्रियस्य चाकामहतस्ये'ति वाक्यं मुक्तविषयमिति वक्तव्यम् । तथा च तस्य सर्वमुक्तसाधारण्यात्परब्रह्मणो यावान्प्राजापत्यानन्दापेक्षया शतगुणत्वेन श्रुत आनन्दभोगः तावान्सर्वेषामिति सिद्धौ परमसाम्यश्रुतिरपि तदेकार्था स्यादिति, श्रुतिबाधितमिह फलवैषम्यं न्यायसहस्रेणापि कल्पयितुं न शक्यम् । न हि 'सप्तदश प्राजापत्यान्पशूनालभत'इत्यत्र सप्तदशश्रुतिबाधितं बहुवचनस्य त्रित्वे पर्यवसानं न्यायावलम्बनेन कल्पयितुं शक्यम् । अतः 'कर्मभूयस्त्वात्फलभूयस्त्व'मिति पूर्वतन्त्रोक्तन्यायो यत्र सत्यपि कर्मतारतम्ये फलावैशेष्यं प्रमाणसिद्धं तद्व्यतिरिक्तविषय इति कल्पयितुं युक्तम् । अत एव दूरात्समीपाच्चागत्य तटाके तृष्णया पानीयं पिबतामविशिष्टा तृप्तिः, धीशक्तिपाटवात्तन्मान्द्याद्वा चिरेण वेदमभ्यस्यतां वेदाक्षरावाप्तिरविशिष्टेति नैतादृशेषु स्थलेषु कर्मभूयस्त्वात्फलभूयस्त्वमिति सर्वमनवद्यम् ॥ इति मुक्तिफलाधिकरणम् ॥१७॥

इति शिवातिवादिमूर्द्धन्यशिवदर्शनस्थापनधुरन्धरसकलदेवभूदेवप्रतिष्ठापकश्रीमच्चिन्नबोम्मभूपालहृदयकमलकुहरविहरमाणश्रीसाम्बशिवप्रेरितस्य श्रीभरद्वाजकुलजलधिकौस्तुभश्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पय्यदीक्षितस्य कृतौ श्रीकण्ठाचार्यविरचितब्रह्ममीमांसाभाष्यव्याख्यायां शिवार्कमणिदीपिकाख्यायां तृतीयस्याध्यायस्य तुरीयः पादः ॥ ३ ॥ ४ ॥

नयमणिमालायाम्

अथ मुक्तिफलाधिकरणम् ॥ १७ ॥

सू० ॥ एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः ॥ ५१ ॥

तर्ह्येवं कर्मफलन्यायेनैवास्तु सातिशयः । अपवर्गेऽपि समत्वाद्विहितफलत्वस्य तत्रापि ॥ ३२७ ॥

ब्रह्मण एव फलत्वावधृतेरपवर्गमाप्तानाम् । तस्यैकरूप्यतोऽस्मिन्नातिशयः शक्यते प्रकल्पयितुम् ॥ ३२८ ॥

इति मुक्तिफलाधिकरणम् ॥ १७ ॥

इति श्रीमदप्पय्यदीक्षितकृतौ अधिकरणनयमणिमालाख्यतृतीयपरिच्छेदे तृतीयस्याध्यायस्य तुरीयः पादः ॥ ३ ॥ ४ ॥

॥ श्रीः ॥

शिवाभ्यां नमः।

श्रीकण्ठाचार्यकृतौ

ब्रह्ममीमांसाभाष्ये

चतुर्थाध्यायस्य प्रथमः पादः ॥

अथ आवृत्त्यधिकरणम् ॥ १ ॥

सू ॥ आवृत्तिरसकृदुपदेशात् ॥ १ ॥

विचारिताः खलूपासकोपास्योपासनभेदाश्रमधर्मादयस्तृतीयाध्याये। इह पुनश्चतुर्थाध्याये प्रथमे पादे उपासनाप्रकारः, द्वितीये जीवस्योपासकस्योत्क्रान्तिदशा, तृतीयेऽर्चिरादिगतिः, चतुर्थे ब्रह्मप्राप्तस्यावस्था च निरूप्यते। प्रथमाधिकरणेऽत्र 'ब्रह्मविदाप्नोति परम्' 'ज्ञात्वा शिवं शान्तिमत्यन्तमेति' इत्यादिषु मोक्षसाधनतया विहितं वेदनं सकृदनुष्ठेयम्? उतावर्तनीयम्? इति संशयः॥ किं तावत् प्राप्तम्?

शिवार्कमणिदीपिकायाम्

तुरीयस्याध्यायस्य प्रथमः पादः ॥

अथ आवृत्त्यधिकरणम् ॥ १ ॥

सू० आवृत्तिरसकृदुपदेशात् ॥ १ ॥ श्रोतृबुद्धिसौकर्याय वृत्तवर्तिष्यमाणपादार्थाननुकीर्तयन्त्सङ्गतिमाविष्करोति—विचारिता इति। साधननिरूपणानन्तरं तदधीनं फलं निरूप्यत इत्यध्याययोः सङ्गतिर्विवक्षिता। तत्र तृतीयाध्यायस्य प्रथमे पादे संसारवैतृष्ण्यजननायेह परत्र च परिभ्रमणरूपमुपासकस्य स्वरूपं निरूपितम्। द्वितीयपादे परब्रह्मप्राप्तितृष्णाजननाय निर्दोषासङ्ख्यमङ्गलगुणाकरत्वादिस्तन्महिमा निरूपितः। तृतीयपादे मुमुक्षुकर्तव्योपासनाभेदा निरूपिताः। चतुर्थे पादे उपासनाङ्गान्याश्रमधर्मशमदमादीनि निरूपितानि। इह चतुर्थाध्यायस्य प्रथमपादे आवृत्त्यादिरूप उपासनाप्रकारो निरूपितः। तस्य साधनान्तर्गतत्वेऽपि फलार्थापत्त्युपज्ञत्वादुपासनायाः प्रीतिपूर्वकचिन्तानुवृत्तिरूपत्वेन फलान्तर्भावस्यापि सत्त्वाच्च फलाध्याये निरूपणम्। द्वितीयपादादिषूत्क्रान्त्यादयो निरूप्यन्ते। विदुषो मूर्धन्यनाड्योत्क्रान्तिरर्चिरादिगतिः ब्रह्मप्राप्त्यनन्तरभाविगुणाविर्भावश्चेत्येते क्रमभाविनो विद्याफलविशेषा इति फलक्रमात्पादक्रमः। यद्यपि प्रथमपादे "तदधिगम उत्तरपूर्वाघयो"रि(ब्र० अ० ४ पा० १ सू० १३)त्यधिकरणमारभ्य पापक्षयस्य निरूप्यमाणत्वात्सर्वपूर्वभाविकर्मक्षयरूपं फलं प्रथमे पादे निरूप्यते। विद्यायाः कर्मक्षयहेतुसाक्षात्कारपर्यन्तत्वोपयोगिदार्ढ्यसिद्ध्यर्थमावृत्त्यादिनिरूपणमित्यपि वक्तुं शक्यं। तथापि कर्मक्षयापेक्षयाप्युपासना चिरविरहोत्कण्ठितनायिकाया नायकविषयचिन्तानुवृत्तिवत्तात्कालिकानन्दाविर्भावपर्यवसायित्वेनातिशयितफलरूपेत्यभिप्रेत्योपासनाप्रकार एव भाष्ये प्रथमपादार्थत्वेन वर्णितः। अत एव शिवभाववतामानन्दविशेषोप-

सकृदनुष्ठेयम्, 'सकृत्कृते कृतः शास्त्रार्थः' इति न्यायात् । प्रयाजादिवत् सकृदनुष्ठानेऽपि वेदनज्ञानशब्दार्थसिद्धेः ॥ इति प्राप्ते ब्रूमः । 'ब्रह्मविदाप्नोति परम्' इत्यादिषु मोक्षसाधनतया विहितं वेदनमसकृदावर्तनीयम् । 'मनो ब्रह्मेत्युपासीत ...भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद यत्स वेद स मयैतदुक्तः' 'अनु म एतां भगवो देवतां शाधि यां देवतामुपास्से' इत्यादिश्रुतिषूप-

---

लब्धिः शिवपुराणे शिवेनैव वर्णिता । "कम्पः स्वेदोऽश्रुपातश्च कण्ठे च स्वरविक्रिया । आनन्दाब्ध्युपलब्धिश्च भवेदाकस्मिकी मुहुः ॥ एतैर्व्यस्तैः समस्तैर्वा लिङ्गैरव्यभिचारिभिः । मन्दमध्योत्तमैर्भावैर्विज्ञेयास्ते नरोत्तमाः ॥ यथाऽयोऽग्निसमावेशान्नायो भवति केवलम् । तथैव मम सान्निध्यान्न ते केवलमानुषाः ॥" इति । एवं साक्षात्कारपर्यन्तोपासनाप्रकारनिरूपणेनैव प्रथमपादस्य फलाध्यायान्तर्भावः इत्यभिप्रेत्याग्रेऽपि भाष्यकारः पापक्षयप्रतिपादकाधिकरणानां सङ्गत्यन्तरं वक्ष्यति । विदेर्ज्ञानमात्रपरत्वोपासनापरत्वानवधारणात्संशये पूर्वपक्षमाह—सकृदिति । न च काम्यकर्मणामिव फलभूयस्त्वार्थमावृत्तिरिति वक्तुं शक्यम् । तद्वद्वेदनफले ब्रह्मानन्दानुभवे भूयस्त्वाल्पत्वविशेषाभावात् । "तस्मात्कर्मण्यारम्भभाव्यत्वात्कृषिवत्प्रत्यारम्भं फलानि स्यु"रिति न्यायस्य नायं विषयः । किंतु यथा प्रधानस्य साङ्गत्वोपपादनाय क्रियमाणं प्रयाजादिकमङ्गं सकृदेव क्रियते एवं वेदनमपि सकृदेव कर्तव्यमिति क्रतुवद्वानुमानेनाभ्यासिफलभूमा स्यादिति पूर्वपक्षनिराकरणार्थस्य सकृद्वा कारणैकत्वादिति न्यायस्यैवायं विषयः इत्यभिप्रेत्य दृष्टान्तमाह—प्रयाजादिवदिति । ननु मनो ब्रह्मेत्यादौ विद्युपास्त्योर्व्यतिकरेण प्रयोगात् ज्ञानसामान्यवाचिनश्शब्दस्यावृत्तिगुणविशिष्टज्ञानविशेषे पर्यवसानं स्यादित्याशङ्क्याह—वेदनज्ञानेति । छागपशुन्यायेन 'मनो ब्रह्मे'त्यादिवेदनानामुपासनारूपत्वपर्यवसानमस्तु नाम । न तावन्मात्रेणानन्दवल्ल्याद्युक्तब्रह्मवेदनानामावृत्तिस्सिध्यति । विद्याभेदात् । न हि प्रतिवसन्तं ज्योतिष्टोमस्यावृत्तिविधानात् द्वादशाहादीनामपि प्रतिवसन्तमावृत्तिस्सिध्यति । न च 'निदिध्यासितव्य' इत्यादिश्रुतेः कासांचिद्विद्यानां मुक्तिफलानामावृत्त्यपेक्षा संप्रतिपन्नेत्यन्यासामप्यावृत्तिरपेक्षणीया । अन्यथा फलभूयस्त्वासंभवेन क्लेशसाध्यानां तासामननुष्ठानप्रसङ्गादिति वाच्यम् । देवतान्तरनाम्नामनेकावृत्तिविशिष्टसंकीर्तने यत्फलं तस्य सकृदेव शिवादिनामसङ्कीर्तनेन लाभे संभवत्यपि देवतान्तरनामसङ्कीर्तनेष्विव पुरुषरुचिवैचित्र्येण विद्यान्तरेषु प्रवृत्त्युपपत्तेः । न च विद्यानामुपास्यसाक्षात्कारार्थत्वेन दृष्टफलत्वात्क्रियाणामर्थशेषत्वात्प्रत्यक्षे तन्निवृत्त्यापवर्गः स्यादिति न्यायेन यावत्फलोदयमवघातवदावृत्तिः स्यादिति वाच्यम् । यासां विद्यानां 'ततस्तु तं पश्यति निष्कलं ध्यायमान' इत्यादिवचनैस्साक्षात्कारपर्यन्तत्वमवगतं तासामावृत्तिसिद्धावप्यन्यासामावृत्त्यसिद्धेः । न च साक्षात्कारफलकविद्यानामावृत्त्यपेक्षामात्रेण विद्यात्वसामान्याददतत्फलानामप्यावृत्तिः सिध्यति । अग्निचयने औदुंबरमुलूखलं सर्वौषधस्य पूरयित्वावहन्त्यथैतदुपदधातीत्युपधेयोलूखलसंस्कारार्थत्वेन विहितस्याप्यवघातस्यावघातत्वसामान्यादावृत्त्यपेक्षाप्रसङ्गेन 'धर्ममात्रे त्वदर्शनाच्छब्दार्थेनापवर्गः स्या'दिति न्यायविरोधापत्तेरिति भावः । ननु मनोब्रह्मेत्यादिब्रह्म-

क्रमोपसंहारयोर्विद्युपास्त्योर्व्यतिकरोपदेशेन मोक्षसाधनरूपस्य वेदनस्योपासनारूपत्वावगमात्। उपासनशब्दस्य च स्मृतिसन्तानवाचित्वात्। यदुक्तं 'प्रया-

इष्टिप्रकरणे प्रक्रान्तोपासना 'य एवं वेदे'ति विदिनोपसंहृता। संवर्गविद्याप्रकरणे 'यत्स वेदे'ति हंसवचने श्रुतं रैक्कस्य वेदनं रैक्कं प्रति जानश्रुतिवचने उपासिनोपसंहृतमित्यस्तु नाम। एवं विद्युपास्त्योर्व्यतिकरेणोपदेशस्य सर्वविद्यासाधारण्याभावाद्विद्यान्तरेषु प्रयाजवत्सकृदेवानुष्ठानं स्यादित्याशङ्कामनूद्य निराकरोति—यदुक्तमिति। अयमाशयः। यासां विद्यानां साक्षात्कारपर्यन्तत्वं श्रुतं तासामावर्तमानतयोपासनरूपत्वमवघातन्यायेन सिध्यतीति तावन्निर्विवादम्। तस्यावर्तमानत्वात्मकस्योपासनारूपत्वस्य विद्यान्तरसाधारण्यमप्यवघातन्यायेनैव सिध्यति। व्रीह्युद्देशेन विहितस्याप्यवहननस्य यवसाधारण्यमपेक्षासामर्थ्यादुपपादनीयं नोपायान्तरेण। न च द्वितीयाश्रुत्यवगतमवहननादिसाध्यत्वं प्राक्सिद्धव्रीहित्वाद्याकारेण न संभवतीति तदवच्छेदकापूर्वीयत्वलक्षणावश्यंभावेन व्रीहित्वस्यापि विवक्षायां विशिष्टानुवाददोषापत्तेः प्रवृत्तिनिमित्तैक्याद्यवसाधारण्यसिद्धिरिति वाच्यम्। साध्यतावच्छेदकानुपस्थितावपि स्वर्गज्योतिष्टोमयोरिव व्रीह्यवहननयोः शब्देन साध्यसाधनबोधनसंभवात्। न चावहननवाक्ये व्रीहिपदस्य लौकिकापूर्वीयसाधारण्येन व्रीहिमात्रपरत्वे भूतभाविविनियोगरहितेषु लौकिकव्रीहिष्ववहननस्यार्थकर्मत्वमपूर्वीयव्रीहिषु विनियुक्तसंस्कारतया गुणकर्मत्वमिति विधिवैरूप्यापत्तिः। लौकिकव्रीहिमात्रपरत्वे द्वितीयाश्रुत्यवगतद्रव्यप्राधान्यभङ्गापत्तिरित्यपूर्वीयपरत्वावश्यंभावाद्यवसाधारण्यसिद्धिरिति वाच्यम्। अवहननादिवाक्यजन्यशाब्दबोधस्य व्रीहित्वप्रकारकत्वेऽपि द्वितीयाश्रुतिनिर्दिष्टव्रीहिगुणतया विधीयमानमवहननं भूतभाव्युपयोगरहितलौकिकव्रीहिविषयं भवितुं न योग्यमिति विधेयसामर्थ्याच्छाब्दबोधानन्तरमपूर्वीयव्रीहीणां विषयत्वावगतिसंभवात्। 'यस्योभावग्नी अनुगतावभिनिम्रोचेदभ्युदियाद्वा पुनराधेयं तस्य प्रायश्चित्ति'रित्यत्र हविरार्त्यधिकरणन्यायेनाग्न्युभयत्वस्याविवक्षयाग्न्यनुगममात्रस्य शाब्दबोधवेलायां निमित्तत्वावगतावपि निमित्ते विधीयमानमाधानं सहितयोरेवाग्न्योरुत्पादनक्षमं नत्वेकस्याग्नेरिति विधेयसामर्थ्यादुभयानुगम एव निमित्तत्वपर्यवसानाङ्गीकारात्। 'तप्ते पयसि दध्यानयती'त्यत्र शाब्दबोधस्य पयस्त्वमात्रप्रकारकत्वेऽपि सा वैश्वदेव्यामिक्षेति तदनन्तरवाक्ये तस्य पयसो यागान्वयविधाने सति तत्सामर्थ्याच्छाब्दबोधानन्तरं तदपूर्वसंबन्धिनः पयसो विषयत्वावगतिरित्यवश्यंवक्तव्यत्वाच्च। अवहननादिवाक्येष्वपूर्वीयत्वलक्षणया तज्जन्यशाब्दबोधस्यापूर्वीयत्वप्रकारत्वेऽपि जुह्वादिव्यावर्तकस्य तण्डुलद्वारकत्वस्य व्रीहित्वस्येव विशिष्टानुवाददोषापत्त्या विवक्षितुमशक्यत्वेन शाब्दबोधानन्तरं विधेयदृष्टप्रयोजनकावहननसामर्थ्यादेव तण्डुलद्वारकापूर्वीयद्रव्यविषयत्वावगतेर्वक्तव्यत्वाच्च। तस्मादनुपपत्त्यभावेनापूर्वीयत्वलक्षणानुत्थितेस्तत्प्रयुक्तयवसाधारण्याभावात्। यवानां पुरोडाशप्रकृतिद्रव्यत्वाविशेषेण व्रीहिवत्तण्डुलभावादिसाधनापेक्षासत्त्वेन तदपेक्षासामर्थ्यादेवावहननविधेर्यवसाधारण्यमुपपादनीयम्। अपूर्वीयत्वलक्षणायामपि ह्यवहननविधेर्दृष्टार्थत्वादवहननापेक्षानपेक्षापूर्वीयद्रव्यालोचनमावश्यकम्। अन्यथा तस्य जुह्वादिसाधारण्यप्रसङ्गात्।

अपि च व्रीहिषु विहितमवहननादिकमपूर्वीयत्वलक्षणया यवेष्वपि यदि स्यात्तदा सोमे विहितं क्रयादि संस्कारजातं फलचमसेऽप्युपदेशत एव प्राप्नुयात् । हविःप्रकृतित्वेन सोमयागापूर्वसाधनत्वस्य तत्रापि सत्त्वात् । तथा च 'नैमित्तिकमतुल्यत्वादसमानविधानं स्या'दिति तृतीयाध्यायाधिकरणविरोधापत्तेः । ननु नित्यस्य क्रयादिसंस्कारजातस्याधिकारान्वये नैमित्तिकः फलचमसो द्वारं भवितुं नार्हति । स्वयं च विशेष्यतया तेनान्वेतुं नार्हति । न खल्वभिषवेण नित्यं ज्योतिष्टोमस्योपकुर्यादनित्यफलचमसद्वारेणेति युज्यते । न वा नित्याभिषवविशिष्टेन फलचमसेन निमित्तवान्यजेतेति युज्यते । तस्मान्नित्यानित्यसंयोगविरोधान्न फलचमसस्य सोमसामानविध्यमिति चेत् । स्यादेतदेवं यदि फलचमसत्वाकारेण स वाक्यार्थान्वयी स्यात् । 'सोमं क्रीणाती'त्यादिसंस्कारवाक्येषु सोमपदलक्षितापूर्वसाधनत्वाकारेण स वाक्यार्थान्वयी चेत्कः प्रसङ्गो नित्यानित्यसंयोगविरोधस्य । सर्वत्रापि हि ज्योतिष्टोमप्रयोगे हविःप्रकृतित्वे तदपूर्वसाधनभूतो होमः फलचमसो वास्त्येव । एवमेव हि 'यदाहवनीये जुह्वती'त्यादिष्वपि नित्यानित्यसंयोगविरोधः परिहरणीयः । अन्यथा तत्राप्याहवनीयस्यैष्टिकसौमिकाद्यपूर्वार्थत्वं नित्यवदाम्नातं नारिष्टहोमादिद्वारैव स्यादिति भेदनादिनिमित्तकहोमानामाहवनीयाधारत्वं न सिध्येत् । क्व तर्हि नित्यानित्यसंयोगविरोधः । यत्रानित्यमेव नित्यवदाम्नातस्य द्वारं भवति तत्रैव यथा 'भिन्ने जुहोती'ति । अत्र हि होमो भिन्नाधिकरणकस्तत्संस्कार इति पूर्वपक्षे 'भिन्न' इत्यस्य संस्कार्यपरतया निमित्तपरत्वाभावेन होमो नित्यः स्यात् । तद्द्वारं तु भिन्नमनित्यमिति नित्यानित्यसंयोगविरोधः । एतेनेदमपि निरस्तम् । नैमित्तिकस्य नित्यसामानविध्याभावो नित्यानित्यसंयोगविरोधान्नेष्यते । किंतु संस्कारः । वाक्यानामावृत्तिप्रसङ्गात् । तथा हि नित्यं नैमित्तिकं च न युगपद्विधेयं । किंतु नित्यं सोमादिद्रव्यं सामान्येन विधाय सर्वत्र तस्यैव प्राप्तौ राजन्यादिनिमित्ते सति विशेषरूपेण नैमित्तिकं फलचमसादि विधेयं । तद्यस्यां वेलायां स्वाभाविकं नित्याङ्गं विधेयं तस्यामेव संस्कारविधयस्तन्मात्रविशेषणत्वेन स्वार्थं विधाय निवृत्तव्यापारा न भूयः शक्नुवन्ति नैमित्तिकविशेषणत्वेनापि स्वार्थं विधातुमावृत्तिप्रसङ्गात् । न चैवं यवसाधारण्यसंस्कारवाक्यानामावृत्तिः प्रसज्यते । यवशास्त्रस्याप्यनैमित्तिकत्वेन व्रीहिशास्त्रसमकालप्रवृत्तिकतया व्रीहिवदेव यवानामप्यपूर्वीयत्वेन क्रोडीकारसंभवादिति । आहवनीयशास्त्रस्यापि नित्यहोमविधिसमानकालप्रवृत्तिकस्य नैमित्तिकहोमसाधारण्याभावप्रसङ्गात् । यस्यां वेलायां 'व्रीहिभिर्यजेते'ति शास्त्रं प्रवर्तते तस्यामेव वेलायां व्रीह्यादिविशेषणत्वेन संस्कारवाक्यैरवहननादीनि समर्प्यन्त इत्यभ्युपगमे तदानीं व्रीहिगतापूर्वीयत्वस्यानवगत्या व्रीहित्वेनैवावहननाद्यन्वयस्य वक्तव्यतया यवसाधारण्याभावप्रसङ्गाच्च । ननु अनुवाद्यसमर्पकशास्त्रप्रवृत्त्यनन्तरं विधेयसमर्पकशास्त्रप्रवृत्तिरिष्यते । तथा च 'यदाहवनीये जुहोती'त्यनारभ्याधीतवाक्ये नित्यनैमित्तिकात्मकस्य कृत्स्नस्यापि होमस्यानुवाद्यत्वात् नैमित्तिकहोमशास्त्राणामपि प्रवृत्त्यनन्तरमेवाहवनीयशास्त्रप्रवृत्तिरित्याहवनीयस्य नैमित्तिकहोमसाधारण्यसिद्धिः । एवं व्रीहिशास्त्रप्रवृत्त्यनन्तरमेवाहवनीयादिशास्त्रप्रवृत्तिः । ततश्च व्रीहीणामपूर्वीयत्वस्यावगतत्वादपूर्वीयत्वेनावहननान्वये व्रीहिशास्त्रसमकालप्रवृत्तिकयवशास्त्रावगतापूर्वसंबन्धानां यवानामपि क्रोडीकारादवहननादेर्यवसाधारण्यसिद्धिश्चेति

न कश्चिद्दोष इति चेत्। एवं तर्हि संस्कारवाक्येष्वपूर्वीयत्वेन व्रीहिहोमाद्यनुवादे नैमित्तिकफलचमसाद्यपूर्वीयं नैमित्तिकहोमन्यायेनानुवाद्यमिति फलचमसशास्त्रस्यापि प्रवृत्त्यनन्तरमेव क्रयादिवाक्यानां प्रवृत्तेर्वक्तव्यतया कथं क्रयादीनां फलचमससाधारण्यं न प्रसज्यते। तस्मात्संस्कारवाक्येष्वपूर्वीयत्वेन संस्कार्यानुवादे संस्काराणां फलचमससाधारण्येन विधानस्यापरिहार्यत्वात् तत्परिहाराय व्रीहित्वहोमत्वादिरूपेणैवानुवादो वक्तव्य इति नावहननस्य यवसाधारण्यमपूर्वीयत्वेनानुवादमभ्युपेत्य समर्थयितुं शक्यते। किंत्वित्थं समर्थनीयम्। पुरोडाशप्रकृतिद्रव्यत्वेन विहितानां यवानां वितुषीभावोपायापेक्षायां यथाभूतेषु व्रीहिषु तदुपायत्वेन विहितस्यावहननस्यैव ग्रहणं युक्तम्। वैदिकेषु यवेषु वैदिकस्यैव तदुपायस्य प्रत्यासन्नतया शीघ्रं बुद्धावारोहात्तद्ग्रहणेन नियमसंभवे लौकिकस्यावहननस्य नखविदलनादेरनियततदुपायस्य ग्रहणायोगाच्च। अतएवाश्वदाननिमित्तकस्य वारुणचतुष्कपालयागस्य पौण्डरीकादिषु श्रुतं वैदिकमेवाश्वदानं निमित्तं। ननु सुहृदादिभ्यः स्नेहाद्युपाधिना कृतं लौकिकमश्वदानमिति 'दोषात्त्विष्टिर्लौकिके स्याद्वैदिके न दोषः स्या'दिति पूर्वतन्त्राधिकरणनिर्णीतम्। अत एव 'पशुना यजेत' 'अक्ताश्शर्करा' इत्यादिष्वनुष्ठानाय विशेषापेक्षायां मन्त्रार्थवादसमर्पितनियतविशेषग्रहणे संभवत्याक्षेपलभ्यानियतविशेषग्रहणं न कार्यमिति छागपश्वधिकरणादिषु निर्णीतम्। एवं चावहननपेषणादेर्यवसाधारण्यपर्यवसाने भविष्यत्यपि व्रीहिमात्रे तद्विधानं लाघवार्थम्। एकत्रैव तद्विधानेऽपि ह्यपेक्षासामर्थ्यादन्यत्रापि तदुपतिष्ठत इति। यत्र त्वेकत्र विहितमन्यत्र न जिघृक्षितं तत्र निर्देशभेदेन धर्मव्यवस्था क्रियते। यथा रथंतरे प्रस्तूयमाने संमीलयेद्बृहति प्रस्तूयमाने समुद्रं मनसा ध्यायेदिति। व्यवस्थापितं च तथैव जैमिनिना—'निर्देशाद्वा व्यवतिष्ठेर'न्निति। यदि व्रीहिषु विहितमवहननं यवेषु वितुषीभावोपायतां न प्रतिपद्येत तदा वैदिकत्वेन प्रत्यासन्नमपि नियतमपि तदपहाय लौकिकमनियतमुपायान्तरं गृह्येत। यथा 'तस्मिंत्सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमानः' इति व्रीहिमयपुरोडाशप्रतिष्ठापने विनियुक्तो मन्त्रो यवमयपुरोडाशप्रतिष्ठापनोपायतां न प्रतिपद्यत इति तत्प्रकाशनार्थं लौकिक एव कल्पसूत्रादिरनियतस्तदुपायो गृह्यते। प्रतिपद्यते त्ववहननं व्रीहिष्विव यवेष्वपि वितुषीभावोपायताम्। न च व्रीहिप्रतिनिधित्वेन नीवारोपादाने नीवारपुरोडाशप्रतिष्ठापनेऽप्येवमनियतोपायान्वेषणप्रसङ्गः। न हि व्रीह्यलाभे नीवारास्साधनत्वेनोपादीयन्ते। किं तु व्रीहिसदृशेषु नीवारेष्वनुप्रविष्टा ये व्रीह्यारंभयोग्यावयवास्त एव कथंचिद्व्रीहिशास्त्रार्थसंपिपादयिषयोपादीयन्ते। ततश्च व्रीह्यभावे यवबुद्ध्योपादीयमानास्ते 'व्रीहीणां मेधे'ति मन्त्रभागेन प्रकाशयितुं योग्या एव। अत एव 'व्रीहीनवहन्ती'त्यादिसंस्कारविधीनामपि प्रतिनिधिसाधारण्यमङ्गीक्रियते। न च प्रतिनिधीनामिव यवानां व्रीहिसमानविधानत्वाभावे केवलमपेक्षामात्रेण व्रीहिधर्माणां यवेषु प्राप्त्यङ्गीकारे यवानां व्रीहिविकारत्वं स्यादिति व्रीहिमन्त्रस्य यवेषूहेन प्राप्तिप्रसङ्गः। अवहननादिवाक्यजन्यव्रीहित्वप्रकारकशाब्दबोधानन्तरं द्वितीयाश्रुतिनिर्दिष्टव्रीहिप्राधान्यनिर्वाहाय तण्डुलद्वारा दर्शपूर्णमासापूर्वोपयोगिनां व्रीहीणामवहननादिसंस्कार्यत्वमित्यवगतिकाले व्रीहिशास्त्रसमकालप्रवृत्तिकेन 'यवैर्यजेते'ति शास्त्रेणावगतं यागीयपुरोडाशसाधनभूतानां यवानामपि वि-

जादिवत्' इति, तस्याद्दृष्टफलत्वाद्युक्तं सकृदनुष्ठानम् । वेदनफलस्य साक्षात्कारस्य दृष्टत्वात् तस्याफलोदयमावृत्तिः, अवघातादिवदिति ॥

तुषीभावाद्युपायापेक्षामालोच्य संस्कारान्वये व्रीहित्वं प्रयोजककोटौ न निविष्टं । किंतूक्तरूपापूर्वोपयोगित्वमात्रमित्यवगत्युदयेन तद्वशादवहननादिसंस्कारणां यवसाधारण्यप्राप्त्या यवानां व्रीहिविकारत्वाप्रसङ्गात् । नन्वेवमुक्तरूपापूर्वोपयोगित्वमात्रं संस्कारान्वये प्रयोजकमित्येतल्लाघवादेवावगन्तुं शक्येत । व्रीहित्वस्यापि प्रवेशे गौरवं स्यात् । अतो धर्माणामपेक्षासामर्थ्यात्साधारणतायां नेदमुदाहरणमिति चेत् न । गौरवमात्रेण श्रुतव्रीहित्वपरित्यागायोगेन यवापेक्षालोचनस्यावश्यकत्वात् । एतेन तण्डुलद्वारा हविःप्रकृतित्वेन यागापूर्वोपयोगित्वस्यावहननान्वयप्रयोजकत्वे दृष्टार्थत्वमवहननस्य सिध्यति । व्रीहित्वस्य प्रयोजकत्वे त्वदृष्टार्थत्वं स्यादिति दृष्टार्थत्वलोभेनाद्यमेव प्रयोजकमभ्युपगन्तव्यं । न तु द्वितीयमपि प्रयोजककोटौ निवेशनीयमिति निरस्तम् । श्रुतानुसारेण हि दृष्टमदृष्टं वा कल्पनीयं न । त्वदृष्टार्थत्वापत्त्या श्रुतं परित्यक्तुं युक्तम् । तस्मादुक्तरीत्या यवानामवहननाद्यपेक्षयैव श्रुतस्यापि व्रीहित्वस्य संस्कारान्वयप्रयोजककोटिबहिर्भावः कल्पनीयः । एकत्र विहितमवहननादिकमपेक्षासामर्थ्यादन्यत्रापि भविष्यतीति प्रयोजककोट्यनिविष्टमपि व्रीहित्वं पुरस्कृत्यावहननादिशास्त्रं प्रवृत्तमिति कल्पनीयम् । यदित्वदृष्टार्थत्वापत्त्यैव व्रीहित्वस्य प्रयोजककोटिबहिर्भावः कल्पनीयः । तदा व्रीहिमात्रेऽपि तस्य तत एव प्रकाश्यकोटिबहिर्भावापत्त्या व्रीहिमात्रस्यापि यवसाधारण्यापत्तिरपरिहार्या स्यात् । मन्त्रेषु व्रीह्यादीनि द्रव्याण्यग्न्यादयो देवताश्चापूर्वीयाणीति हि तेनतेन पदेन प्रकाश्यंते । अत एव वैकृतेषु सूर्यादिषु नीवारादिषु चोहसिद्धिः । तस्माद्यवानामवघातेन वितुषीभावसंभवाद्वितुषीभावार्थं वैदिकेतस्मिन्नपेक्षेति तस्य यवसाधारण्यं यवप्रकाशनस्य व्रीहिमन्त्रेण व्रीहिप्रकाशनस्य वा संभवाद्वैदिकेऽपि तस्मिन्ननपेक्षेत्यपेक्षानपेक्षाभ्यामेवावघातव्रीहिमन्त्रयोर्वैषम्यं कल्पनीयम् । नचापेक्षालोचनेन साधारण्यनिर्वाहे तद्वशात्प्रोक्षणस्य यवसाधारण्यं न सिध्येदिति वाच्यम् । निर्वापावघातयोरपेक्षावशादपूर्वविशेषोपयुक्तत्वप्रयुक्ततावगमे तदुभयमध्यगतस्य प्रोक्षणस्यापि साहचर्यबलात्तत्प्रयुक्ततावगतिस्सिद्ध्यतीत्येषा दिक् । तस्मात्स्थितमेतदपेक्षावशादवहननस्य यवसाधारण्यमिति । एवमेवोपासनारूपत्वस्य विद्यान्तरसाधारण्यम् । तथा हि । विद्या साक्षात्कारद्वारा.मुक्तिफलेति कासुचिद्विद्यासु क्लृप्तत्वादितरासामपि विद्यानां तथैव दृष्टद्वारत्वे संभवति नादृष्टद्वारत्वं कल्पयितुं युक्तम् । एवं च दृष्टार्थत्वलोभादवघातस्य वितुषीभावद्वारकत्वसिद्ध्येव विद्यान्तराणां साक्षात्कारद्वारत्वसिद्ध्या तन्निर्वाहार्थमावृत्तिः कल्पनीयेति तासामावृत्तिविशिष्टत्वरूपोपासनात्मकत्वसिद्धिरिति । एवमपेक्षावशादेव यज्ञादीनां शमादीनामुद्धूलनत्रिपुण्ड्रयोराप्रायणं विद्यानुष्ठानस्य पापाशेषविनाशयोरन्येषां चैवंविधानां सर्वविद्यासाधारण्यमित्यलं विस्तरेण । अत्रावृत्तिरित्यनेनैव साध्यार्थसिद्धावसकृदिति विशेषणं यावत्फलोदयमावृत्तिर्दृष्टफलत्वादिति प्रधानहेतुसूचनार्थमुक्तम् । उपदेशादिति तदुपोद्बलकं कासुचिद्विद्यासूपासना-

सू ॥ लिङ्गाच ॥ २ ॥

अस्मिन् विषये लिङ्गं चास्ति । 'क्षेत्रज्ञस्येश्वरज्ञानाद्विशुद्धिः परमा मता । महापातकयुक्तो वा युक्तो वाऽप्युपपातकैः ॥ प्रविश्य रजनीपादं ब्रह्मध्यानं समभ्यसेत् । अध्यात्मिकान् योगाननुतिष्ठेत् ॥ रुक्माभं स्वप्नधीगम्यं विद्यात्तु पुरुषं परम् ॥' इत्यादि । अतश्च ब्रह्मवेदनस्यावृत्तिरिति ॥

इति आवृत्त्यधिकरणम् ॥ १ ॥

अथ आत्मत्वोपासनाधिकरणम् ॥ २ ॥

सू ॥ आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॥ ३ ॥

पूर्वत्र ब्रह्मण उपासनमावृत्तिमदभिहितम् । तदात्मनस्तद्भावेनोपासनमुत तदर्थान्तरत्वेनेति विचारः ॥ एवं सति 'विश्वाधिको रुद्रो महर्षिः' 'अधिकं तु भेदनिर्देशात्' इत्यादिश्रुतिसूत्रेषु प्रत्यगात्मनः पशोर्जीवात् पत्युः परब्रह्मणोऽर्थान्तरत्वेन निरूपितत्वात् सर्वज्ञत्वादिना जीवस्य ब्रह्मभावाघटनाच ब्रह्मोपासनं

रूपत्वप्रतिपादनं लिङ्गमुक्तम् ॥ सू० ॥ लिङ्गाच ॥ २ ॥ लिङ्गं स्मृतिः । श्रुत्यनुरूपकत्वात् । 'क्षेत्रज्ञस्ये'ति स्मृतावीश्वरज्ञानं सकलपापप्रायश्चित्तमुक्तम् । स्मृत्यन्तरे तस्य यामपर्यन्तानुवर्तनीयध्यानरूपत्वमुक्तम् । तथैव स्मृत्यन्तरे तस्य ज्ञानस्य योगशब्दवाच्यसमाधिरूपत्वमुक्तम् । स्मृत्यन्तरे स्वप्नधीगम्यमिति शिवस्य समाधिप्राप्यत्वमुक्तम् । सकलबाह्येन्द्रियव्यापारोपरमपूर्वकत्वसाम्यात्समाधिरेव हि स्वप्नधीशब्देन निर्दिष्टः । अध्यात्मिकानिति वृद्ध्यभावश्छान्दसः ॥

इति आवृत्त्यधिकरणम् ॥ १ ॥

अथ आत्मत्वोपासनाधिकरणम् ॥ २ ॥

सू० ॥ आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॥ ३ ॥ विद्यायास्साक्षात्कारफलार्थापत्तिप्रसूतमावृत्तिगुणकत्वमुपपादितम् । इदानीं पशुत्वनिवृत्तिरूपफलार्थापत्तिरूपं शिवोऽहमिति भावनारूपत्वमुपपाद्यत इति सङ्गतिं दर्शयति—पूर्वत्रेति । तदात्मन इति । तदुक्तं ब्रह्मकर्मकोपासनमात्मनो जीवस्य कर्तुस्तद्भावेन जीवभावेन उत तदर्थान्तरत्वेन जीवभिन्नत्वेनेति ब्रह्मणो जीवाधिकत्वोपपत्त्यनुपपत्तिभ्यां संशय इत्यर्थः । भेदनिर्देशादित्यादिशब्देन 'अधिकोपदेशात्तु बादरायणस्यैवम्' । (ब्र० ३–४–८) सुषुप्त्युत्क्र-

---

नयमणिमालायाम्

अथ आवृत्त्यधिकरणम् ॥ १ ॥

सू० ॥ आवृत्तिरसकृदुपदेशात् ॥ १ ॥ लिङ्गाच ॥ २ ॥

मुक्त्यर्थतया विहितं ब्रह्मज्ञानं सकृत्कार्यम् । भवति हि विधिशास्त्रार्थः कृत एव सकृत्कृतेऽप्यस्मिन् ॥ ३२९ ॥

आवर्तनीयमसकृत्साक्षात्कृतिरूपफलकत्वात् । अन्तर्नीतावृत्तिकतदुपास्ति······उपदेशाच ॥ ३३० ॥

इति आवृत्त्यधिकरणम् ॥ १ ॥

---

(१) 'अज्ञत्वसर्वज्ञत्वादिगुणैर्न्यूनाधिकभावस्य संप्रतिपन्नत्वाच' इति पाठान्तरम् ।

जीवस्य तद्भि(स्वभि)न्नत्वेनैव युज्यत इति पूर्वः पक्षः॥ सिद्धान्तस्तु। यद्यपि जीवाद्धिकमेव शिवाख्यं परं ब्रह्म, तथाऽप्युपासिताऽहं ब्रह्मास्मीति तदुपासीत। यतः पूर्वेऽप्युपासितारः 'त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि' इत्यात्मेत्येवावगच्छन्ति। उपासितुरर्थान्तरत्वेऽपि तानुपासितॄननुगृह्णाति स्वस्वरूपतया परं ब्रह्म। ते च पुनः स्वात्मतया ग्राहयन्ति परानपि शिष्यान् 'तत्त्वमसि' इत्यादिना।

न्त्योर्भेदेन' (ब्र० १–३–४२) इत्यादिसूत्राणि गृह्यन्ते। तद्भिन्नत्वेनैवेति। एवकारेण 'त्वं वा अहमस्मि' 'तत्त्वमसि' इत्यादिसामानाधिकरण्यनिबन्धनं पशुत्वनिवृत्तिफलार्थापत्तिनिबन्धनं चाभेदेनोपासनं व्यावर्त्यते। सामानाधिकरण्यं शरीरशरीरिभावेनोपपद्यते। पशुत्वनिवृत्तिफलकत्वं स्वशरीरकशिवोपासनायास्तादर्थ्यविधिबलेनोपपद्यत इति भावः। त्वं वा अहमस्मीति। यदि शरीरशरीरिभावनिबन्धनं सामानाधिकरण्यं तदानीमहं वै त्वमसीति निर्देश एवोपपद्यते। त्वंशब्दनिर्दिष्टे परमेश्वरे स्वशरीरकत्वपर्यन्तस्याहंशब्दस्य वृत्त्युपपत्तेः। 'त्वं वा अहमस्मी'ति निर्देशस्तु नोपपद्यते। अहंशब्दनिर्दिष्टे परमेश्वरशरीररूपे स्वस्मिन्परमेश्वरवाचिनस्त्वंशब्दस्य प्रवृत्त्यनुपपत्तेः। शरीरवाचिनां हि शरीरिपर्यन्तत्वं व्युत्पत्तिसिद्धं न तु शरीरिवाचिनां शरीरपर्यन्तत्वम्। अतः कर्मव्यतिहारेण स्वस्मिन्परमेश्वरदृष्टिः परमेश्वरे स्वदृष्टिश्च विधित्सितात्रेत्यवसीयते। ननु तथा सत्युत्कृष्टे निकृष्टदृष्टिरप्यत्र विधेया स्यात्। न चेष्टापत्तिः। 'ब्रह्मदृष्टिरुत्कर्षा'दिति न्यायविरोधात्। तस्माद्वाक्यद्वयेऽपि त्वंशब्दौ प्रस्तुतगुणविशिष्टपरमेश्वरविषयौ। अहंशब्दौ स्वशरीरकत्वविशिष्टपरमेश्वरविषयौ। अस्म्यसिशब्दौ तूद्देश्यसमर्पकाहंत्वंशब्दमात्रप्रयुक्तौ न त्वहंत्वंशब्दयोः स्वात्मपरमेश्वरत्वप्रयुक्काविति व्याख्यातुमुचितमिति चेत् मैवम्। तथा सत्येकेन वाक्येन स्वान्तर्यामिणः परमेश्वरस्य चाभेदस्य सिद्ध्या वाक्यान्तरवैयर्थ्यापत्तेः। न चाभेदप्रतिपत्तिदार्ढ्यार्थं वाक्यद्वयं तदुभयभेदभ्रान्तिवासनानुवृत्त्यभावेन तद्दार्ढ्योपादनस्य निष्प्रयोजनत्वात्। तस्मा'द्यद्वाव कं तदेव खं यदेव खं तदेव क'मित्यत्रेवात्रापि वाक्यद्वयस्य कर्मव्यतिहारेणावगतिविधानार्थत्वमेव युक्तम्। 'ब्रह्मदृष्टिरुत्कर्षा'दिति सामान्यन्यायस्तु विशेषवचनेनापोद्यते। एवं जाबालवाक्यद्वयव'त्तद्योऽहं सोऽसौ योऽसौ सोऽह' मित्यैतरेयवाक्यद्वयमप्यन्योन्याभेददृष्टिविधानपरतयैव महावाक्यविधयैवैकवाक्यत्वं नेतव्यम्। उपासितुरिति। यद्यप्युपासितुर्भिन्न एव परमेश्वरस्तथापि मान्त्रिकाद्भिन्नो गरुड इव चिरनिरंतरासेविताभेदभावनादार्ढ्यसंबन्धेन प्रातीतिकेन स्वस्वरूपत्वेनानुगृह्णाति। यथा गरुडः विषसंहरणसामर्थ्यविशेषप्रदानेन मन्त्रिणोऽनुगृह्णाति तथा परमेश्वरः पशुत्वनिवृत्तिरूपफलप्रदानेनोपासकाननुगृह्णातीत्यर्थः। तत्त्वमसीत्यादिनेति। 'तत्त्वमसी'त्यत्र त्वंशब्दनिर्दिष्टप्राग्वर्णितजगत्कारणत्वादिविशिष्टपरमेश्वराभेदो बोध्यत इत्यसिशब्दयोगादवसीयते। अतस्तत्र त्वंशब्दः संबोध्यजीवमात्रपरः न तु तदन्तर्यामिपर इत्यभ्युपगन्तव्यम्। संबोध्यं प्रति स्वात्मन इव स्वान्तर्यामिणः स्वानुभवेन वा प्राचीनोपदेशेन वा प्रसिद्धत्वाभावेन तस्य तं प्रत्युद्देश्यतानर्हत्वात् प्रकृतस्य सद्रूपस्य परमेश्वरस्य कथंचित्स्वान्तर्यामितया प्रागुपदिष्टत्वसमर्थने तत्र तद्भेदशङ्कानुदयेन तद-

निरवधिकपरमानन्दमयनिष्कलङ्कशिवत्वप्राप्तिर्हि मुक्तिः। शिवत्वप्राप्तिरात्मनः पशुत्वनिवृत्तिमन्तरेण न संभवति। पशुत्वनिवृत्तिश्च न तद्भावनां विना। अतो निरन्तरं शिवोऽहमिति भावनाप्रवाहेण शिथिलितपाशतयाऽपगतपशुभाव उपासकः शिव एव भवति। निरस्तसमस्तदोषकलङ्कशङ्कानिरतिशयमङ्गलास्पदं हि शिवत्वम्। परं ब्रह्म च तादृगेव। तद्भावनयोपासकश्च तथैव भवति। अत एव तदन्यस्य मुमुक्षुध्येयत्वं निषिध्यते। 'शिव एको ध्येयः शिवंकरः सर्वमन्यत् परित्यज्य' इत्यादिश्रुतिषु। निवृत्तब्राह्मणादिदेहाभिमानमयपशुभावस्य निरतिशयस्वरूपानन्दसाक्षिस्वप्रकाशशिवरूपपराहंभावापत्तिर्मुक्तिरिति सर्वश्रुतितात्पर्यात्। ब्रह्मभावेनोपासनमुपासकस्य मुक्तिकरम्, अन्यथा संसारानिवृत्तिरिति॥

इति आत्मत्वोपासनाधिकरणम्॥ २॥

भेदबोधनानपेक्षणात्। अतस्तत्त्वमसीतिवाक्यं स्वात्मनि ब्रह्मदृष्टिविधिपरमित्येवाभ्युपगन्तव्यम्। न च तस्य विद्याविधिपरत्वे प्रतिखण्डमभ्यासेन विद्याभेदः स्यादिति शङ्कनीयम्। प्रथमखण्ड एव स्वात्मनि ब्रह्मदृष्टौ विहितायां द्वितीयादिखण्डेषु शङ्काविशेषनिराकरणपूर्वकं तदनुवाद इति 'सैव हि सत्यादय' इ(ब्र० ३–३–३८)त्यधिकरणे समर्थितत्वात्। अनुवादश्च सद्रूपं ब्रह्मास्मीति भावनया तवापि ब्रह्मात्मता स्फुटः भविष्यतीत्येतद्दार्ढ्यार्थः। वर्तमानसामीप्ये वर्तमानार्थप्रत्ययः। तत्त्वमसीत्यादिनेत्यादिशब्देन 'स त आत्मा सर्वान्तरः' 'एष त आत्मा सर्वान्तरः' इत्यादयो गृह्यन्ते। तत्राप्यभ्यासो भावनासाध्याभेददार्ढ्यार्थः। ननु जीवब्रह्मणोर्भेदा 'दहं ब्रह्मास्मि' 'शिवोऽहमस्मि' इत्यादि भावना भ्रमरूपा स्यात्। सा कथं मुक्तिहेतुरित्याशङ्कानिराकरणायाह—**निरवधिकेति**। यथा कीटस्य कीटत्वनिवृत्तिपूर्वकभ्रमरत्वप्राप्तिर्भ्रमराहंभावसाध्या एवं पशोः पशुत्वनिवृत्तिपूर्वकनिरस्तसमस्तदोषकल्याणगुणाविर्भावरूपशिवत्वप्राप्तिश्शिवाहंभावसाध्येति 'देवो भूत्वा देवानप्येती'ति श्रुतेरवसीयते। न च श्रुतिप्रतिपन्नेऽर्थे काचिदनुपपत्तिरिति भावः। **तथैव भवतीति**। अनादिशिववत्तदभेदभावनया तद्वत्स्वयमपि शिव एव भवतीत्यर्थः। **अत एवेति**। यतश्शिवाभेदभावनयैव शिवत्वप्राप्तिः न तु शिवेतरभावनया अत एवेत्यर्थः॥

इति आत्मत्वोपासनाधिकरणम्॥ २॥

नयमणिमालायाम्

अथ आत्मत्वोपासनाधिकरणम्॥ २॥

सू०॥ आत्मेति तूपगच्छन्ति ग्राहयन्ति च॥ ३॥

विदुषां ब्रह्मोपास्यं स्वस्मादर्थान्तरत्वेन। भिन्नं हि जीववर्गाद्विश्वाधिकमीश्वराख्यं तत्॥ ३३१॥

भिन्नमपि ह्यात्मतया तिष्ठति जीवेषु भिन्नमेवोपास्यम्। ग्रहणाग्रहणरीतिरुदिता पूर्वेषामपि सदेव मुदिता श्रुतिषु॥ ३३२॥

इति आत्मत्वोपासनाधिकरणम्॥ २॥

अथ प्रतीकाधिकरणम् ॥ ३ ॥

विशेषमाह—

सू ॥ न प्रतीके न हि सः ॥ ४ ॥

'मनो ब्रह्मेत्युपासीत' इत्यादिश्रुतिषु मनःप्रभृतिषु ब्रह्मोपासनमवगम्यते । तेष्वप्यात्मत्वेनोपासनमुत भिन्नत्वेन, इति संशये पूर्वपक्षः । 'मनो ब्रह्मेत्युपासीत' 'आदित्यो ब्रह्मेत्युपासीत' इत्यादिना सिद्धेषु प्रतीकोपासनेषु ब्रह्मदृष्ट्या संस्कृतं मनःप्रभृतिकमुपास्यमवगम्यते । अतः प्रतीकमुपासकेन ब्रह्मतया भावितमित्यात्मतया तदुपासने को विरोध इति प्राप्त उच्यते । नात्मग्रहणं प्रतीकेषु हि न परं ब्रह्मोपास्यम्, किंतु ब्रह्मदृष्ट्या मनःप्रभृतिकमुपास्यम् । तत्र मनआदिविशिष्टस्य ब्रह्मण एवोपास्यत्वेपि मनआदेर्ब्रह्मगुणत्वाभावात् विकारत्वेन

अथ प्रतीकाधिकरणम् ॥ ३ ॥

उत्तराधिकरणमवतारयति—विशेषमाहेति । कासुचिद्विद्यासु शिवाभेदभावनाया अपवादमाहेत्यर्थः । सू० ॥ न प्रतीके न हि सः ॥ ४ ॥ 'मनो ब्रह्मे'त्यादिवाक्यैर्मनआदिषु ब्रह्मदृष्टिर्विधीयते न तु ब्रह्मणि मनआदिदृष्टिरित्युत्तराधिकरणे वक्ष्यते । तत्र किं मनआदिषु प्रतीकेषु ब्रह्मबुद्धिविषयत्वाद्ब्रह्मणीव स्वात्मदृष्ट्याप्युपासनं कार्यमुत यथाविधि ब्रह्मदृष्टिमात्रेणेति संशये पूर्वपक्षः । पूर्वाधिकरणे हि ब्रह्मदृष्ट्योपास्यमानः स्वात्मा उपासकं प्रति ब्रह्मत्वेनावभासत इत्युक्तम् । एवं ब्रह्मदृष्ट्योपास्यमाना मनआदयोऽपि ब्रह्मत्वेनावभासेरन् । तथावभासमानेषु च स्वात्मदृष्टिः कर्तुमुचिता । यथा ब्रह्मणि । तस्मात्प्रतीकोपासनेष्वपि स्वात्मदृष्टिः प्रवर्तत इति । सिद्धान्तस्तु ब्रह्माहमितिवत् मनआदिकमहमित्याहत्य न श्रूयते । अर्थान्मनआदौ ब्रह्मत्वेनावभानात्स्वात्मदृष्टिरापतति चेदापततु नाम । नैतावता तेषु ब्रह्मदृष्टिविधिः स्पृष्टो भवति । न हि तपस्यतोऽर्थात्क्लेशो भवतीति, सोऽपि विधेयः । किंतु यदर्थादापतद्विध्यन्तराकांक्षितं तदेव विधेयम् । यथेष्टकाकरणकस्थण्डिलनिर्वृत्तिविध्याद्याकांक्षितमिष्टकोपधानादिकम् । न चेह श्रुताया ब्रह्मदृष्टेः स्वात्मदृष्ट्यभावेऽनुपपत्त्या तदाकांक्षास्ति येन स्वात्मदृष्टिरपि विधिस्पृष्टा भवेत् । तस्माद्यथाविधि ब्रह्मदृष्टिमात्रेण मनआदिप्रतीकोपासना कार्या । यदि 'मनो-ब्रह्मे' त्याद्युपासनासु मनआदिदृष्ट्या ब्रह्मैवोपास्यं तथापि न स्वात्मदृष्टिविधिः सिध्यति । तदा हि ब्रह्म मनआदिविकारात्मनैवावभासेत । न च विकारतयावभासमानं स्वात्मतयोपासितुमर्हम् । स्वात्मनोऽपि विकारित्वावभासप्रसङ्गात् । अत उभयथापि प्रतीकोपासनेषु न स्वात्मदृष्टिः प्रवर्तते । वस्तुतस्तु वक्ष्यमाणाधिकरणरीत्या मनआदिष्वेव ब्रह्मदृष्टिर्विधेया । सा च, मनआदीनां ब्रह्मणश्च न भेदावभासविरोधिनी । काम्याना प्रतीकोपासनानां साक्षात्कारपर्यन्तत्वाभावेन भावनाप्रकर्षकृताभेददार्ढ्यानपेक्षणात् । अत एव तासां यथाकामं समुच्चयोऽपि प्राक्प्रतिपादितः । तस्मादवभासतोऽपि मनआदीनां ब्रह्मभावाभावादर्थादपि तेषु न स्वात्मदृष्टिरापततीति तत्त्वम् । सूत्रस्य मनआदौ

तद्विशिष्टे ब्रह्मणि नात्मग्रहणम् । किंतु सत्यसंकल्पत्वादिविशिष्टे । अन्यथा स्वात्मनोऽपि विकारास्पदत्वं स्यात् । अतः प्रतीके नात्मग्रहणमुपासकानाम् । न हि तत्र परमेश्वरः साक्षादुपास्य इति ॥

इति प्रतीकाधिकरणम् ॥ ३ ॥

अथ ब्रह्मदृष्ट्यधिकरणम् ॥ ४ ॥

सू ॥ ब्रह्मदृष्टिरुत्कर्षात् ॥ ५ ॥

प्रतीकोपासने मनआदित्यादिप्रतीके ब्रह्मदृष्टिरुपासकेन कर्तव्या, उत ब्रह्मणि

प्रतीके स्वात्मदृष्टिर्न कार्या । न हि प्रतीको वस्तुतः परमेश्वरः । परमेश्वरत्वाभावे च परमेश्वरत्वभावनाप्रकर्षवशादर्थादापतन्त्यपि स्वात्मदृष्टिर्विध्यनाकाङ्क्षितत्वान्न विधिविषय इति सैद्धान्तिके प्रथमप्रकारेऽर्थः । द्वितीयप्रकारे तु प्रतीकोपासनेषु परमेश्वरस्यैव मनआदिदृष्ट्योपास्यत्वेऽपि स्वात्मदृष्टिस्तस्मिन्न कार्या । न हि तथोपासितुरुपास्यः परमेश्वरतयावभासेत । किंतु भावनाप्रकर्षवशात्स मनआदिविकाररूपतयैवेति न स्वात्मदृष्टिः कर्तुमुचितेत्यर्थः । वस्तुगतिमवलंब्य प्रकारद्वयोपमर्देन प्रवृत्ते तृतीये तु प्रकारे प्रतीके मनआदौ स्वात्मदृष्टिर्न कार्या । न हि तत्रोपास्यः प्रतीकोऽवभासतोऽपि परमेश्वरप्रतीकोपासनेषु साक्षात्कारपर्यन्तभावनाप्रकर्षाभावेन भेदावभासानुवृत्तेः विधिबलादाहार्यारोपरूपस्य परमेश्वरदृष्टिमात्रस्य भेदावभासाविरोधित्वादिति प्रथमप्रकारोपमर्दोपयोग्यर्थः प्रतीकोपासनेषु स्वात्मदृष्टिर्न कार्या । न हि तत्र परमेश्वरः साक्षादुपास्यः परमेश्वरदृष्टिसंस्कृतस्य मनआदेरेव साक्षादुपास्यत्वात् । यत्र विशेषणतयान्योपसर्जनत्वं विना परमेश्वरस्य साक्षादुपास्यत्वं तत्रैव व्यतिहारेणोपासनचोदनादित्यर्थः । भाष्ये संशयवाक्यगतस्य तद्भिन्नत्वेनेत्यस्य स्वात्माभेददृष्टिमन्तरेणेत्यर्थः । न हि प्रतीकेषु स्वात्मभिन्नत्वमप्युपास्यमविधानात् ॥

इति प्रतीकाधिकरणम् ॥ ३ ॥

अथ ब्रह्मदृष्ट्यधिकरणम् ॥ ४ ॥

ननु मनआदेरसाक्षादुपास्यत्वमसिद्धं । 'मनो ब्रह्मे'त्यादिसामानाधिकरण्यस्योभयथापि संभवात् । उभयथा संभवे च फलप्रदानसमर्थस्य ब्रह्मण एवोपासनाभिराराधनीयत्वे विधितात्पर्यकल्पनं युक्तं न तु तदसमर्थस्य मनआदेः । तथा च 'मनो ब्रह्मे'त्यादिषु ब्रह्मण एव साक्षादुपास्यत्वात्तत्र मनआद्यभेदभावनाप्रकर्षाभावेन विकारत्वाप्रसक्तेश्च स्वात्मदृष्टिः कार्यैवेति पूर्वाधिकरणाक्षेपसमाधानार्थमधिकरणान्तरं प्रवर्तते । सू० ॥ ब्रह्मदृष्टिरुत्कर्षात् ॥ ५ ॥ स्पष्टोऽधिकरणार्थः । ननु प्रतीकोपासनं मनआदिविषयमिव

नयमणिमालायाम्

अथ प्रतीकाधिकरणम् ॥ ३ ॥

सू० ॥ न प्रतीके न हि सः ॥ ४ ॥

एवं स्वात्मत्वमतिः कार्या मनसि प्रतीकेऽपि । तत्र·········द्वारापि कलयितुं युक्तम् ॥ ३३३ ॥

तत्र मनो यद्युपास्यं ब्रह्मेति ब्रह्म मन इति वा । द्वेधापि स्वात्मतया नोपास्यं तद्विकारत्वात् ॥ ३३४ ॥

इति प्रतीकाधिकरणम ॥ ३ ॥

तद्दृष्टिः । इति सन्देहे पूर्वः पक्षः । मनआदिदृष्टिं ब्रह्मणि कृत्वा ब्रह्मोपासनीयम्, तस्यैव फलदातृत्वात् ॥ इत्येवं प्राप्त उच्यते । 'विश्वाधिको रुद्र' इत्यादिषु ब्रह्मण उत्कृष्टत्वावगमात् तद्दृष्टिरेव निकृष्टेषु मनआदिषु कर्तव्या । लोके हि निकृष्टे भृत्यादौ राजदृष्टिं कृत्वा राजवत् तमुपासते । न तु भृत्यदृष्टिं कृत्वा राजानमुपासते केचिदपि । इदमेव च परमौचित्यं यदुत्कृष्टं वस्तु तदेव सर्वे नमन्ति । अतः परं ब्रह्म सर्वोत्कृष्टतयैव सर्वनमस्कारविषयोऽवगम्यते । 'ऋतं सत्यम्' इति मन्त्रे उक्तविशेषणविशिष्टं यत् परं ब्रह्म, 'विश्वरूपाय तस्मा एव नमः' सर्वोऽपि नमस्कारः, नान्यस्मै क्वचिदपीति ॥ किंचास्य परब्रह्मण उत्कृष्टतयैव नमस्कारविषयत्वं लक्षणमुक्तम् । तथा हि तैत्तिरीयश्रुतौ 'यस्मै नमस्तच्छिरो धर्मो मूर्धानं ब्रह्मोत्तरा हनुर्यज्ञोऽधरा विष्णुर्हृदयं संवत्सरः प्रजननम्' इत्यादिना शिंशुमारात्मनिरूपणे हृदयादिरूपेभ्यो विष्ण्वादिभ्यः पार्थक्येन सर्वोत्कृष्टत्वादेवास्य परब्रह्मणः शिवस्य प्रधानशिरोरूपत्वं 'यस्मै नमस्तच्छिरः' इति नमस्कारविषयत्वेन लक्षणेनैवानूद्याभिहितम् । अवसाने च 'त्वं भूतानामधिपतिरसि त्वं भूतानां

विरिञ्चनारायणादिविषयमपि श्रुतिस्मृतीतिहासादिषु प्रसिद्धम् । तत्र किं विरिञ्चादय उत्कृष्टाः किंवा परब्रह्मत्वाभिमतः परमशिव इत्यनवधारणादुपास्यानिर्धारणं प्राप्नुयादित्याशंक्य स्थापितेऽपि बहुभिः प्रकारैः शिवस्य सर्वोत्कृष्टत्वे प्रकारान्तरेणापि तस्य तद्व्यवस्थापयितुमुपक्रमते—इदमेव च परमौचित्यमिति । नान्यस्मै क्वचिदपीति । यथाख-'त्विमा रुद्राय स्थिरधन्वने गिर' इति मन्त्रः शिवस्य सकलश्रुतिस्मृतीतिहासपुराणादिपरतत्त्वविषयशब्दजालतात्पर्यपर्यवसानभूमित्वं 'स्मृतयश्च पुराणानि भारतादीनि सत्तम । शिवमेव सदा सांबं हृदि कृत्वा ब्रुवन्ति ही'ति पुराणोपबृंहितं प्रतिपादयति । एवं 'विश्वरूरूपाय वै नम' इति मन्त्रः तस्य सर्वनमस्कारपर्यवसानभूमित्वं प्रतिपादयतीत्यन्यत्रैव पर्यवसितः कोऽपि नमस्कारो नास्तीत्यर्थः । किंचेति । तैत्तिरीयारण्यके ध्यानार्थं शिंशुमारशरीरकतया परमात्मप्रतिपादने कासांचिद्देवतानां तदीयशिरोमूर्धहनुद्वयहृदयमध्यचरणचतुष्टयपुच्छरूपसप्तावयवतया निरूपणं कृतम् । तत्र विष्ण्वादयः स्वस्वनामभिर्निर्दिष्टाः शिवस्तु नमस्कारविषयत्वेन धर्मेण निर्दिष्टः । तेन नमस्कारविषयत्वं शिवस्यासाधारणं लक्षणं विवक्षितमित्युन्नीयत इति भावः । ननु नमस्कारविषयत्वेन निर्दिश्य शिरोरूपप्रधानावयवत्वेन रूपितः शिव इति कथं ज्ञायते येन तस्य तल्लक्षणं विवक्षितमित्युन्नीयेतेत्याशङ्कायामाह—अवसाने चेति । उपसंहारे भूतपतित्वेन 'श्रेष्ठो जातस्य रुद्र श्रियासी' दित्यादिमन्त्रप्रतिपन्नेन श्रेष्ठत्वेन च लिङ्गेन शिवं प्रस्तुत्य 'नमस्त' इति नमस्कारसामान्यस्य तदीयत्वमुक्त्वा तद्विवरणेनोक्तार्थदृढीकरणाय 'नमस्सर्वत' इति सर्वस्यापि नमस्कारस्य तदीयत्वमुक्तम् । तेन प्रागपि नमस्कारविषयत्वेन निर्दिष्टः शिव एवेति निश्चीयते । 'नमस्सर्वत' इत्युपसंहारे यस्य सर्वनमस्कारपर्यवसानभूमित्वं वक्ष्यते 'तच्छिर' इति । एतदर्थपरत्वादुपक्रमवाक्यस्य संभावितशिवसमानोत्कर्षयोर्विष्णुप्रजापत्योः 'विष्णुर्हृदयमग्निः पुच्छस्य प्रथमं काण्डं तत इन्द्रस्ततः प्रजापतिरिति पृथग्ग्रहणेन च तथा निश्चीयत इति भावः । शिंशुमाराकृतिस्तु सर्वोपादानभूता शैवी चिच्छक्तिः । तदाधारत्वेन प्रधा-

श्रेष्ठोऽसि' इत्यस्यैव सर्वभूतविषयमाधिपत्यं श्रेष्ठत्वं चोक्त्वा 'नमस्ते नमः सर्वं ते नमः' इति सकलभूतोत्कृष्टत्वात् सिद्धमखिलनमस्कारपर्यवसानभूमित्वमुक्तम्। सर्वत्र च 'नमस्ते रुद्र मन्यवे' इत्यादिषु सर्वोत्कृष्टतयैव पुनः पुनरस्मै नमः प्रयुज्यते। ऐश्वर्यादिना हि लोकेऽधिकं नमन्ति। ततः सर्वनमस्कारविषयतया सर्वोत्कृष्टमुमासहितं विरूपाक्षमीश्वरशब्दैकविषयभूतं परं ब्रह्म। अस्य सर्वोत्कृष्टस्य सर्वनमस्कार्यस्य व्याप्तिदृष्ट्या सर्वेषां मनआदित्यादीनां प्रतीकानामुपास्यत्वम्। अत एव 'श्वभ्यः श्वपतिभ्यश्च वो नमः' इत्यादिषु श्वादिष्वत्यन्तनिकृष्टेष्वपि सर्वोत्कृष्टब्रह्मव्याप्तिदृष्ट्या श्रुतिर्नमः प्रयुङ्क्ते। तस्मादुत्कृष्टसंबन्धान्निकृष्टेषूपचारदर्शनात् विश्वाधिकब्रह्मदृष्ट्या मनः प्रभृतीनामुपास्यत्वं सिद्धम्॥

इति ब्रह्मदृष्ट्यधिकरणम्॥ ४॥

नतया शिवस्य शिरस्त्वेन निरूपणमग्रे नमस्कारश्च। वैदिकेषु शिवमन्त्रेषु नमस्कारभूयस्त्वमपि तस्य सर्वोत्कर्षे लिङ्गमित्याह—**सर्वत्र** चेति। ननूत्कर्षादिव भयादपि लोके नमस्कारो दृश्यते श्रुतावपि दृश्यते 'नमस्ते अस्तु मा मा हिंसी'रिति। अतश्शिवे नमस्कारभूयस्त्वं तस्योग्रत्वेन भयभूयस्त्वादुपपन्नमित्याशङ्क्याह—**ऐश्वर्यादिने**ति। भयादपि नमस्कारः श्रुतौ नोत्कर्षं विना प्रवर्तते 'नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्चिषे। अन्यं ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यं शिवो भवे'ति मन्त्रे 'नमस्ते अस्तु मा मा हिंसी'रित्येतत्समानविषय एव श्रुतस्य नमस्कारस्य 'नमस्ते हरसे शोचिषे' इत्यूहे 'नमस्कृत्य हि वसीयांसमुपचरन्ती'ति तन्मन्त्रब्राह्मणेनौत्सर्गिकस्वविषयोत्कर्षप्रयुक्तत्वाख्यागोक्तेः श्रुतौ केवलं भयप्रयुक्तस्य नमस्कारस्य संभवेऽपि नमस्कारभूयस्त्वस्य भयभूयस्त्वोज्ञापकतयैव सर्वोत्कर्षज्ञापकत्वस्यापरिहार्यत्वाच्च। महाभयहेतुत्वं हि परब्रह्मलिङ्गं 'भीषास्माद्वातः पवते, महद्भयं वज्रमुद्यत' मित्यादिश्रवणादिति भावः। यदुक्तं ब्रह्मण एव फलदातृत्वादुपास्यत्वं युक्तमिति तत्राह—**अस्य सर्वोत्कृष्टस्ये**ति। मनआदीनामपि परमेश्वररूपत्वप्रयुक्तस्योपास्यत्वप्रयोजकस्योत्कर्षस्य सत्त्वात्तेषां ब्रह्मदृष्ट्योपास्यत्वं युक्तम्। तद्रूपत्वप्रयुक्तोत्कर्षादेव हि हीनजातीनामपि नमस्कार्यत्वम्। अतः प्रतिमार्चनयैव प्रीतः परमेश्वर एव फलं ददातीति भावः। अस्मिन्पूर्वपक्षयुक्तिनिराकरणेऽपि सूत्रमावृत्त्या योजनीयम्। मनआदिषु ब्रह्मदृष्टिः कर्तव्या। तेष्वपि ब्रह्मरूपप्रयुक्तस्य प्रतिमादिष्विवोपास्यत्वप्रयोजकस्योत्कर्षस्य सत्त्वादिति॥

इति ब्रह्मदृष्ट्यधिकरणम्॥ ४॥

नयमणिमालायाम्

अथ ब्रह्मदृष्ट्यधिकरणम्॥ ४॥

सू०॥ ब्रह्मदृष्टिरुत्कर्षात्॥ ५॥

तत्र मनो दृष्ट्या स्याद्ब्रह्मोपास्यं फलप्रदायित्वात्। फलदातुरुपास्यत्वे युक्तास्य तद्विशेषणता॥ ३३५॥

उत्कृष्टधीर्निकृष्टे लोकन्यायात्फलाय स्यात्। सर्वोत्कृष्टब्रह्ममतिर्मनसि कर्तव्या॥ ३३६॥

इति ब्रह्मदृष्ट्यधिकरणम्॥ ४॥

अथ आदित्यादिमत्यधिकरणम् ॥ ५ ॥

सू ॥ आदित्यादिमतयश्चाङ्ग उपपत्तेः ॥ ६ ॥

पूर्वत्र ब्रह्मण उत्कृष्टत्वादादित्यादिषु तद्दृष्टिरुपासनेऽभिहिता 'य एवासौ तपति तमुद्गीथमुपासीत' इत्यादिषु कर्माङ्गोपासनेषूद्गीथादिदृष्टिरादित्यादिषु कार्या, उत विपर्यासेनैव इति संशयः ॥ किं तावत् प्राप्तम्? उद्गीथादीनामादित्यादीनां च कर्माङ्गत्वब्रह्मरूपत्वाविशेषादनियम इति। एवं प्राप्ते ब्रूमः। आदित्यादेः कर्माराध्यत्वेनोत्कृष्टत्वात् कर्माङ्गे उद्गीथादौ तद्दृष्टिः कार्या तद्दृष्टिसंस्कृतस्योद्गीथादिकर्मणः फलातिशयसंभवात्। यत् खलु स्वतो वीर्यवत् क्रियमाणं च, तस्यैव विद्यया संस्कृतस्य वीर्यवत्तरत्वरूपफलातिशयः 'यदेव विद्यया करोति

अथ आदित्यादिमत्यधिकरणम् ॥ ५ ॥

सू० ॥ आदित्यादिमतयश्चाङ्ग उपपत्तेः ॥ ६ ॥ सङ्गतिं दर्शयति—पूर्वत्रेति। उत्कृष्टदृष्ट्यापकृष्टमुपासनीयमित्युक्तम्। एवं सति 'य एवासौ तपती'त्यादौ उत्कर्षप्रयोजकमेकरूपमिति तत्रानवधारणं स्यात्। तत्र यद्वृत्तयोगप्राथम्यानुसरणे त्वादित्यादिदृष्टिरेवोद्गीथादिषु कार्येति विपर्यासेनोपासना स्यादित्याक्षिप्यत इति सङ्गतिरिति भावः। अनियम इति। यद्वृत्तयोगप्राथम्यानुसरणे तु विपर्यासेनोपासना स्यादिति शेषः। एवं पूर्वपक्षपर्यवसानमभिप्रेत्यैव संशयवाक्ये कोटिद्वयमवधारणेन दर्शितम्। कर्माराध्यत्वेनेति। तथा च कर्माङ्गत्वे समानेऽपि देवताधिकरणन्यायादाराध्यत्वेनोत्कर्षोऽस्तीत्यर्थः। 'नन्वभिमन्थति स हिङ्कारो धूमो जायते स प्रस्तावो ज्वलति स उद्गीथोऽङ्गारा भवन्ति स प्रतिहार उपशाम्यति तन्निधनमुपमन्त्रयते स हिङ्कारो ज्ञपयते स प्रस्तावः स्त्रिया सह शेते स उद्गीथः प्रतिस्त्रि सह शेते स प्रतिहारः कालं गच्छति तन्निधन' मित्येतदादिषु रथन्तरवामदेव्यादिगतहिङ्काराद्यनुबन्धिनीषूपासनासु देवतात्वप्रसिद्धिरहितानामभिमन्थनादीनां न कर्माराध्यत्वेनोत्कर्ष उपपादयितुं शक्यते। आदित्यादीनामप्युद्गीथादिवत्सर्वसोमयागसाधारण्येन कर्माङ्गत्वं न वक्तुं शक्यते दूरे तत्तत्कर्माराध्यत्वं तथाप्यादित्यादिपदप्राप्तेः कर्मफलत्वात्कर्मफलरूपतयादित्यादीनामुत्कर्षः स्यादिति न वाच्यम्। यज्ञादिसिद्धेरपि पुण्यफलत्वेन तस्योद्गीथादिसाधारण्यादित्यनुशयादुत्कर्षहेतुमपहा'योपपत्ते'रिति सौत्रहेतुमुपादत्ते—तद्दृष्टिसंस्कृतस्येति। ननूद्गीथादिकं कर्माङ्गत्वेन वीर्यवत्साध्यरूपतया क्रियमाणं चावगतमिति तस्य विद्यया क्रियमाणत्वनिर्देशस्तया क्रियमाणस्य वीर्यवत्तरोक्तिश्च युज्यत इति तत्रोद्गीथ उपास्य इति सिध्यतु नाम न तावता 'य एवासौ तपती'त्यादिष्वादित्यादिदृष्ट्योद्गीथ उपास्य इत्येतदपि सिध्यति। 'यदेव विद्यये'त्यस्य प्रकृताप्त्यादिगुणकोद्गीथविद्यामात्रविषयत्वस्य, 'असार्वत्रिकी'ति सूत्रवर्णितत्वात्। तस्यामादित्यादिसामानाधिकरण्याश्रवणेनाप्त्यादिगुणक उद्गीथ एवोपास्य इत्यर्थस्यासन्दिग्धत्वेन तदर्थमधिकरणानपेक्षणात् 'यदेव विद्यये'त्यस्य प्रकृतमुद्गीथमाश्रित्य विधीयमानासु सर्वास्वपि विद्यासु साधारण्येऽपि 'समस्तस्य खलु साम्न उपासनं साध्वि'त्यादिना विधीयमानासु

तदेव वीर्यवत्तरं भवति' इति वाक्यादवगम्यते। एवं च ब्रह्मात्मत्वादिसाम्येऽप्युद्गीथादिक्रियाचोदनादुद्गीथादेः क्रियमाणत्वेन फलसाधनत्वात् तद्विपरीतसिद्धस्वभावादादित्यादेस्तथा फलसाधनत्वाभावादादित्यादिदृष्टिरुद्गीथादिष्वङ्गेष्विति निर्णयः ॥

इति आदित्यादिमत्यधिकरणम् ॥ ५ ॥

अथ आसीनाधिकरणम् ॥ ६ ॥

सू ॥ आसीनः संभवात् ॥ ७ ॥

उपपादितमुपासनाव्यवस्थापनम्। तदिहोपासनस्यासननियमोऽस्ति न वेति संशयः ॥ क्वचिदपि 'आसीन उपासीत' इति नियमाश्रवणान्मानसव्यापाररू-

---

पञ्चविधसामाद्युपासनासु साधारण्याभावेन न तास्वनेन न्यायेन सामावयवा लोकावयवदृष्ट्योपास्या इति निर्णयस्सिध्यति। एवमुद्गीथादेस्साध्यस्य फलसाधनत्वं युक्तं न सिद्धस्वभावस्यादित्यादेरिति न्यायेनापि निर्णयस्सिध्यति। 'अभिमन्थति स हिङ्कारः उपमन्त्रयते स हिङ्कारः अभ्राणि संप्लवन्ते स हिङ्कारः' इत्यादिषु कर्माङ्गसमानाधिकरणस्यापि क्रियारूपत्वात्सर्वत्राप्युपासनायाः क्रियारूपत्वाच्च। अक्रियारूपत्वेऽपि गोदोहनादिवत्क्रियानुरागेण फलसाधनत्वसंभवाच्चेत्यनुशयादङ्गपदसमभिव्याहृतेन 'उपपत्ते'रिति सौत्रपदेन दर्शितं हेतुतयाविष्करोति—अङ्गेष्विति। अङ्गानङ्गसमभिव्याहारवतीनां विद्यानामङ्गेष्वनङ्गदृष्टिरूपत्वे प्रधानकर्मप्रयुक्ताङ्गाश्रयत्वात्स्वतन्त्रफलानामपि तासां पृथक्प्रयुक्तिर्न कल्प्येति प्रयुक्तिलाघवं लभ्यते। वैपरीत्ये तु प्रयुक्त्यन्तरकल्पनागौरवं भवेदिति लाघवन्यायोऽत्र विवक्षितः। 'य एवासौ तपति पृथिवी हिङ्कार' इत्यादिषु यद्वृत्तप्राथम्यादिकं त्वप्रयोजकम्। उद्गीथमुपासीत समस्तस्य खलु साम्न उपासनं साध्विति ततः प्रागेव कर्माङ्गविषयत्वेनोपासनोपक्रमादित्याशयः ॥

इति आदित्यादिमत्यधिकरणम् ॥ ५ ॥

अथ आसीनाधिकरणम् ॥ ६ ॥

सू० ॥ आसीनः संभवात् ॥ ७ ॥ अवसितमहंग्रहप्रसक्तानुप्रसक्तम्। परविद्याविषय एव विचारोऽनुवर्तते। परविद्यानां प्रधानफलार्थापत्तिमूलावावृत्त्यहंग्रहगुणौ विचारितौ। इदानीमङ्गफलरूपप्रधानोपकारार्थापत्तिमूलोऽङ्गविशेषश्चिन्त्यते। यद्यपि शमादीनामपि सर्वविद्यासाधरण्यं प्रधानोपकारार्थापत्तिमूलम्। तथापि तेषां चिन्तनं सङ्गति-

---

नयमणिमालायाम्

अथ आदित्यादिमत्यधिकरणम् ॥ ५ ॥

सू० ॥ आदित्यादिमतयश्चाङ्ग उपपत्तेः ॥ ६ ॥

आदित्ये वोद्गीथस्समुपास्यस्तत्र वादित्यः। स्यादुभयोरपि कर्माङ्गब्रह्मरूपतादिगुणैः ॥ ३३७ ॥
प्राप्यत्वेनादित्यः फलरूपत्वाद्धि देवतात्वाच्च। उद्गीथादुत्कृष्टस्तस्मात्तद्दृष्टिरुद्गीथे ॥ ३३८ ॥

इति आदित्यादिमत्यधिकरणम् ॥ ५ ॥

पस्योपासनस्य सर्वावस्थायामपि संभवान्नास्त्यासननियम उपासकस्येति पूर्वः पक्षः ॥ सिद्धान्तस्तु । आसीन एव ब्रह्मोपासीत, तस्यैवैकाग्र्यसंभवात् । अस्ति चासननियमश्रुतिरपि—'विविक्तदेशे तु सुखासनस्थः शुचिः समग्रीवशिरःशरीरः । अन्त्याश्रमस्थस्सकलेन्द्रियाणि निरुध्य भक्त्या स्वगुरुं प्रणम्य ॥ हृत्पुण्डरीकं विरजं विशुद्धं विचिन्त्य मध्ये विशदं विशोकम् । अनन्तमव्यक्तमचिन्त्यरूपं शिवं प्रशान्तममृतं ब्रह्मयोनिम् । तथाऽऽदिमध्यान्तविहीनमेकं विभुं चिदानन्दमरूपमद्भुतम् । उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम् ॥ ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात् ।' इति कैवल्योपनिषदि । अत आसीन एव ब्रह्मोपासीतेति ॥

सू ॥ ध्यानाच्च ॥ ८ ॥

'ध्यात्वा मुनिर्गच्छति भूतयोनिम्' 'कारणं तु ध्येयः सर्वैश्वर्यसंपन्नः सर्वेश्वरः शम्भुराकाशमध्ये' 'ध्याननिर्मथनादेव' इत्यादिश्रुतौ पाशविच्छेदकारणस्योपास-

---

विशेषेण तृतीयाध्याये निर्वृत्तमिति परिशिष्ट आसननियमोऽत्र विचार्यते । परविद्यास्वासननियमोऽस्ति नवेति नियामकसदसद्भावाभ्यां संशये नियमकारिणः शास्त्रस्याभावान्नास्तीति पूर्वः पक्षः । न च 'विविक्तदेशे तु सुखासनस्थ' इति शास्त्रं नियामकम् । दहरविद्याप्रकरणाम्नाते तेन सर्वविद्यासाधारणस्यासननियमस्यासिद्धेः । न 'चोपविश्यासने युञ्ज्या'दिति स्मरणं नियामकम् । तस्यापि मूलश्रुत्यनुसारेण दहरविद्यामात्रौचित्यात् । अन्यथा साधारणमूलश्रुतिकल्पनागौरवापत्तेः । न चैकाग्र्यरूपोपकारापेक्षया श्रुतिस्मृत्योस्सर्वविद्यासाधारण्यं कल्पनीयम् । विनाप्यासनं ब्रह्मनिष्ठतोपयोगिचित्तैकाग्र्यसंभवात् । अन्यथा मौनाख्यं सहकार्यन्तरं गच्छतस्तिष्ठतो निविष्टस्य शयानस्य च कथमुपपद्येत । न चोपासना निरन्तरानुस्मृतिरूपा अधिकं चित्तैकाग्र्यमपेक्षत इति वाच्यम् । अङ्गावबद्धोपासनावदासननियमाभावेऽप्युपासनोपयोगिचित्तैकाग्र्योपपत्तेः । नह्यङ्गावबद्धोपासनासु ऋत्विक्कर्मस्वासननियमः कर्तुं शक्यते । तथैव परविद्यास्वपि नास्त्यासननियम इति । सिद्धान्तस्तु । अस्ति परविद्यास्वासननियमः । आसीनस्यैव चित्तैकाग्र्यसंभवात् । केषांचिदनासीनानामपि कथंचिच्चित्तैकाग्र्यसंपादनसंभवेऽपि दहरविद्यायामासननियमस्य चित्तैकाग्र्यरूपदृष्टार्थत्वेन विद्यान्तराणामपि चित्तैकग्र्यापेक्षायां 'विविक्तदेशे तु सुखासनस्थ' इति तत्र क्वचिद्वेदविहितस्यैव तदुपायस्य ग्रहीतुमुचितत्वात् । येषामुपासकानां रोगवार्धकादिभिरासने न शक्तिस्तेषामपि भित्त्याद्याश्रयणेनासननियमनिर्वाहोपपत्तेः । अङ्गावबद्धोपासनास्वार्त्विज्यानुसारेणासननियमाभावेऽपि परविद्यासु क्वचिद्वैदिकोपायत्वेन क्लृप्तस्यासननियमस्य त्यागायोगात् । अत्यन्ताशक्तावारब्धकाम्यवदाप्रायणमारब्धाया विद्याया यथा कथंचिन्निर्वहणीयत्वेन तत्र तत्त्यागे सत्यन्यत्र तत्त्यागायोगादिति । अथ मौनवदुपासनाप्यासननियममन्तरेण स्यादित्याशङ्कानिराकरणार्थं सूत्रम् सू० ॥ ध्यानाच्च ॥ ८ ॥ ध्यानरूपोपासना विजातीयप्रत्ययान्तराव्यवहिताविच्छिन्नस्मृतिसन्तानरूपा साक्षात्कारफलोत्पत्त्यर्थं तेनानुष्ठेया यावदवसरमुपास्यप्राव

नस्य ध्यानरूपत्वावगमात् । ध्यायतेश्च 'ध्यायति बको ध्यायति प्रोषितं बन्धुः' इत्यादौ च प्रशिथिलाङ्गचेष्टेषु प्रतिष्ठितदृष्टिष्वेकविषयाक्षिप्तचित्तेषु व्यवहारात् । विजातीयप्रत्ययान्तराव्यवहिते तैलधारावदविच्छिन्नस्मृतिसंतानरूपध्याने चित्तैकाग्र्यावश्यंभावाच्च ध्यानसिद्धयेऽवश्यमासननियम आदर्तव्यः ॥

सू ॥ अचलत्वं चापेक्ष्य ॥ ९ ॥

पृथिव्यादीनामचलत्वमपेक्ष्य 'ध्यायतीव पृथिवी ध्यायतीवान्तरिक्षम्' इत्यादिप्रयोगाच्चासीन एवोपासीत । ध्यानसन्ततिर्हि पृथिव्यादिवदचलत्वेनासीनस्यैव संभवति ॥

सू ॥ स्मरन्ति च ॥ १० ॥

'शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः । नात्युच्छ्रितं नातिनीचं चेलाजिनकुशोत्तरम् ॥ तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः । उपविश्यासने युञ्ज्यात् योगमात्मविशुद्धये ॥' इत्युपासकानामासननियमादिस्मरणाच्चासीन एव ब्रह्मोपासीतेति सिद्धम् ॥ इति 'आसीनाधिकरणम् ॥ ६ ॥

अथ यत्रैकाग्रताधिकरणम् ॥ ७ ॥

सू ॥ यत्रैकाग्रता तत्राविशेषात् ॥ ११ ॥

उक्त उपासकस्यासननियमः । तद्वद्धि देशकालनियमोऽस्ति न वा इति सन्देहे सत्यस्तीति युज्यते । यथा चोदिते कर्मणि 'ब्रह्मयज्ञेन यक्ष्यमाणः प्राच्यां दिशि' इति दिङ्नियमः, 'प्राचीनप्रवणे वैश्वदेवेन यजेत' इति देशनियमः 'अपराह्णे पिण्डपितृयज्ञेन चरन्ति' इति कालनियमः, तथाऽत्रापि चोदितत्वाविशेषादुपा-

---

ण्यरूपान्मौनाद्विलक्षणेति तस्यामत्यन्तचित्तैकाग्र्यमपेक्षितमिति भावः । ध्यानस्यात्यन्तचित्तैकाग्र्यापेक्षायां लिङ्गप्रदर्शनार्थं सूत्रम् । सू० ॥ अचलत्वं चापेक्ष्य ॥ ९ ॥ आसननियमश्रुतेः सर्वविद्यासाधारण्येन प्रवृत्तिरपि प्रमाणमिति प्रदर्शनार्थं सूत्रम् । सू० ॥ स्मरन्ति च ॥ १० ॥ 'चेलाजिनकुशोत्तर' मित्यस्य चेलं सर्वोत्तरं अजिनं कुशेभ्य उत्तरं कुशा भूतलमात्रादुत्तरा इति तात्पर्यम् । एवं हि 'तत्रैकाग्रं मनः कृत्वे'ति वाक्यशेषानुसरणं 'मृद्वासने समासीन' इति स्मृत्यन्तरानुसरणं च लभ्यते ॥

इति आसीनाधिकरणम् ॥ ६ ॥

अथ यत्रैकाग्रताधिकरणम् ॥ ७ ॥

सू० ॥ यत्रैकाग्रता तत्राविशेषात् ॥ ११ ॥ प्रत्युदाहरणसङ्गतिमाह—उक्त इति ।

नयमणिमालायाम्

अथ आसीनाधिकरणम् ॥ ६ ॥

सू० ॥ आसीनः संभवात् ॥ ७ ॥ ध्यानाच्च ॥ ८ ॥ अचलत्वं चापेक्ष्य ॥ ९ ॥ स्मरन्ति च ॥ १० ॥

आसीनस्तिष्ठन्यावद्गच्छन्शयानो वा । कुर्वीत परोपास्तिं तत्राश्रवणाद्विशेषस्य ॥ ३३९ ॥

आसीन उपासीत ध्यानं······वासः भवति । शयने निद्राभङ्गादन्येषु च चित्तविक्षेपात् ॥ ३४० ॥

इति आसीनाधिकरणम् ॥ ६ ॥

सने दिगादिनियमो युक्त इति पूर्वः पक्षः ॥ सिद्धान्तस्तु उपासने नास्ति दिगादिनियमः । ऐकाग्र्यं हि ध्यानस्य प्रधानसाधनम् । न हि तत्र दिगाद्यपेक्षा । यत्र रागद्वेषादिकालुष्यहेतुर्नास्ति, तत्र हि मनस ऐकाग्र्यं भवति । तावदेवापेक्षणीयम् । 'विविक्तदेशे तु सुखासनस्थः' इति श्रवणात् । 'अनन्तं शिवसन्निधौ' इत्यादिकं जपादिविषयम्, न ध्यानविषयम् । तत्राप्यैकाग्र्यं यदि मुख्यतमं भवति । तस्मादैकाग्र्यमात्रसाधनकस्य ध्यानरूपोपासनस्य न दिग्देशकालनियमः ॥

इति यत्रैकाग्रताधिकरणम् ॥ ७ ॥

अथ आप्रायणाधिकरणम् ॥ ८ ॥

सू ॥ आप्रायणात्तत्रापि हि दृष्टम् ॥ १२ ॥

पूर्वत्र ब्रह्मोपासनायां दिगादिनियमाभाव उक्तः । इह पुनस्तस्योपसंहारोऽस्ति न वेति विचारे यावदिच्छा तावदुपासना कर्तव्या । अन्यथा तदुपसंहार इति पूर्वपक्षे प्राप्ते सिद्धान्तः । आप्रायणादहरहरुपासना कार्या । न कदाचिदपि तदुपसंहारः, 'अहरहर्वा एवंवित् स्वर्गं लोकमेति' 'स खल्वेवं वर्तयन् यावदायुषं

विहितत्वान्मानसत्वाच्च संशयः । दिगादिनियमो युक्त इति । दिङ्नियमः प्राङ्मुखत्वादिनियमः देशनियमः शिवालयाद्याश्रयणनियमः कालनियमः पूर्वाह्णादिनियमः ऐकाग्र्यं ध्यानस्यान्तरङ्गसाधनं तदविरोधेन सति संभवे सामान्यशास्त्रसिद्धो दिगादिनियमोऽपि ग्राह्यः । असंभवे तु न ग्राह्यः । व्रीहिशास्त्रविरोधेऽश्वशफशास्त्रस्येवान्तरङ्गसाधनविरोधे बहिरङ्गसाधनस्य त्याज्यत्वादिति सिद्धान्तः ॥

इति यत्रैकाग्रताधिकरणम् ॥ ७ ॥

अथ आप्रायणाधिकरणम् ॥ ८ ॥

कालानियमस्य क्वचिदपवादप्रदर्शनार्थमधिकरणान्तरम् । सू० ॥ आप्रायणात्तत्रापि हि दृष्टम् ॥ १२ ॥ यथा पूर्वाह्णादिकालेषु मनोऽनुकूले काले कर्तव्योपासना तथा मनोऽनुकूलकालावधि कर्तव्या न तु यावदायुः अहरहर्वा । 'एवंवि'दित्यादि तु दहरविद्यामात्रविषयम् । न च सर्वासां परविद्यानां साक्षात्कारपर्यन्तत्वाद्यावज्जीवमनुष्ठेयता । अन्तिमदशायामेव साक्षात्कारो भवति, न ततः पूर्वमित्यत्र प्रमाणाभावादिति पूर्वपक्षः । देहवियोगकाले मूर्धन्यनाड्योत्क्रान्तिरर्चिरादिगतिः ब्रह्मप्राप्तिः स्वरूपाविर्भावश्चेत्येवंरूपविद्याफलपरंपरारम्भः । स यद्यपि विद्यानुवृत्त्यभावेऽपि तद्व्यापारानुवृत्तिमात्रेण निर्वहति । तत्रापि व्यापारो विद्यानां साक्षात्काररूपः । स तु भावनाप्रकर्षानुवृत्तिलभ्य इति तदर्थमपेक्षानुसारेण यावज्जीवमनुवृत्तिस्सर्वविद्यासाधारणीति सिद्धान्तः । 'स खल्वेवं वर्तयन्नि'ति

अथ नयमणिमालायाम्

अथ यत्रैकाग्रताधिकरणम् ॥ ७ ॥

सू० ॥ यत्रैकाग्रता तत्राविशेषात् ॥ ११ ॥

दिग्देशकालनियमोऽप्युपासने कोऽपि वक्तव्यः । विहितं हि कर्म सर्वं प्रायस्तन्नियमसापेक्षम् ॥ ३४१ ॥

चित्तैकाग्र्यं त्वस्य ध्यानस्य प्रथमकारणं नान्यत् । तद्यत्र भवति पुंसस्स एव दिग्देशकालः स्यात् ॥ ३४२ ॥

इति यत्रैकाग्रताधिकरणम् ॥ ७ ॥

ब्रह्मलोकमभिसंपद्यते' इत्यादावाप्रायणादुपासनश्रवणात् । ब्रह्मस्वरूपत्वापादिन्या ब्रह्मभावनाया मध्ये विच्छेदो न कार्यः । स्वात्मतया नैरन्तर्येण ब्रह्मणि भाविते हि तद्रूपमुपासकेषु प्रकाशते । अतः सर्वज्ञं नित्यतृप्तं स्वयंप्रकाशं स्वतन्त्रमलुप्तशक्तिकमनन्तशक्तिकं परं ब्रह्म नैरन्तर्येण भावनीयं तत्स्वरूपप्रकाशायेति । तथा श्रूयते ब्रह्मस्वरूपमुपासकेषु प्रकाशत इति । 'या ते रुद्र शिवा तनूरघोराऽपापकाशिनी । तया नस्तन्वा शन्तमया गिरिशन्ताभि चाकशीहि ॥' इति । अनादिमलकर्मवासनारूढदेवादिशरीराभिमानप्रवाहसिद्धामध्यात्मादिभेदभिन्नामसह्यां संसाररुजं द्रावयत्युपासकानामिति रुद्र इत्युच्यते परं ब्रह्म शिवः । तस्यामन्त्रणं रुद्रेति । हे रुद्र ! परमेश्वर ! या ते तनूः मूर्तिः शिवा नित्यसिद्धापहतपाप्मादित्वेन परमविशुद्धा परममङ्गलमयी परममङ्गलप्रदा अघोरा शिवत्वयोगेनैव सर्वहृदयङ्गमा अपापकाशिनी पापग्रहणस्योपलक्षणत्वात् ज्ञानाग्निदग्धनिखिलपुण्यपापा इहापापा इत्युच्यन्ते मुक्तात्मानः तेषु प्रकाशमानत्वादपापकाशिनी ईदृशी या ते तनूः तया शन्तमया 'स एको ब्रह्मण आनन्दः' इत्यादिश्रुतिसिद्धनिरतिशयानन्दलक्षणया तन्वा नोऽस्माकमपि संसारनिमित्तं पुण्यपापसंचयमपनीय स्वरूपतया साक्षादतीव प्रकाशस्वेति प्रार्थनेयमुपासकानाम् । अत उपासकानामात्मनि ब्रह्मस्वरूपस्य प्रकाशनात् तत्प्रकाशकारणभूता ब्रह्मभावना यावदायुषं कर्तव्या । न कदाचिदपि विच्छेद्येति ॥

इति आप्रायणाधिकरणम् ॥ ८ ॥

श्रुतौ यद्यपि कर्मणामेव यावज्जीवानुष्ठेयत्वं श्रुतं न तु विद्यायाः । तथापि तत्र यावज्जीवं कर्मानुष्ठानस्यापुनरावृत्तिफलकत्वमुच्यमानं विद्यां प्रति स्वरूपोपकारकत्वेनैवोपपादनीयं नान्यथेति तदुक्तिसामर्थ्याद्विद्याया अपि यावज्जीवानुष्ठेयत्वं तत्र विवक्षितमुन्नीयत इति भावः । प्रायणदशायां परमेश्वरसाक्षात्कारोदये तत्प्रार्थनामन्त्रः प्रमाणमित्याह—तथा श्रूयत इति । शिवेत्यस्य निर्दोषत्वं कल्याणगुणाकरत्वं शिवंकरत्वं वार्थ इत्यभिप्रेत्याह—नित्यसिद्धेति । गिरिशन्तेत्यपि संबोधनम् । गिरौ 'कैलासशिखरे रम्ये शङ्करस्य शिवालये । देवतास्तत्र मोदन्ती'ति शिवसङ्कल्पमन्त्रप्रतिपादिते दिव्यस्थानमध्यनिविष्टे महाकैलासे पर्वते शं स्वोपासकानां निरतिशयमानन्दं तनोतीति तदर्थः । स्वरूपतयेत्यनेन शिवाहंभावनाजन्यत्वं साक्षात्कारस्याविष्कृतम् । अभीत्युपसर्गस्य व्याख्यानं साक्षादिति । प्रार्थनेयमुपासकानामिति । अस्य मन्त्रस्य श्वेताश्वतरोपनिषदि परविद्याप्रकरणे पाठा 'द्रुद्रं' 'गिरिशन्ते'ति सकलसांसारिकानर्थनिवृत्तिनिरतिशयमहानन्दानुभवप्रदत्वेन संबोधनसामर्थ्याच्च मूर्धन्यनाड्युत्क्रमणादिपरंपरया तदुभयकारणभूतान्तिमप्रत्ययप्रार्थनानेन मन्त्रेण क्रियत इत्युन्नीयत इत्याशयः ॥ इति आप्रायणाधिकरणम् ॥ ८ ॥

नयमणिमालायाम्

अथ आप्रायणाधिकरणम् ॥ ८ ॥

सू० ॥ आप्रायणात्तत्रापि हि दृष्टम् ॥ १२ ॥

विहितमुपासनमेतत्कार्यं कालं कियन्तं चित् । आवृत्तिविशिष्टस्य ह्युपासनार्थस्य तावता सिद्धिः ॥ ३४३ ॥

कार्यं तु यावदायुषमहरहरेवंविदित्यादेः । अन्त्यदशायां भाविनि साक्षात्कारे हि तदकरणम् ॥ ३४४ ॥

इति आप्रायणाधिकरणम् ॥ ८ ॥

अथ तदधिगमाधिकरणम् ॥ ९ ॥

सू ॥ तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॥ १३ ॥

पूर्वत्र प्रकर्षेणापापानामुपासकानां ब्रह्मस्वरूपं प्रकाशत इति सोपपत्तिकमुपपादितम्। तदिहोपासकस्य पापक्षयोऽस्ति न वेति संशयः। किं तावत् प्राप्तम्? उपासकानामपि भोगमन्तरेण पापक्षयो न भवति, 'नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि' इति वचनात्। भोगाय शरीरापत्तौ पुनरपि कर्मोपत्तिरिति न मोक्षावसरः। इत्येवं प्राप्ते ब्रूमः—क्षीयते पापं कर्मोपासकानामिति। कथम्? उपासने प्रारब्धे तत्सामर्थ्यादेव पूर्वाघनाशः उत्तराघाश्लेषश्च भवति। तथा हि व्यपदिश्यते। 'तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदू-

---

अथ तदधिगमाधिकरणम् ॥ ९ ॥

सू० ॥ तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॥ १३ ॥ सङ्गतिमाह—पूर्वत्रेति। पूर्वाधिकरणोपात्त 'याते रुद्रे'ति मन्त्रे 'अपापकाशिनी'त्यनेनोपासकानां पापक्षय उक्तः। स न संभवतीत्याक्षिप्य समाधीयत इत्यर्थः। ननु पूर्वाधिकरणे परं 'याते रुद्रे'ति मन्त्रोऽन्तिमप्रत्ययसद्भावे प्रमाणत्वेनोदाहृतः। सूत्रोपात्ते 'त्वहरहर्वा एवं वि'दित्यादिविषयवाक्ये पापक्षयोक्तिर्नास्तीति नेयं सूत्रकाराभिप्रेता सङ्गतिरिति चेत् उच्यते। पूर्वाधिकरणसूत्रे प्रायणपर्यन्तं विद्यानुष्ठेयेत्युक्त्यैव 'स यो हवै तद्भगवन्मनुष्येषु प्रायणान्तमोङ्कारमभिध्यायीत अहरहर्वा एवं वित्स खल्वेवं वर्तय'न्नित्यादिवाक्यानि तत्र प्रमाणत्वेन सूचितानि। विद्याविशेषाम्नातानामेतेषां वाक्यानामाप्रायणमनुष्ठानस्य सर्वविद्यासाधारण्ये कथमर्थादपि पर्यवसानमित्याकाङ्क्षायां तदुपपादको हेतुस्तत्रापि हि दृष्टमिति सूत्रशेषेणोक्तः। हि यस्मात्तत्रापि प्रायणदशायामपि दृष्टं दृष्टिः ब्रह्मसाक्षात्कारोऽस्ति। तस्मात्तत्सिद्ध्यर्थं विद्यानुवृत्तिरपेक्षितेत्यपेक्षानुसारेण तेषां वाक्यानामर्थतः सर्वविद्याविषयत्वपर्यवसानमिति तस्यार्थः। तेन सूत्रशेषेण प्रायणदशायां साक्षात्कारसद्भावप्रतिपादनात्तत्र 'या ते रुद्रे'त्यन्तिमप्रत्ययप्रार्थनामन्त्रः प्रमाणमिति सूचितम्। तदेव भाष्ये विशदीकृतमिति सूत्रकाराशयस्थैवेयं सङ्गतिः। ननु भोगमन्तरेण यदि कर्मक्षयो न स्यात्तदा भोगार्थं शरीरग्रहणे तत्रापि कर्मान्तरार्जनावश्यंभावादनिर्मोक्षः स्यादित्याशङ्क्य मोक्षस्यापि विद्याफलत्वमाक्षेप्यमस्मिन्पूर्वपक्ष इत्याह—भोगायेति। उपासने प्रारब्ध इति। ननूपासना यस्मिन्दिने प्रारब्धा ततःप्रभृत्युत्तराघाश्लेषः तस्मिन्नेव दिने प्राचीनसकलाघनाश इति नेष्यते। ततः प्रभृत्येव जीवन्मुक्तत्वप्रसङ्गात्। कालान्तरे चेत्किंतत्कालान्तरमिति नावसीयते। साक्षात्कारोदयानन्तरकाल इति चे'दपापकाशिनी'ति प्रागुदाहृतमन्त्रविरोध इत्याशङ्क्याह—तत्सामर्थ्यादेवेति। तस्य सामर्थ्यं दार्ढ्यं यत्साक्षात्कारजननोपयोगि तत एवाश्लेषविनाशौ न तु विद्याप्रारम्भमात्रान्नापि साक्षात्कारादित्यर्थः। सूत्रे 'तदधिगम' इत्यधिगमग्रहणेनायमर्थः सूचितः। तत्र 'ह्यावृत्तिरसकृदुपदेशा'दित्यधिकरणमारभ्य प्रस्तुता विद्या तत्पदेन परामृश्यत इति तस्याः प्राप्तिर्दार्ढ्यमेव पर्यवस्यति। न खलु विद्या गवादिवत्तटस्था विद्यते येन तस्याः स्वसंबन्धरूपा प्राप्तिः पृथग्वक्तव्या स्यात्। उद्यत्येव हि विद्या स्वसंबन्धिन्युदेति। एवं च पापाश्लेषविनाशयोः

यन्ते' 'तद्यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यत' इति। तस्मादुपासकानां पूर्वोत्तराघयोरश्लेषविनाशौ भवत एव। यदुक्तम् 'नाभुक्तं क्षीयते' इति, तस्याज्ञानिविषयत्वादविरोधः ॥ इति तदधिगमाधिकरणम् ॥ ९ ॥

साक्षात्कारजननोन्मुखविद्यादार्ढ्यसाध्यत्वे सति साक्षात्कारोदयकाल एव पूर्वाघविनाशः ततःप्रभृत्येवोत्तराघाश्लेषश्चेति । अत एव साक्षात्कारोदयस्य पुण्यपापविधूननस्य च समकालत्वं प्रतिपादयति 'यदा पश्यः पश्यते रुक्मवर्ण'मित्यादिर्मन्त्रः । तदनुसारेण 'क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे' इति मन्त्रे 'तस्मिन्दृष्टे' इति व्यधिकरणे सप्तम्यौ । तथा च तस्मिन्परब्रह्मणि यद्दृष्टं दर्शनं तस्मिन् जायमाने कर्माणि क्षीयन्ते यथा सवितर्युदयत्येव तमांसीति तस्यार्थः । एवं च साक्षात्कारोदयकाले तत्समानकालोत्पत्तिकः पापक्षयोऽप्यस्ती'त्यपापकाशिनी'त्यस्य न विरोधः । यद्यपि तदानीमप्रारब्धक्षयेऽपि प्रारब्धानुवृत्तिरस्ति तथाप्यनुवर्तमानं पुण्यपापमल्पम् । अनादिभवसञ्चितः क्षीणः पुण्यपापराशिरत्यन्तमधिक इति तदभिप्रायेणा'पापकाशिनी'त्युक्तिरुपपद्यते । अत एव किञ्चित्पुण्यपापानुवृत्त्या जीवद्दशायां नातीव प्रकाशः । देहवियोगकाले तु प्रारब्धस्यापि नाशादतितरां प्रकाश इत्यभिप्रायेणाभिचाकशीतीति मन्त्रे यङ्लुगन्तप्रयोगः । भृशार्थरूपः क्रियासमभिहारस्तत्र यङोऽर्थः तदभिप्रायेणैव प्रागतीव प्रकाशस्येति भाष्ये तद्व्याख्यानं कृतम् । **तस्याज्ञानिविषयत्वादिति** । अयमाशयः । विधीयमानानां विद्यानां फलापेक्षायां रात्रिसत्रन्यायेनार्थवादिको मोक्षः फलमिति तावदवश्यमभ्युपगन्तव्यम् । तद्वदेव पापाश्लेषविनाशयोरपि तत्फलत्वं भवन्ननिवार्यते । आर्थवादिकत्वाविशेषात् । अनादिभवसञ्चितानामनन्तानामनियतकालविपाकानां विविधशरीरभोग्यानां कर्मणां क्रमेण बहुदेहैर्योगप्रभावाद्युगपत्कायव्यूहेन वा भोगे तत्काल एव पुनरपि कर्मान्तरार्जनेन तस्याप्यवश्यभोक्तव्यतया कर्मतत्फलप्रवाहयोः कदाप्युपरत्यभावेनानिर्मोक्षापत्त्या मोक्षफलेनापेक्षितत्वाच्च । पापाश्लेषविनाशवाक्यानां फलसमर्पकत्वं परित्यज्य विद्यावैभवख्यापनमात्रार्थत्वाङ्गीकारे 'न हि कर्म क्षीयते' । 'नाभुक्तं क्षीयते' इत्यादिवचनानामेव कर्मवैभवख्यापनार्थत्वमिति वैपरीत्यस्यापि सुवचत्वाच्च । तस्मात्तेषां वचनानामविद्वद्विषयत्वेन सङ्कोचः कल्पयितुं युक्तः । अवश्यं च सङ्कोचनीयानि तानि वचनानि । अन्यथा प्रायश्चित्ते विधिवैयर्थ्यापत्तेः । अकृतप्रायश्चित्तविषयाणि तानि वचनानीति चेत्तर्हि ब्रह्मविद्यापि प्रायश्चित्तरूपेति न विरोधशङ्कावकाशः । 'क्षेत्रज्ञस्येश्वरज्ञानाद्विशुद्धिः परमा मते'त्यादिस्मृतिषु ब्रह्मविद्यायाः प्रायश्चित्तरूपतयाप्युपदेशात् प्रायश्चित्तरूपत्वे पापनिवृत्तिरेव फलं स्यात् न तु मोक्षोऽपीत्येतत्प्रयोजकमिति ॥ **इति तदधिगमाधिकरणम् ॥ ९ ॥**

नयमणिमालायाम्

अथ तदधिगमाधिकरणम् ॥ ९ ॥

सू० ॥ तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॥ १३ ॥

विदुषोऽपि ऋते भोगं कथमपि न क्षीयते पापम् । वपुरन्तरे तदर्थं जाते पुनरपि तदित्यनिर्मोक्षः ॥ ३४५ ॥

विद्यायास्सामर्थ्यात्पापं प्रारब्धवियस्य । नश्यति पूर्वमपरं न संश्लिष्यत्येवमाम्नानात् ॥ ३४६ ॥

इति तदधिगमाधिकरणम् ॥ ९ ॥

अथ इतरासंश्लेषाधिकरणम् ॥ १० ॥

सू ॥ इतरस्याप्येवमसंश्लेषः पाते तु ॥ १४ ॥

विदुषः पापलेपो न भवतीति निरूपितम्। इह तद्विरोधिपुण्यलेपोऽस्ति न वेति विचारः। किं प्राप्तम्? विद्याविरोधिनः पापस्य क्षयो युक्तः, न तु पुण्यस्य, तस्य विद्याङ्गत्वेनानुवृत्त्यौचित्यात्॥ इत्येवं प्राप्ते निरूप्यते। विदुषः पुण्यस्यापि मोक्षविरोधित्वेनानिष्टफलत्वसाम्यादश्लेषविनाशौ। विद्यानुगुणस्यारोग्यादिफलस्य

अथ इतरासंश्लेषाधिकरणम् ॥ १० ॥

सू० ॥ इतरस्याप्येवमसंश्लेषः पाते तु ॥ १४ ॥ आतिदेशिकीं सङ्गतिमाह—विदुष इति। अतिदेशव्यावर्तनीयामधिकाशङ्कां दर्शयति—विद्याविरोधिन इति। विद्याङ्गत्वेनेति। ननु विद्यानङ्गस्य पुण्यकर्मणो विद्यया नाशाश्लेषौ स्यातामिति चेन्न। प्रमाणाभावात्। 'तद्यथेषीकातूलमग्नौ' 'तद्यथा पुष्करपलाश' इति पूर्वाधिकरणोदाहृतश्रुत्योर्विशिष्य पापस्यैव ग्रहणात्तत्र पापशब्दो मुमुक्षुं प्रत्यनिष्टफलत्वाविशेषात्पुण्यमप्युपलक्षयतीति चेत् अश्लेषवाक्ये तावत्तदुपलक्षणता नोपपद्यते. विषयाभावात् कस्य पुण्यस्योपलक्षणीयता वाच्या। न तावद्विद्याङ्गस्य नित्यस्य। तस्य विद्यार्थमाश्रमपरिपालनार्थं चावश्यानुष्ठेयत्वात्। नापि शरीरधारणाद्युपयुक्तस्य दृष्टारोग्यादि मुमुक्ष्वपेक्षितफलकस्य काम्यस्य विद्यानुष्ठानसिद्ध्यर्थं विद्याङ्गकर्मवदेव तेनाप्यनुष्ठेयत्वात्। नापि तदनपेक्षितफलकस्य काम्यस्य ऐहिकामुष्मिकफलविरक्तस्य मुमुक्षोर्बुद्धिपूर्वं तत्र प्रवृत्त्यसंभवात्। वासनाबलादबुद्धिपूर्वं तत्र प्रवृत्तिस्संभवतीति चेन्न। फलकामनयानुष्ठितस्यैव काम्यस्य फलपर्यवसायित्वेनाबुद्धिपूर्वानुष्ठानतः श्लेषाप्रसक्तेः। तस्मादश्लेषवाक्ये पापशब्दस्य पापमात्रपरत्वात् विनाशवाक्येऽपि तथात्वमेव युक्तम्। ननु 'तत्सुकृतदुष्कृते विधूनुते न सुकृतं न दुष्कृतं सर्वे पाप्मानोऽतो निवर्तन्ते' इति विदुषः पापवत्पुण्यस्यापि विनाशः श्रूयते इति चेत् तयोर्वाक्ययोर्देहवियोगानन्तरभाविपुण्यपापविनाशविषयत्वेन जीवतस्तत्साक्षात्कारोदयसमये पापविनाशवत्पुण्यविनाशे प्रमाणाभावादिति भावः। अनिष्टफलत्वसाम्यादित्युपलक्षणम्। पापवत्पुण्यस्यापि पाशान्तर्गततया जीवज्ञानशक्त्याच्छादकत्वेन ब्रह्मसाक्षात्कारकाले पुण्याभावस्याप्यपेक्षितत्वादित्यपि द्रष्टव्यम्। अत एवा'पापकाशिनी'त्यत्र पापग्रहणं पुण्यस्याप्युपलक्षणमित्युक्तं भाष्ये। न चाश्लेषवचनस्य विषयाभावः। यस्य विद्याप्रतिबन्धकानि दुरितान्यल्पानि तन्निवृत्त्यर्थत्वेनानुष्ठितानि कर्माण्यधिकानि तस्य प्रारब्धसमाप्तिप्रतिबन्धकविघ्नाधिकसङ्ख्यानि मङ्गलानीव कानिचिदनुपयुक्तान्यवशिष्यन्ते। उपासकस्य वीतरागत्वेऽपि भ्रमात्तदभ्युदयेच्छया पुत्रादिभिरनुष्ठितानि तटाकप्रतिष्ठादीनि संभाव्यन्ते। एवंभूतानि कर्माण्यश्लेषवचनस्य विषया भविष्यन्तीति भावः। एवमश्लेषविषयासंभवशङ्कामूलपूर्वपक्षनिराकरणार्थत्वमधिकरणस्य द्योतयितुमेव विशिष्याश्लेषग्रहणं कृतम्। 'पातेत्वि'ति सूत्रांशं व्याचष्टे—विद्यानुगुणस्येति। आरोग्यबलादिफलानां विद्यार्थं यावच्छरीरधारणमपेक्षितत्वेन विद्याविनाश्यत्वाभावादिति भावः। तुरवधारणे। शरीरपात एव लय इत्यर्थः। नन्वारोग्याद्यर्थतया विद्याप्रतिबन्धकदुरितनिवर्तकतया चानुष्ठितं विद्यापेक्षितं यत्पुण्यं कर्म तस्य श्लेषोऽस्त्येवेति पण्या-

पुण्यस्य शरीरपाते लयः। विद्याङ्गकर्मणस्तु काम्यफलादिसंबन्धाभावान्न श्लेषः। अतो विदुषः पुण्यलेपोऽपि नास्तीति निर्णयः॥ इति इतरासंश्लेषाधिकरणम्॥१०॥

अथ अनारब्धकार्याधिकरणम्॥ ११॥

सू॥ अनारब्धकार्ये एव तु पूर्वे तदवधेः॥ १५॥

पूर्वत्र विदुषः पुण्यपापयोरुत्तरपूर्वयोरश्लेषविनाशौ निरूपितौ। इह प्रारब्धकार्ययोस्तयोः स्थितिरस्ति न वेति संशयः। 'सर्वे पाप्मानः प्रदूयन्ते' इत्यविशेषश्रवणात् विद्याऽधिकृतेः पूर्वत्वाविशेषेण तयोरपि विनाश इति प्राप्त उच्यते विद्याऽधिकृतेः पूर्वकृते पुण्यपापे फलदानायाप्रवृत्ते एव विनश्यतः 'तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्ये' इति शरीरपातावधिः श्रूयते। अतः प्रारब्धयोर्न विलयः॥ इति अनारब्धाधिकरणम्॥ ११॥

श्लेषवचनमेवमप्यनुपपन्नमित्याशङ्क्याह—विद्याङ्गकर्मणस्त्विति। विद्याविरोधिकाम्यकर्मसंबन्धरूप एव श्लेषो निषिद्ध इति भावः॥

इति इतरासंश्लेषाधिकरणम्॥ १०॥

अथ अनारब्धकार्याधिकरणम्॥ ११॥

सू०॥ अनारब्धकार्ये एव तु पूर्वे तदवधेः॥ १५॥ विद्यया विनाशस्य केषुचित्पुण्यपापेष्वपवादप्रदर्शनार्थत्वेन सङ्गतिमाह—पूर्वत्रेति। 'सर्वे पाप्मान' इत्यविशेषश्रवणा'त्तस्य तावदेव चिर'मिति विलंबश्रवणाच्च संशयः। तयोरपि विनाश इति। देहधारणं तु विद्यानुगुणकर्मभिरेव भविष्यतीति देहधारणं विना विद्यानुष्ठानानुपपत्तेरिति भावः। फलदानायाप्रवृत्ते एवेति। प्रवृत्तयोरपि विनाशे दुःखाद्यनुभवो न स्यात्। तस्य विद्यानपेक्षितत्वादिति भावः। यावन्न विमोक्ष्ये इति। यावत्प्रारब्धकर्मणा न विमोक्ष्यत इत्यर्थः॥

इति अनारब्धकार्याधिकरणम्॥ ११॥

नयमणिमालायाम्

अथ इतराश्लेषाधिकरणम्॥ १०॥

सू०॥ इतरस्याप्येवमसंश्लेषः पाते तु॥ १४॥

वृष्ट्यारोग्येन्द्रियगुणचित्तविशुद्ध्यादिजननेन। पुण्यं विद्यानुगुणं नाशाश्लेषौ सततं॥ ३४७॥

सत्तापि स्वर्गसुताद्युपासकानिष्टफलदस्य। श्लेषं नाशश्च स्यात्तनुपाते तत्तदनुगुणस्य॥ ३४८॥

इति इतराश्लेषाधिकरणम्॥ १०॥

नयमणिमालायाम्

अथ अनारब्धकार्याधिकरणम्॥ ११॥

सू०॥ अनारब्धकार्ये एव तु पूर्वे तदवधेः॥ १५॥

प्रारब्धयोरपि यावन्नाशः स्यात्सुकृतदुष्कृतयोः। सर्वे पाप्मान इति ह्यविशेषेण श्रुतो नाशः॥ ३४९॥

न तदा तयोर्विनाशः शरीरपातावधिश्रवणात्। न हि कर्म विनाशे स्यात् तस्य क्षणमप्यवस्थानम्॥ ३५०॥

इति अनारब्धकार्याधिकरणम्॥ ११॥

अथ अग्निहोत्राद्यधिकरणम् ॥ १२ ॥

सू ॥ अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ॥ १६ ॥

पूर्वत्र विदुषः पुण्यपापाश्लेषविनाशौ निरूपितौ । यावदायुषमुपासनावृत्तिरप्युपपादिता । इह पुनरग्निहोत्राद्यनुष्ठानमपि यावच्छरीरपातमनुवर्तते उत मध्ये

अथ अग्निहोत्राद्यधिकरणम् ॥ १२ ॥

सू० अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ॥ १६ ॥ अग्निहोत्रादिकं विद्यासहकारित्वेन साक्षात्कारोदयपर्यन्तमेवानुष्ठेयमुत विद्यावदाप्रायणमिति, साक्षात्कारोदयानन्तरमनुपयोगाश्लेषापत्तिभ्यामुपयोगाश्लेषानापत्तिभ्यां च संशयः । कर्मणां विद्यास्वरूपोपकारित्वेन हि तदङ्गत्वमिष्यते न त्वनूयाजादिवदारादुपकारकत्वेन येन प्रधानस्वरूपनिष्पत्त्यनन्तरमपि तदनुष्ठानं शक्येत । अतो दृढविद्यायास्साक्षात्कारपर्यन्ताया निष्पत्तौ न तदनुष्ठेयमनपेक्षितफलत्वात्कृतस्याप्यश्लेषापत्तेः । न चाप्रायणमहरहरविच्छेदेन विद्यानुवृत्तिसिद्धये अग्निहोत्रादिकमनुष्ठेयमिति वाच्यम् । कर्मण इव विद्याया अप्यनुतिष्ठासामात्रेणाविच्छिन्नानुवृत्तिसिद्धेः । न च विद्यानुवृत्तिप्रतिबन्धकदुरितनिवृत्त्यर्थं तदनुष्ठानम् । साक्षात्कारोदयप्राचीनदुरितानां विद्यया विनष्टत्वात्तदनन्तरं प्रामादिकदुरितसंभवेऽपि तदश्लेषात् विरक्तस्य बुद्धिपूर्वकपापाचरणाप्रसक्तेः कथंचित्संभवे तन्निवृत्त्यर्थं वैशेषिकस्य प्रायश्चित्तस्यानुष्ठेयत्वात् । प्रारब्धकर्मविशेषस्यैव कस्यचिद्विद्यानुवृत्तिप्रतिबन्धकत्वे पूर्वाधिकरणन्यायेन विद्ययाप्यनिवर्तनीयस्य तस्याग्निहोत्रादिना निवृत्त्यसंभवात् । न च नित्यस्याग्निहोत्रादेर्बुद्धिपूर्वकं परित्यागे प्रत्यवायः स्यात् । प्रत्यवायदूषितान्तःकरणस्य च विद्यानुवृत्तिर्न सिद्ध्येदिति वाच्यम् । तावता नित्यत्वेनाश्रमधर्मानुष्ठानसिद्धावपि विद्याङ्गत्वेन तदनुष्ठानासिद्धेः । तथापि श्रुतिबलाद्विद्याङ्गत्वेनाप्रायणं कर्मानुष्ठानमिति चेत्का श्रुतिः । नताव'द्विविदिषन्ति यज्ञेने'त्यादिका । तस्याः विद्याप्रारंभात्प्राग्विद्याङ्गत्वेनाश्रमधर्मानुष्ठानविषयत्वस्य 'विहितत्वाच्चाश्रमकर्मापी' (ब्र० ३-४-८-३२) त्यधिकरणे दर्शितत्वात् नापि 'विद्याञ्चाविद्याञ्चे'ति श्रुतिः । तस्याः फलपर्यालोचनया साक्षात्कारोदयात्प्राग्विद्यासहकारित्वेन कर्मानुष्ठानविषयत्वात् । विद्यानुवृत्तिप्रतिबन्धकदुरितनिवृत्त्यर्थं हि तदनुष्ठानम् । 'अविद्यया मृत्युं तीर्त्वे'ति वाक्यशेषात् । तत्प्रतिबन्धकं चाग्निहोत्रादिना निवर्तयितुं शक्यं दुरितं साक्षात्कारोदयात्प्रागेव संभवति न तु तदनन्तरमपीत्युक्तम् । नापि 'स खल्वेवं वर्तयन्नि'ति श्रुतिः । तस्यास्साक्षात्कारोदयानन्तरमपि नित्यत्वेन कर्मानुष्ठेयं न त्वनुपयोगधिया त्यक्तव्यम् । तत्त्यागे प्रत्यवायदूषितचित्तस्य विद्यानुवृत्त्यसंभवादित्येव फलपर्यालोचनया तात्पर्यकल्पनौचित्यात् । एतेन 'क्रियावानेष ब्रह्मविदां वरिष्ठ' इत्यादिश्रुतयोऽपि व्याख्याताः । तस्मात्साक्षात्कारोदयानन्तरं विद्यासहकारित्वेन कर्म नानुष्ठेयम् । अनुष्ठानेऽपि पूर्वाधिकरणे काम्यसुकृतानामश्लेषस्य समर्थितत्वेन तद्वदग्निहोत्रादिसुकृतस्याप्यश्लेषापत्तेश्चेति पूर्वः पक्षः । सिद्धान्तस्तु साक्षात्कारोदयानन्तरमप्यग्निहोत्रादिकं तावदनुष्ठेयमेव । नित्यत्वात्तदनुष्ठानं च विद्याख्यकार्यायैव भवति । अन्यथा प्रत्यवायदूषितान्तःकरणस्य विद्यानिष्ठायाः प्रच्युतिप्रसङ्गादिति पूर्वपक्षिणोऽपि संमतमेतत् । तथा

विच्छिद्यत इति विचारः । किं प्राप्तम्? अग्निहोत्रादिकमाप्रायणं नानुष्ठेयम् । क्रियमाणेऽपि विनाशाभ्युपगमात् । अप्रयोजने कस्य मनः प्रवर्तेत इति ॥ एवं प्राप्ते ब्रूमः । अग्निहोत्रादिकमाप्रायणमनुष्ठेयं विद्याकार्यायैव । तथा हि दृश्यते 'त-

---

विद्यासहकारित्वेनाप्याप्रायणं तदनुष्ठेयम् । 'विद्याञ्चाविद्याञ्च यस्तद्वेदोभयꣳ सहे'ति विद्यातत्सहकारिकर्मणोः साहित्यनियमश्रुतेः कालविशेषे सङ्कोचकल्पनानौचित्यात् । न च कर्मजन्योपकारपर्यालोचनया संकोचकल्पनम् । उपदेशे हि श्रुतपदार्थविध्यनुसारेणोपकारकल्पनमुचितं न त्वतिदेशइवोपकारानुसारेण पदार्थव्यवस्थापनम् । तद्यदि 'धर्मेण पापमपनुदती' तिश्रुत्यवगतकारणान्तरप्रभवदुरितनिवृत्तिरूप उपकारः साक्षात्कारोदयानन्तरमग्निहोत्रादेर्न संभवति तथापि यावद्विद्यानुवृत्त्यनुष्ठेयत्वेन विहितस्य विद्यासहकारिणस्तस्य मध्ये बुद्धिपूर्वं विच्छेदे सत्ययथाशास्त्रमनुष्ठानतः प्रत्यवायेन चित्तदूषणे सति विद्यानुवृत्तिर्न स्यादिति तदर्थमेवाप्रायणं तदिति कल्प्यते। प्रारब्धकाम्यकर्मणः पुरुषस्य मध्ये फललाभेन वीतायामपि हि फलेच्छायां न केवलं प्रत्यवायपरिहाराय समापनमावश्यकमिति व्यवस्थापितं 'प्रक्रमात्तु नियम्येते'ति पूर्वतन्त्राधिकरणे । इहार्धावशिष्टे फले यावद्विद्यानुवृत्त्यनुष्ठेयत्वेन चोदितं विद्यासहकारिकर्म कथं मध्ये त्यक्तव्यम् । न हि जीवद्दशायामुपास्य साक्षात्कारोदयमात्रेण चारितार्थ्यं किन्त्वन्तिमप्रत्ययोऽप्यपेक्षितः । ततश्च प्रारब्धकर्माधीनेन प्रबलव्याध्यादिकृतचित्तक्षोभेण शिवभावनानुवृत्त्यभावेऽन्तिमप्रत्ययो न सिध्येदिति तदनुवृत्तिसिद्ध्यर्थमाप्रायणं विद्यासहकारि कर्मेति कल्प्यते । फलबलाच्च तस्य प्रारब्धादपि प्राबल्यं कल्प्यते । सन्ति हि प्रारब्धादपि प्रबलानि कर्माणि यथा कर्मविपाकशास्त्रचोदितानि, तथोत्पन्नसाक्षात्कारस्यापि प्रारब्धकर्मोपनीतेन तात्कालिकमोहेन कदाचिद्बुद्धिपूर्वकं निषिद्धकर्मानुष्ठानं प्रसज्यते । अन्यथा प्रसक्त्यभावेन 'नाविरतो दुश्चरितान्नाशान्तो नासमाहितः । नाशान्तमानसं वापि प्रज्ञानेनैनमाप्नुया'दिति शास्त्राप्रवृत्तिप्रसङ्गात् । ततश्च, विद्यासहकारित्वेनानुष्ठीयमानमग्निहोत्रादिकं प्रारब्धकर्मणोऽपि प्रबलं सत्तदधीनां निषिद्धकर्मानुष्ठानरुचिं प्रतिबध्नातीति कल्प्यते । यत्र विद्यासहकारिकर्मापेक्षयापि निषिद्धानुष्ठानप्रवर्तकं प्रारब्धं प्रबलं तत्र तदधीने बुद्धिपूर्वकं कदाचित्प्रमादिके निषिद्धानुष्ठाने सत्यबुद्धिपूर्वकस्येव तस्याश्लेषासंभवात्तद्विषयम् । 'अपिचेत्पातकं किंचिद्योगी कुर्यात्प्रमादतः । योगमेव निषेवेत नान्यं यत्नं समाचरे'दिति तन्निवृत्त्युद्देशेन योगानुष्ठानमुपपद्यते । अपि च विद्याधीनेऽस्त्युपास्यसाक्षात्कारे रविचन्द्रारुणकिरणादिप्रकाशितघटादिसाक्षात्कारइव स्पष्टास्पष्टत्वतारतम्यम् । तत्र जीवद्दशायां प्रथमोत्पन्न उपास्यसाक्षात्कारोऽस्पष्टः। तदनन्तरं विद्यासहकार्यग्निहोत्रादिबलतारतम्येन स्पष्टः। अन्तिमप्रत्ययस्त्वतिस्पष्टः प्रलयप्रदानसमर्थो जायत इति कल्प्यते। तदेतत्सर्वमभिप्रेत्याह भाष्यकारः। 'अग्निहोत्रादिकमाप्रायणमनुष्ठेयं विद्याकार्यायैवेति। आद्यपक्षे विद्यारूपाय कार्यायेत्यर्थः। तृतीयपक्षे विद्यायाः कार्यायेति। एवं समासद्वयेनाग्निहोत्रादेर्विद्यातत्फलोपकारकत्वमभिप्रेत्यैव सूत्रे 'तत्कार्याये'ति निर्देशः। केवलविद्यार्थत्वविवक्षायां तु कार्यपदं न प्रायोक्ष्येत। न चैवं सति विद्यासहकारिकर्मणां विद्यायाः फलोपकार्यङ्गत्वं स्वरूपोपकार्यङ्गत्वं च। स्वरूपोपकार्यङ्गत्वमपि कारणान्तरप्रभवदुरितनिवृत्तिद्वारकं स्वाननुष्ठानप्रयुक्तप्रत्यवा-

मेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेने'त्यादि।

यकार्यचित्तदोषप्रतिबन्धद्वारकं व्याध्यादिकृतचित्तक्षोभप्रतिबन्धद्वारकं निषिद्धरुचिप्रतिबन्धद्वारकं चेति वैरूप्यं स्यादितिवाच्यम्।पदार्थशक्त्यनुसारेणोपकारभेदकल्पनस्यादोषत्वात्। अस्ति हि स्विष्टकृतस्त्यागांशेन दर्शपूर्णमासयोरारादुपकारकत्वं मन्त्रद्वारेष्टदेवतास्मरणेन सन्निपत्योपकारकत्वं प्रक्षेपांशेन द्रव्यप्रतिपत्त्यर्थतया च सन्निपत्योपकारकत्वमिति वैरूप्यम्। तस्माद्युक्तं विद्यासहकारिकर्मणामाप्रायणमनुष्ठानम्। 'तद्दर्शना'दिति सूत्रावयवं व्याचष्टे—**तथाहीति**। यद्यप्यत्र 'विद्याञ्चाविद्याञ्चे'ति श्रुतिरुदाहर्तव्या। यज्ञादीनां विद्यासहकारितायां 'विहितत्वा'दित्यधिकरणे तस्याः प्रमाणीकृतत्वात् 'यज्ञेने'त्यादिश्रुतेर्विद्यारंभात्प्राग्विद्यासिद्ध्यर्थतया यज्ञादीनामनुष्ठेयत्वे प्रमाणीकृतत्वात्। तथापि यज्ञादिश्रुतिस्सामान्यतो वेदनोद्देशेन यज्ञादीन्विदधती विद्यारंभात्प्राग्विद्यारंभप्रभृति साक्षात्कारोदयानन्तरं चानुष्ठानेष्वविशेषेण प्रमाणं भवितुमर्हति। सर्वत्राप्युपासनरूपस्य साक्षात्काररूपस्य वा वेदनस्य फलत्वाविशेषात् न तु सहश्रुतिरिव क्वचिद्व्यवतिष्ठते इत्यभिप्रेत्य यज्ञादिश्रुतिरिहोदाहृता। अत एव सूत्रकृतापि सर्वापेक्षाधिकरणे सोदाहृता। न च विद्यारंभप्राचीनानुष्ठानविषयं तदधिकरणम्। 'शमदमाद्युपेतः स्यात्तथापि त्वि'त्युत्तरसूत्रालोचनया शमाद्यनुष्ठानसमानकालत्वावगमात् शमादीनां च चित्तैकाग्र्यार्थं विद्यारंभप्रभृत्येवावश्यानुष्ठेयत्वात्। अत्र वेदानुवचनमिति यद्यपि यज्ञादिवाक्ये वेदानुवचनग्रहणं ब्रह्मचर्याश्रमधर्मोपलक्षणमभिप्रेत्य 'विहितत्वाच्चाश्रमकर्मापी'त्याश्रमधर्मरूपत्वं सर्वापेक्षाधिकरणे प्रकृतस्य यज्ञादिवाक्यनिर्दिष्टकर्मजातस्योक्तम्। तथाप्येवमपि व्याख्यातुं शक्यत इत्यभिप्रायेण वा 'वेदानुवचनेन तपसा ब्रह्मचर्येणात्मानमन्विष्ये'ति वाक्यान्तरगतवेदानुवचनशब्दव्याख्यानफलतया कृत्वाचिन्तयावेत्थं व्याख्यातम्। उत्तरसूत्रमवतारयितुमाशङ्कते—**नन्विति**। द्विविधा साधुकृत्या विद्यारंभात्प्राचीना तदन्तरभाविनी च। प्राचीनापि द्विविधा भुक्तफला अभुक्तफला च। अभुक्तफलापि द्विविधा सङ्कीर्तनादिना विनष्टा चाविनष्टा च। अविनष्टापि द्विविधा प्रारब्धफला चाप्रारब्धफला च। तत्र प्राचीनासु न काचिदपि 'सुहृदस्साधुकृत्या'मित्यस्य विषयः। भुक्तफलायास्सङ्कीर्तनादिहतायाश्चासत्त्वात्प्रारब्धफलाया विदुषैव भोग्यत्वात्। अप्रारब्धफलाया विद्याया विनाशात् विद्यारंभानन्तरभाविनी त्वग्निहोत्रादिरूपैव। सा चेद्विद्योत्पत्त्यर्थत्वेन विद्वदुपयुक्ता तदा 'सुहृदस्साधुकृत्या'मित्यस्य विषय एव नास्तीति शङ्कार्थः। ननु 'द्विषन्तः पापकृत्या'मित्यस्य कं विषयं दृष्ट्वा 'सुहृदस्साधुकृत्या'मित्येतावन्मात्रस्य निर्विषयत्वमाशंक्यते। विद्योत्पत्त्यनन्तरभाविनी पापकृत्या तस्य विषयः स्यादितिचेत्। न। तस्या अप्यश्लेषवचनेनासत्त्वावगमात्। नहि देहवियोगकाले विरजानद्यतिक्रमणकालानन्तरकाले वा द्विषद्गामिनी भवित्री सा तावत्पर्यन्तं निराधारा स्थास्यति। अश्लेषवचनस्य विदुषि फलाजनकत्वमात्रमर्थ इति चेत् तर्हि पूर्वसाधुकृत्याया विनाशवचनमपि तस्मिन्फलाजनकत्वमात्रपरमिति सैव 'सुहृदस्साधुकृत्या'मित्यस्य विषयो भवेत्। किंचैवंसति विद्योत्पत्त्यनन्तरं यस्यास्साधुकृत्याया अश्लेषः सापि विषयो भवेत्। विदुषानुष्ठीयमानानामग्निहोत्रादीनां विद्यार्थत्वाभ्युपगमे कस्याश्चिदप्यसाधुकृत्याया अश्लेषो न संभवतीति चेत् न। 'इतरस्या-

अत्र वेदानुवचनं वेदाभ्यासः। परमेश्वरप्राप्तिसाधनपरमज्ञानहेतूनामध्यात्मवादिनां वेदमन्त्राणां जपावृत्तिः। तथा जाबालोपनिषदि। 'अथ हैवं ब्रह्मचारिण ऊचुः, भगवन् किंजप्येनामृतत्वं ब्रूहीति। स होवाच याज्ञवल्क्यः शतरुद्रीयेणेति। एतानि ह वा अमृतस्य नामधेयानि एतैर्हवा अमृतो भवति' इति। कैवल्योपनिषदि। 'यः शतरुद्रीयं ब्राह्मणो नित्यमधीते सोऽग्निपूतो भवति स वायुपूतो भवति सुरापानात् पूतो भवति ब्रह्महत्यायाः पूतो भवति अन्त्याश्रमी सर्वदा सकृद्वा जपेत् परमं ज्ञानमाप्नोति संसारार्णवनाशनम्' इति। इह शतरुद्रीयसंज्ञानां ब्रह्मबोधकानां मन्त्राणामभ्यासात् संसारनाशनस्य परमज्ञानस्य प्राप्तिः, तद्विरोधिपापक्षयश्चावगम्यते। 'एतानि ह वा अमृतस्य नामधेयानि' इत्यमृतस्यानादिमुक्तस्य शिवस्य नामधेयत्वाद्धेतोः शतरुद्रीयजपात् सकलपापक्षयादिप्रतिपादनात् परमेश्वरस्य शिवादिनामधेयानामभ्यासोऽपि विद्याविरोधिसकलपापक्षयहेतुरवगम्यते। तथैव मुण्डकोपनिषदि श्रूयते। 'अपि वा यश्चाण्डालः शिव इति वाचं वदेत् तेन सह संवदेत् तेन सह संवसेत् तेन सह भुञ्जीत' इति। अत्र हि शिवशब्दस्य ब्रह्मबोधकस्य समुच्चारणमात्रेणात्यन्ताविशुद्धस्य पातकिनः परमविशुद्धिप्राप्तिरवगम्यत इति। अन्यत्र च 'योऽथर्वशिरसं ब्राह्मणो नित्यमधीत' इत्यारभ्य तदभ्यासिनः सकलपापक्षयमुक्त्वा 'सकृज्जप्त्वा शुचिः पूतः कर्मण्यो भवति द्वितीयं जप्त्वा गाणपत्यमाप्नोति तृतीयं जप्त्वा देवमेवानुप्रविशति' इति मोक्षफलं प्रतिपाद्यते। 'आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिम्' इत्यादिषु च प्रणवाद्यभ्यासस्य पाशविच्छेदहेतुत्वमुच्यते। एवमन्यत्रापि द्रष्टव्यम्। अतः परमेश्वरपराणां वेदमन्त्राणां पापक्षयद्वारा परमज्ञानहेतुत्वेन मोक्षसाधनत्वावगमात् तदभ्यासः कर्तव्यो विद्यावताऽपि यावज्जीवम्। एवमग्निहोत्रादीनामपि यज्ञानां परमेश्वरसमर्पितफलानां तदाज्ञासिद्धत्वात् तदाराधनरूपत्वाच्चाभ्यासः कार्यः। एवं दानादीनामपि। तस्माद्विदुषाऽपि विद्यानिष्पत्तिकार्यायाग्निहोत्रादिकमनुष्ठेयमिति। कर्मतपोजपध्यानज्ञानरूपमीश्वरोपासनम्। कर्माग्निहोत्रादिकम्, तपो नियमः, कायशोषणं वा, जपः पूर्वोक्तप्रणवाद्यभ्यासः, एतेषां पापशोषणद्वारा मोक्षहेतुत्वम्। ज्ञानध्यानयोस्तु साक्षात्,

---

प्येवमश्लेष' इत्यधि (ब्र० ४ पा० १ सू० १४) करणे तद्विषयस्य समर्थितत्वात्। यदि साधुकृत्याया अश्लेषविनशावुपासकंप्रति तस्यां फलजननार्हतानुत्पत्तिनिवृत्तिरूपावित्यभ्युपगम्य विद्योत्पत्त्यनन्तरभाविन्यास्तत्प्राचीनायाश्च साधुकृत्यायास्सुहृद्गामित्ववचनविषयता समर्थयितुं न शक्यते। 'तस्य पुत्रा दायमुपयन्ती'ति दृष्टान्तानुसारेण यावद्देहधारणमुपासकं प्रति फलजननार्हतयैव स्थितायां साधुकृत्यायां देहवियोगकाले तन्निवृत्तिपूर्वकं सुहृदः प्रतिफलजननार्हताविर्भावप्रतीतेरिति। एवं तदुक्तरूपेण द्विविधायाः पापकृत्याया अपि द्विषद्गामित्ववचनविषयता समर्थयितुं न शक्यते। तादात्विकपितृसंबन्धनिवृत्तिपूर्वकदायसङ्क्रमणदृष्टान्तस्य तत्राप्यन्वयादिति तुल्यम्। यदितु पापकृत्यायामशेषविनाशशब्दयोरन्यथार्थौ वर्ण्येत विदुषि जायमानायां पापकृत्यायामाविर्भवन्तीं तं प्रति फलजननार्ह-

ब्रह्मस्वरूपापत्तिहेतुत्वात् । अतः सर्वेषामेषामनुष्ठानं कार्यम् । ननु यद्यग्निहोत्रादिसाधुकृत्या विद्योत्पत्त्यर्था । तदन्या च पूर्वकृता साधुकृत्या विद्याप्रारम्भे सति विनष्टा । तर्हि 'सुहृदः साधुकृत्याम्' इत्यस्य को विषय इत्याशङ्क्याह—

सू ॥ अतोऽन्याऽपि ह्येकेषामुभयोः ॥ १७ ॥

'तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्याम्' इत्येकेषां शाट्यायनशाखिनां वचनस्य विद्यानिष्पत्त्यर्थाग्निहोत्रादिसाधुकृत्याया अन्या प्रबलकर्मान्तरप्रतिबद्धफला विद्याऽनुगुणान्नारोग्यचित्तशुद्ध्यादिजननयोग्यतया

तामस्य देहवियोगकले निवर्तयिष्यामीति परमेश्वरस्सङ्कल्पयति स तस्या अश्लेषः । एवं साक्षात्कारोदयकाले तत्प्राचीनपापकृत्यायाः प्रागारभ्यसतीं तत्प्रतिफलजननार्हतामप्यस्य निवर्तयिष्यामीति सङ्कल्पयति स तस्याविनाश इति । एवं तर्हि साधुकृत्यायामप्यश्लेषविनाशशब्दयोरेवमेवार्थौ भवेदिति द्विषद्गामित्ववचनवत्सुहृद्गामित्ववचनस्यापि विषयलाभस्तुल्यः । तस्माद्वक्तव्यमिदं सुहृद्गामित्ववचनस्यैव विशिष्य विषयप्रश्नस्य कोऽभिप्राय इति । अपि च द्विषद्गामित्ववचनस्यैवात्र विषयः प्रष्टुं युक्तः । 'सुहृद्गामित्ववचनस्य तु विषयः प्रागेवोक्तः पातेत्विति । स एव विषयोऽनेनापि सूत्रेण प्रदर्शयिष्यते । उच्यते अयमभिप्रायो भाष्यकारस्य । दुष्कृतं द्विविधं विद्यारंभात्प्राचीनं तदनन्तरभावि च । तत्राद्यं दत्तफलकृतप्रायश्चित्तप्रारब्धव्यतिरिक्तं सर्वं विद्यया विनाश्यम् द्वितीयं द्विविधं बुद्धिपूर्वमबुद्धिपूर्वं च । बुद्धिपूर्वमपि द्विविधम् । 'अथ ये मानुषा लोके स्वेच्छाविधृतविग्रहाः । भावातिशयसंपन्नाः पूर्वसंस्कारसंयुताः । विरक्ता वानुरक्ता वा स्त्रियादिविषयेष्वपि । पापैर्न ते विलिप्यन्ते पद्मपत्रमिवांभसा । तेषां मदात्मविज्ञानविशुद्धानां विवेकिनाम् । मत्प्रसादाद्विशुद्धानां दुःखमाश्रमरक्षणम् । नास्ति कृत्यमकृत्यं च समाधिर्वा परायणम् । न विधिर्न निषेधश्च तेषां मम यथा तथे'त्यादिशिवभूतप्राशस्त्यवादप्रतीतार्थपरिग्रहेण वैराग्यात्प्रच्युतैर्यथाकाममिह भोगान्भुक्त्वान्ते शाश्वतं शिवपदमपि प्राप्स्याम इति धिया, विद्यायामपि निष्ठावद्भिः शश्वदासेव्यमानमेकं कदाचिदनादिदृढवासनाशेषोन्मेषाज्जायमानं प्रामादिकमपरम् । तत्राद्यमशेषवचनस्य विषयः । द्वितीयं नाविरतो दुश्चरितादिति वचनस्य । तृतीयस्य महाफलार्थमाप्रायणं सर्वविषयवैमुख्येन विद्यानुष्ठाने प्रवृत्तः परमास्तिको योगी यथोक्तं प्रायश्चित्तं कुर्यादेव । यद्यनुशयानस्यापि तस्य प्रारब्धसमाप्तिकालोपनिपातात्प्रायश्चित्तावसरो न भवेत्तदा, तद्दुष्कृतमवशिष्यत इति तद्द्विषद्गामित्ववचनस्य विषयः । नैवं सुहृद्गामित्ववचनस्य विषयत्वयोग्यं प्रारब्धसमाप्तिकालेऽवशिष्यमाणं किंचित्सुकृतं संभवति । न च 'पाते त्वि'ति सूत्रोक्तमारोग्यादिफलकतया विद्यानुगुणं सुकृतमस्य विषयः स्यादिति वाच्यम् । अग्निहोत्रादिकर्मणां विद्यासंपादनेनेवारोग्यादिफलककर्मणामपि विद्योपयोग्यारोग्यसंपादनेन चरितार्थतयावशेषायोगादिति । एवं प्रागुक्ताक्षेपेण प्रवृत्तायां शङ्कायामिदं सूत्रम् । सू० ॥ अतोऽन्यापि ह्येकेषामुभयोः ॥ १७ ॥ विद्यारंभात्प्राक्पश्चाच्चान्नारोग्यचित्तशुद्ध्यादिजननयोग्यतया विद्यानुगुणफलानि यानि कर्माणि तानि न विद्यामाहात्म्याद्विनश्यन्ति न श्लिष्यन्ति वा । तानि द्विविधानि प्रबलकर्मान्तरप्रतिबद्धानि तदप्रतिबद्धानि च । तत्राप्रतिबद्धानि स्वस्वफलं दत्त्वा नश्यन्तीति नावशिष्यन्ते । यानि तु प्रतिबद्धफलानि तानि सुहृद्गामित्वव-

विद्याऽनुगुणफलत्वात् विद्ययाऽप्यविनष्टा । पूर्वोत्तरयोरुभयोरपि कर्मराश्योरस्त विषयः ॥

सू ॥ यदेव विद्ययेति हि ॥ १८ ॥

'यदेव विद्यया' करोति' इत्यत्र कर्मफलाप्रतिबन्धस्योद्गीथविद्याफलत्वोक्त्या प्रबलकर्मान्तरेणान्यकर्मणां फलप्रतिबन्धसद्भावोऽवगम्यते । अतो विद्यानुगुणकर्मणां फलप्रतिबन्धोच्छेदायाप्यग्निहोत्रादिकमनुष्ठेयमिति भावः ॥

इति अग्निहोत्राद्यधिकरणम् ॥ १२ ॥

अथ इतरक्षपणाधिकरणम् ॥ १३ ॥

सू ॥ भोगेन त्वितरे क्षपयित्वाऽथ संपद्यते ॥ १९ ॥

इह विद्यावतामधिकारपदे स्थितानां तद्व्यतिरेकेण मुक्तिफलमस्ति न वेति चिन्तायां प्रारब्धभोगाय 'बहुजन्मस्वीकारे पूर्वविद्यायां लुप्तायां यत् कर्म क्रियते, तदपि फलभोगहेतुर्भवति । अतो जन्मपरम्परायाः संभवान्न तेषां

चनस्य विषय इति भावः । प्रबलकर्मान्तरप्रतिबन्धसंभवे प्रमाणप्रदर्शनार्थं । सूत्रम् । सू० ॥ यदेव विद्ययेति हि ॥ १८ ॥ प्रतिबन्धसद्भावोऽवगम्यत इति । ननु संभवतु प्रतिबन्धकं कर्म तद्विद्याननुगुणत्वात्प्राचीनं नश्यत्युत्तरं न श्लिष्यतीति न । तेन प्रतिबन्धसंभव इति चेत् न । प्रारब्धस्यैव कस्यचित्प्रतिबन्धकत्वसंभवादिति भावः । अतो विद्यानुगुणकर्मणामिति । विद्यासहकारितया यदग्निहोत्रादिकमनुष्ठीयते तस्य शक्यप्रतिबन्धोच्छेदोऽपि फलमित्याशयः ॥

इति अग्निहोत्राद्यधिकरणम् ॥ १२ ॥

अथ इतरक्षपणाधिकरणम् ॥ १३ ॥

सू० ॥ भोगेन त्वितरे क्षपयित्वाथ संपद्यते ॥ १९ ॥ एवं विदुषामाप्रायणं निरन्तरं परमप्रियशिवचिन्तारूपं तदानुषङ्गिकं पापक्षयरूपं चैहिकं फलं चिन्तितम् । अथ तदुपरितनीं फलपरंपरामुत्तरपादैश्चिन्तयितुं विदुषां तत्प्राप्तिनियमोऽनेनाधिकरणेन व्यवस्थाप्यते । विद्यायोनिशरीरावसानं येषां प्रारब्धं तेषां विद्याफलप्राप्तिरस्तु नाम । येषामाधिकारिकाणामन्येषां वानेकशरीरानुयायिप्रारब्धं न तेषां तत्प्राप्तिस्संभवति । जन्मान्तरस्य पूर्वसंस्कारप्रमोषापादकतया विद्याविहीनैस्तैश्शरीरान्तरे क्रियमाणकर्मणां बन्धहेतुत्वेन ततो जन्मपरंपराया एव प्राप्तिः । न च तेषां जन्मान्तरसंस्कारप्रमोषहेतुर्न भवतीति कल्पनीयम् । दृष्टनियमसङ्कोचकल्पनाकारणाभावात् । न च यावन्न विमोक्ष्य इति

नयमणिमालायाम्

अथ अग्निहोत्राद्यधिकरणम् ॥ १२ ॥

सू० ॥ अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ॥ १६ ॥ अतोन्यापि ह्येकेषामुभयोः ॥ १७ ॥ यदेव विद्ययेति हि ॥ १८ ॥

विद्यानुष्ठानवता कर्तव्यं चाग्निहोत्रादि । सुकृतत्वेन कृतस्याप्यश्लेषस्यापि शिष्टत्वात् ॥ ३५१ ॥

कर्तव्य एव सर्वोऽप्याश्रमधर्मोऽग्निहोत्रादि । तस्याश्लेषाभावाद्यः खलु विद्याफलायैव ॥ ३५२ ॥

इति अग्निहोत्राद्यधिकरणम् ॥ १२ ॥

मुक्तिः । इति प्राप्ते ब्रूमः । प्रारब्धकर्म स्वफलं भोजयितृ केवलम् । न तु तेषां पूर्वार्जितविद्यालोपहेतुः, अतस्तेषां मुक्तिरेव । न जन्मपरम्परा, कारणाभावात् सुषुप्तिव्यवधानवत् जन्ममरणव्यवधानं न तेषां विद्यालोपहेतुरिति ॥

इति इतरक्षपणाधिकरणम् ॥ १३ ॥

इति श्रीकण्ठशिवाचार्यविरचिते ब्रह्ममीमांसाभाष्ये
चतुर्थाध्यायस्य प्रथमः पादः ॥ ४ ॥ १ ॥

प्रारब्धकर्मविमोक्षावधिश्रवणात्तथा कल्पनं तस्य शरीरविमोक्षावधिपरत्वात् 'धूत्वा शरीर'मिति श्रुत्यन्तरदर्शनात् । न च तत्र शरीरग्रहणं प्रारब्धकार्ययावच्छरीरपरमेकवचनश्रवणात् । तदविवक्षाकल्पने प्रमाणाभावात् । 'अस्माच्छरीरात्समुत्थाये'ति श्रुत्यन्तरेऽस्मादिति विशेषणेन विद्यायोनिशरीरस्यैव विवक्षितत्वाच्च । अन्यथा तद्वैयर्थ्यात् । तथा च येषामनेकशरीरानुयायिप्रारब्धानां विद्यायोनिशरीरावसाने मुक्तिर्न भवति तेषां तया विद्यया मुक्तिर्न संभवत्येव । तथाच प्रारब्धस्यानेकशरीरानुयायित्वशङ्कया कस्यापि विद्यानुष्ठाने प्रवृत्तिश्च न संभवतीति पूर्वः पक्षः। सिद्धान्तस्तु मुक्त्यर्थविद्यानुष्ठानप्रतिपादकबहुशास्त्रप्रामाण्यात् 'तस्य तावदेवे'ति विवक्षितावध्यवसाने मुक्त्यवश्यंभावप्रतिपादनावधारणप्रामाण्याच्च 'यावन्न विमोक्ष्ये'इत्यस्य प्रारब्धकर्मावधिपरत्वं 'धूत्वा शरीर'मित्यत्र 'अस्माच्छरीरा'दित्यत्रच शरीरवदस्य प्रारब्धकार्यशरीरसामान्यपरत्वम् । अस्मादिति विशेषणस्य 'अस्थिस्थूणं स्नायुबन्धं मांसशोणितलेपनम् । चर्मावनद्धं दुर्गन्धिपूर्णं मूत्रपुरीषयोः । जराशोकसमाविष्टं रोगायतनमातुरम् । रजस्वलमनित्यं च भूतावासमिमं त्यजे'दिति स्मृतिप्रसिद्धत्याज्यत्वहेत्वनुभवसिद्धहेयत्वप्रदर्शनार्थत्वं च विदुषां जन्मान्तरस्य स्मृतिप्रमोषानापादकत्वं च कल्पनीयम् । अतो विद्यया फलप्राप्तिर्नियतैवेति ॥

इति इतरक्षपणाधिकरणम् ॥ १३ ॥

इति श्रीशिवातिवादिमूर्द्धन्यशिवदर्शनस्थापनधुरन्धरसकलदेवभूदेवप्रतिष्ठापकश्रीमचिन्नबोम्मभूपालकहृदयकमलकुहरविहरमाणश्रीसाम्बशिवप्रेरितस्य श्रीभरद्वाजकुलजलधिकौस्तुभश्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पय्यदीक्षितस्य कृतौ श्रीकण्ठशिवाचार्यविरचितब्रह्ममीमांसाभाष्यव्याख्यायां शिवार्कमणिदीपिकाख्यायां व्याख्यायां चतुर्थस्याध्यायस्य प्रथमः पादः ॥ ४ ॥ १ ॥

नयमणिमालायाम्

अथ इतरक्षपणाधिकरणम् ॥ १३ ॥

सू० ॥ भोगेन त्वितरे क्षपयित्वाथ संपद्यते ॥ १९ ॥

विदुषामधिकारपदे स्थित्वा बहुजन्मभोगजुषाम् । बहुजन्मपरंपरया विद्यालोपान्न मुक्तिः स्यात् ॥ ३५३ ॥
मरणेन व्यवधानं न भवति तेषां सुषुप्त्येव । विद्याप्रमोषहेतुस्तस्मान्मुक्तिर्भवेन्नियता ॥ ३५४ ॥

इति इतरक्षपणाधिकरणम् ॥ १३ ॥

इति श्रीमदप्पय्यदीक्षितकृतौ अधिकरणसारसङ्ग्रहे नयमणिमालायां
तृतीयपरिच्छेदे चतुर्थस्याध्यायस्य प्रथमः पादः ॥ ४ ॥ १ ॥

॥ श्रीः ॥

शिवाभ्यां नमः ।

श्रीकण्ठाचार्यकृतौ

ब्रह्ममीमांसाभाष्ये

अथ चतुर्थाध्यायस्य द्वितीयः पादः॥

अथ वाक्सम्पत्त्यधिकरणम् ॥ १ ॥

सू ॥ वाङ्मनसि दर्शनाच्छब्दाच्च ॥ १ ॥

सू ॥ अत एव च सर्वाण्यनु ॥ २ ॥

पूर्वमुपासकस्योपासनव्यवस्थानादिकमुक्तम् । इह पादेऽस्य शरीरादुत्क्रान्तिर्निरूप्यते । 'अस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायाम्' इति श्रुतौ प्रयतो वागादीनां मनसि लयोऽवगम्यते । अयमुपपन्नो न वेति संशयः । किं प्राप्तम् ? कार्यस्य ह्युपादाने लयः । मृद्घटादौ व्याप्तिदर्शनात् । वागादीनां ब्रह्मोपादानं न मनः, अतोऽस्मिन्नेव

शिवार्कमणिदीपिकायाम्

अथ तुरीयस्याध्यायस्य द्वितीयः पादः ॥

अथ वाक्सम्पत्त्यधिकरणम् ॥ १ ॥

अध्यायादौ पादचतुष्टयार्थानुक्रमणेन सूचितां वृत्तवर्तिष्यमाणयोः पादयोः सङ्गतिं स्मारयति—पूर्वत्रेति । उपासनाव्यवस्था आवृत्त्यादिरूपा । आदिशब्देनासननियमादिकं गृह्यते । अस्य शरीरादुत्क्रान्तिरिति । उपासकेन हि स्वोत्क्रान्तिप्रकारोऽपि चिन्तनीयः । उत्क्रान्तेर्गत्युपक्रमत्वात् 'नैते सृती पार्थ जानन्योगी मुह्यति कश्चने'ति स्मृत्यां 'तच्छेषगत्यनुस्मृतियोगाच्चे'ति सूत्रेण च उपासनाकाले गतेरप्यनुस्मरणीयत्वप्रतिपादनात् । अतस्तदर्थमुत्क्रान्तिप्रकारो निरूप्यत इति भावः । सू० ॥ वाङ्मनसि दर्शनाच्छब्दाच्च ॥ १ ॥ अत एव च सर्वाण्यनु ॥ २ ॥ वागादीनामिति । 'इन्द्रियैर्मनसि सम्पद्यमानै'रिति द्वितीयसूत्रोदाहरणवाक्यनिर्दिष्टानि चक्षुरादीन्यपि संयोज्यादिग्रहणं कृतम् । लयोवगम्यत इति । 'सता सोम्य तदा सम्पन्नो भवती'त्युक्तायास्सम्पत्तेः 'स्वमपीतो भवती'ति लयार्थेनापीतिना निर्देशादिहापि सम्पत्तिर्लयोऽवगम्यत इति भावः । अप्रकृतित्वात्संपत्तिश्रुतेश्च संशयः । अतस्तस्मिन्नेवेति । न च वचनबलादप्रकृतौ गवादीनां लयोऽस्त्विति शङ्कनीयम् । 'प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ती'ति वागादीनामुपक्रमणश्रवणविरोधेन मरणकाले लयाभ्युपगमायोगात् । न च तर्हि वागादिशब्दानां वागादिवृत्तिलक्षकत्वमस्त्विति वाच्यम् । तत्राप्यनुपपत्तेस्तुल्यत्वात् । वागादिप्रकृतिकानां वृत्तीनामप्रकृतौ मनसि लयासंभवात् । तस्मादिह सम्पत्तिशब्देन संयोगमात्रं कथंचिद्वा-

तेषां लयो युक्तः ॥ इति प्राप्तेऽभिधीयते । 'अस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि संपद्यते' इति 'इन्द्रियैर्मनसि संपद्यमानैरि'ति च वचनादुत्क्रान्तौ मनसः प्रागेव वागादीनामुपरमदर्शनाच्च वाक् मनसि प्रथमं संपद्यते । ततः सर्वाणीन्द्रियाणि मनसि संपद्यन्ते । यदुक्तमुपादान एव लय इति तन्न । स्वरूपलयस्यैवोपादानापेक्षा । वागादीनां मनसि न स्वरूपलय उच्यते, किंतु वृत्तिलय एव । यथा जलमध्ये क्षिप्तस्याङ्गारस्य प्रकाशादिवृत्तिलयः, तथा अनुपादानेऽपि मनसि वागादीनां वृत्तिलयो युक्त एव । वृत्तिमतो वागादेर्लयश्रुत्या वृत्तिलयो लक्ष्यते । वृत्तिवृत्तिमतोरभेदोपचारादिति ॥

इति वाक्संपत्त्यधिकरणम् ॥ १ ॥

अथ मनःसंपत्त्यधिकरणम् ॥ २ ॥

सू ॥ तन्मनः प्राण उत्तरात् ॥ ३ ॥

'मनः प्राणे' इति वागादिसर्वेन्द्रिययुक्तस्य मनसः प्राणे लयः श्रूयमाणः की-

---

च्यमिति भावः । 'शब्दा'दिति हेतुं सूत्रद्वयनिर्दिष्टं सकलबाह्येन्द्रियसाधारण्येन व्याचष्टे— अस्य सोम्येति । 'दर्शना'दिति हेतुमपि व्याचष्टे—उत्क्रान्ताविति । हेतुद्वयस्यापि साधारण्ये वाच इन्द्रियान्तराणां च सूत्रद्वयेन पृथङ्निर्देशः किमर्थमित्याकाङ्क्षायां तत्प्रयोजनमाह—प्रथममिति । सर्वेन्द्रियसाधारणे मनस्सम्पत्तिवचने सत्यपि विशिष्यवाक्यान्तरप्रवृत्तिस्तत्सम्पत्तिप्राथम्यविवक्षयेति भावः । किन्तु वृत्तिलय इति । सम्पत्तिशब्दस्य संयोगार्थत्वपक्षेऽपि तस्यात्र न संयोगमात्रमर्थः किन्तु वागादिवृत्तिहेतुसंयोगभिन्नस्तद्वृत्तिलयहेतुस्संयोग इति वक्तव्यम् । मनसि वृत्तिमत्त्वेव वागादिवृत्तीनामुपरमदर्शनात् । तदनुवादित्वाच्चास्य वाङ्मनसीत्यादिशब्दस्य । तथा च वाग्वृत्तिपरामर्शस्य तल्लयपरामर्शस्य चावश्यं भावाद्यथादृष्टानुवादिनि वाक्ये 'वाक्संपद्यत' इत्यादेर्दर्शनयोग्यवागादिवृत्तिलयपरत्वमेवाङ्गीकर्तुं युक्तं । न तु तदयोग्यवागादीन्द्रियमनस्संयोगपरत्वं तस्य चेद्वृत्तिलयस्य वागाद्यधिकरणस्य मनोऽधिकरणकत्वं न संभवति । 'कामं मनसी'ति निर्देशस्तत्संयोगाधीनत्वमात्रेणौपचारिकोऽस्तु । यथाग्निज्वाला जले शाम्यतीत्यत्र जल इति निर्देश इति भावः । अत एव 'दर्शनाच्छब्दाच्चे'ति पूर्वोक्तहेत्वोरेव चक्षुरादीनीन्द्रियाणि वाचमनु वाक्सम्पत्त्यनन्तरं मनसि सम्पद्यत इति द्वितीयसूत्रस्यार्थः ॥

इति वाक्सम्पत्त्यधिकरणम् ॥ १ ॥

अथ मनस्सम्पत्त्यधिकरणम् ॥ २ ॥

सू० ॥ तन्मनः प्राण उत्तरात् ॥ ३ ॥ अतिदेशाधिकरणमिदमुत्तरवाक्यार्थनिरूप-

---

नयमणिमालायाम्

अथ वाक्सम्पत्त्यधिकरणम् ॥ १ ॥

सू० ॥ वाङ्मनसि दर्शनाच्छब्दाच्च ॥ १ ॥ अत एव च सर्वाण्यनु ॥ २ ॥

वाक्शब्दलक्षितानां बहिरक्षाणां न मनसि लयः । प्रज्ञोपादानानामनुपादानात्मके घटते ॥ ३५५ ॥

वृत्तिलयस्त्वेतेषामङ्गाराणामिवोदके तस्मिन् । दृष्टत्वात्संघटते श्रुत्यापि विवक्षितं तावत् ॥ ३५६ ॥

इति वाक्सम्पत्त्यधिकरणम् ॥ १ ॥

दश इति संशयः । वागादीनामनुपादाने मनसि वृत्तिलयोऽस्तु । मनसस्तु प्राणे स्वरूपलय एव, मनसः प्राणोपादानकत्वात् । 'अन्नमयं हि सोम्य मन आपोमयः प्राण' इति श्रुतेरन्नमयत्वेन पार्थिवस्य मनस आपोमयत्वेनोपादाने प्राणे स्वरूपलयस्याविरोधादिति पूर्वपक्षः । सिद्धान्तस्तु । पूर्ववन्मनसोऽपि प्राणे वृत्तिलय एव, 'मनः प्राण' इत्युत्तराद्वाक्यात् न स्वरूपलयः, प्राणस्य मुख्योपादानत्वाभावान्मनसस्तत्रानुत्पत्तेः । अतः प्राणे मनसो वृत्तिलय एव न्याय्यः ॥

इति मनःसंपत्त्यधिकरणम् ॥ २ ॥

अथ प्राणसंपत्त्यधिकरणम् ॥ ३ ॥

सू ॥ सोऽध्यक्षेण तदुपगमादिभ्यः ॥ ४ ॥

पूर्वत्र सर्वेन्द्रिययुक्तस्य मनसः प्राणे लयः प्रतिपादितः । इह तस्य प्राणस्य कुत्र लय इति संशयः ॥ किं तावत् प्राप्तम्? 'प्राणस्तेजसि' इति श्रुतेः प्राणस्य तेजसि

णार्थम् । अबन्नयोः प्रकृतिविकृतिभावश्रवणात् प्राणमनसोरबन्नप्रकृतिकत्वश्रवणाच्च । प्राणाकारपरिणतास्वप्सु स्वरूपलयस्संभवतीति अधिकाशङ्का । अदनीयस्योदनादेः साक्षात्पृथिवीप्रकृतिकत्वेन परम्परया प्रकृतिभूतास्वप्सु लयाभावात् प्राणरूपविकृत्यन्तरावष्टब्धानामपां कथंचिदपि मनःप्रकृतिकत्वासंभवाच्च मनसोऽपि वृत्तिलय एव । मनःप्राण इत्युत्तरवाक्यस्य पूर्ववाक्यसमानार्थत्वस्योचितत्वादिति तत्परिहारः ॥

इति मनस्सम्पत्त्यधिकरणम् ॥ २ ॥

अथ प्राणसम्पत्त्यधिकरणम् ॥ ३ ॥

सू० ॥ सोऽध्यक्षेण तदुपगमादिभ्यः ॥४॥ [1]उदाहरणवाक्यक्रमेणाधिकरणक्रम इति सङ्गतिः 'प्राणस्तेजसी'त्यत्र प्राणस्यापि वृत्तिलय एव न स्वरूपलय इति पूर्वन्यायेनैव सिद्धम् । तस्य जीवलीनस्य तेजसि लय उत प्रथममेव तेजसि लय इति श्रुतिद्वैविध्यात्संशये पूर्वपक्षः । 'प्राणस्तेजसी'ति श्रवणात् मध्ये जीवोपगमो न निवेशनीयः । नचै'वमेवेममात्मान'मिति श्रुतावन्तकाले जीवोपगमश्रवणात्तन्निवेश इति वाच्यम् । तेजसि लीनस्य प्राणस्य तेजसा सह जीवोपगमेऽपि तदुपपत्तेः । न हि सर्वेषां प्राणानां द्वारविशेषमनन्तर्भाव्य साक्षादेव युगपज्जीवोपगमस्समर्थयितुं शक्यते । 'वाङ्मनसि सम्पद्यते मनः प्राण' इति पूर्ववाक्यानुरोधेन वागादीनां मनसश्च जीवोपगमस्य मनःप्राणलयद्वारकत्वस्यावश्यवक्तव्यत्वात् । एवं प्राणस्याऽपि जीवोपगमस्तेजोलयद्वारकोऽस्तु । एतेन 'सहै-

---

नयमणिमालायाम्

अथ मनस्सम्पत्त्यधिकरणम् ॥ २ ॥

सू० ॥ तन्मनः प्राण उत्तरात् ॥ ३ ॥

मनसस्तु प्राणे स्यात्स्वरूपविलयो यथाश्रवणम् । अन्नमयस्य हि तस्य प्राणोपादानमंबुमयः ॥ ३५७ ॥
वृत्त्युपरम एवात्राप्यनुपादानत्वसाम्येन । नह्यंबुविकारत्वेऽप्यस्योपादानतास्ति मुख्यायाः ॥ ३५८ ॥

इति मनस्सम्पत्त्यधिकरणम् ॥ २ ॥

---

(१) 'विषयवाक्यक्रमादधिकरण' इति ख. पाठः ।

लय इति प्राप्ते ब्रूमः। स प्राणस्ततो जीवेनाध्यक्षेण संयुज्यते, न तस्य तेजसि लयः। 'एवमेवेममात्मानमन्तकाले सर्वे प्राणा अभिसमायन्ति' इत्यादिश्रुतिषु तस्य जीवोपगमनादिश्रवणात् 'प्राणस्तेजसि' इति श्रुतिक्रमविरोधं परिहरति—

सू ॥ भूतेषु तच्छ्रुतेः ॥ ५ ॥

'प्राणस्तेजसि' इति भूतान्तरसंसृष्टं तेजोऽभिधीयते। ततः प्राणो जीवेन सह भूतेषु संयुज्यत इति न विरोधः ॥

सू ॥ नैकस्मिन् दर्शयतो हि ॥ ६ ॥

न तेजोमात्रे प्राणलयः, त्रिवृत्करणश्रुतिर्हि भूतान्तरसंसृष्टिं दर्शयति। अतो

तावस्मिन्शरीरे वसतस्सहोत्क्रामत' इति जीवप्राणयोस्सहवासोत्क्रमणश्रवणाज्जीवमुपगतस्य प्राणस्य तेजसि लयः कल्पनीय इति शङ्कापि निरस्ता। तेजसि लीनस्य जीवोपगमेऽपि प्राणस्य स्थितिकाले जीवेन सह वासस्य उत्क्रमणकाले तेन सहोत्क्रमणस्य चोपपत्तेः। एतेनैव यमुनाया गङ्गया सह संयुज्य सागरगमनेऽपि यथा यमुना सागरं गच्छत्येव तथा प्राणस्य जीवेन संयुज्य तेजसि लयेऽपि प्राणस्तेजसि लीयत एवेति न 'प्राणस्तेजसी'ति श्रुतिविरोध इत्यपि शङ्का निरस्ता। उक्तदृष्टान्तेनैव वैपरीत्यस्यापि समर्थयितुं शक्यत्वादिति। सिद्धान्तस्तु प्राणः प्रकरणगणाध्यक्षेण जीवेन संयुज्यैव तेजसि लीयते। जीवोपगमतत्सहवासतत्सहोत्क्रमणश्रवणात्। ननु 'प्राणस्तेजसी'ति श्रुत्यनुसारेण वैपरीत्यं वा किमिति न कल्प्यत इत्याशङ्कायामिदं सूत्रम् ॥ सू० ॥ भूतेषु तच्छ्रुतेः ॥ ५ ॥ तेजसीति न तृतीयभूतमात्रं निर्दिश्यते किन्तु भाविदेहारम्भार्थं जीवपरिष्वङ्गकानि सूक्ष्मदेहरूपाणि 'तदनन्तरप्रतिपत्तौ रंहति संपरिष्वक्त' इत्यत्र निरूपितानि सर्वाणि भूतान्युच्यन्ते। तत्सम्पत्तिः प्राणस्य जीवेन सहेति युक्तम्। 'सहैतावस्मिन्शरीरे वसत' इत्यादि श्रुत्यनुरोधादिति भावः। ननु बाह्येन्द्रियव्यापारोपरमानन्तरमपि मनोव्यापारदर्शनात् 'वाङ्मनसि सम्पद्यते, इन्द्रियैर्मनसि संपद्यमाने'रिति श्रुतिः यथा च बाह्याभ्यन्तरज्ञानोपरमानन्तरमपि श्वासव्यापारदर्शनात् 'मनः प्राण' इति श्रुतिः तथा श्वासरूपप्राणव्यापारोपरमानन्तरमपि देहे क्वचिदौष्ण्यदर्शनात् 'प्राणस्तेजसी'ति श्रुतिस्तदनुवादिन्यस्तु। अतस्तेजश्शब्दस्य सूक्ष्मदेहापन्नसर्वभूतलक्षकत्वं न वक्तव्यमित्याशङ्कानिराकरणार्थं सूत्रम् ॥ सू० ॥ नैकस्मिन्दर्शयतो हि ॥ ६ ॥ 'तासां त्रिवृतं त्रिवृतमेकैकां करवाणी'ति त्रिवृत्करणश्रुतिः 'समेत्यान्योन्यसंयोगं परस्परसमाश्रयाः। महदाद्या विशेषान्ता अण्डमुत्पादयन्ति त' इति स्मृतिश्च सर्वेषामपि भूतानां प्रागेव त्रिवृत्कृतत्वं दर्शयत इति तेजसीत्यस्य तावत्केवलतेजःपरत्वं वक्तुं न शक्यते। 'जीवस्य सञ्चरतः पृथिवीमय आपोमयो वायुमय आकाशमयस्तेजोमय' इति श्रुतिः 'अण्व्यो मात्रा विनाशिन्यो दशार्धानां तु याः स्मृताः। ताभिस्सर्वमिदं सर्वं संभवत्यनुपूर्वश' इत्याद्या स्मृतिश्च सर्वभूतपरिष्वङ्गं दर्शयतः। इहापि जीवस्य गत्युपपादनाय सर्वभूतपरिष्वङ्गोऽपि प्रदर्शनीयः। अतस्तेजःपदं सूक्ष्मदेहापन्नसर्वभूतपरमिति तेजस्येकस्मिन्नेव लयोऽत्र न विवक्षितः। 'प्राणस्तेजसी'त्यस्य दृष्टानुवा-

भूतेषु जीवेन सह प्राणः संपद्यत इति न श्रुतिविरोधः ॥

इति प्राणसंपत्त्यधिकरणम् ॥ ३ ॥

अथ सृत्युपक्रमाधिकरणम् ॥ ४ ॥

सू ॥ समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य ॥ ७ ॥

इह निरूप्यमाणोत्क्रान्तिरर्चिरादिगत्युपक्रमात् प्राग्विद्वदविदुषोः समाना उत भिन्नेति संशयः। किं तावत् प्राप्तम्? संसारफलस्य मोक्षफलस्य चातिवैषम्यादज्ञानिनोर्विसदृश्येवोत्क्रान्तिरिति । एवं प्राप्ते ब्रूमः—अर्चिरादिमार्गोपक्रमात् प्राग्विद्वदविदुषोः समानैवोत्क्रान्तिः। ज्ञानिनस्तु मूर्धन्यनाड्या निष्क्रान्तिरमृतत्वं च, नेतरस्य इति वैषम्यम् ॥ "शतं चैका च हृदयस्य नाड्यस्तासां

दित्वं तु प्राणव्यापारोपरमानन्तरमप्यनुपरतव्यापारस्य व्यापारोपरमसन्निकर्षात्सङ्कुचितवृत्तेस्सूक्ष्मदेहस्य तेजस्संवलनप्रयुक्तं क्वाचित्कौष्ण्यदर्शनमनुवदतीत्येवमपि समर्थयितुं शक्यते इति भावः ॥

इति प्राणसम्पत्त्यधिकरणम् ॥ ३ ॥

अथ सृत्युपक्रमाधिकरणम् ॥ ४ ॥

सू० ॥ समाना चासृत्युपक्रमादमृतत्वं च ॥ ७ ॥ एवं विदुषामुपासनाकाले चिन्तनीय उत्क्रान्तिप्रकारो निरूपितः। अस्याप्यविद्वत्साधारण्यात् विद्वदुत्क्रान्तौ विशेषेण भाव्यमित्याक्षेपात्सङ्गतिः । फलविशेषसिद्ध्यर्थं कारणविशेषाक्षेपणात् विशेषाश्रवणाच्च संशयः। उत्क्रान्तिर्हि विद्वदविदुषोः फलविशेषावाप्तौ कारणम् । तथा च सम्प्रतिपन्नात्कार्यविशेषादश्रुतोऽपि कारणे विशेषः कल्पनीयः । यथाग्निहोत्रज्योतिष्टोमरूपकारणविशेषात्तत्तत्कार्ये स्वर्गे विशेषः एवमविदुषामपि तत्तल्लोकावाप्तिरूपफलविशेषादुत्क्रान्तौ विशेषः स्यादिति चेत् सोप्यस्तुनामेति पूर्वःपक्षः । गत्युपक्रमपर्यन्तं विशेषाभावेऽपि ततः प्रभृति श्रुताद्विशेषादेव फलविशेषोपपत्तेर्न ततः प्रागुत्क्रान्तावश्रुतो विशेषः कल्पनीय इति सिद्धान्तः । 'समानाचेति' चकारोऽवधारणार्थः । गत्युपक्रमप्रभृतिकारणे विशेषं तत्फलविशेषञ्च दर्शयितुममृतत्वञ्चेति सूत्रशेषः। मूर्धन्यनाड्या गतिश्चकारेण समुच्चीयते। तथा च मूर्धन्यनाड्या गतिः कारणविशेषः तस्यामृतत्वं फलविशेष इत्यर्थः । एवमविदु-

नयमणिमालायाम्

अथ प्राणसम्पत्त्यधिकरणम् ॥ ३ ॥

सू० ॥ सोध्यक्षेण तदुपगमादिभ्यः ॥ ४ ॥ भूतेषु तच्छ्रुतेः ॥ ५ ॥ नैकस्मिन्दर्शयतो हि ॥ ६ ॥

प्राणस्य तेजसि लयो यथा श्रुतिस्यात्तद्दृष्यदृष्टेश्च । मध्ये जीवनिवेशे न मानमीक्षामहे किंचित् ॥ ३५९ ॥

तेजःपदोपलक्षितदेहात्मकभूतसूक्ष्मयुते । जीवे श्रुत्यन्तरतः सेन्द्रियमनसोऽस्य वृत्तिलयः ॥ ३६० ॥

इति प्राणसम्पत्त्यधिकरणम् ॥ ३ ॥

मूर्धानमभिनिस्सृतैका । तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति॥" इति श्रुतेः । अतः प्रागुत्क्रान्तिः समानैव ॥

इति सृत्युपक्रमाधिकरणम् ॥ ४ ॥

अथ तदपीत्यधिकरणम् ॥ ५ ॥

सू ॥ तदापीतेः संसारव्यपदेशात् ॥ ८ ॥

पूर्वमुपपादिता मूर्धन्यनाड्या विदुष उत्क्रान्तिः, ततोऽर्चिरादिगतिरिति । इह देहादुत्क्रान्तस्य विदुषोऽर्चिरादिगतिरुपपद्यते न वेति सन्देहः । "यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत ॥"

षामपि नाडीविशेषेण तद्गतिरेव तत्फलविशेषावाप्तौ कारणम् । अत एव महाभारते मोक्षधर्मे फलभेदानुसारेण उत्क्रमणे नाडीभेदाः प्रपञ्चिताः ॥

इतिसृत्युपक्रमाधिकरणम् ॥ ४ ॥

अथ तदपीत्यधिकरणम् ॥ ५ ॥

सू० तदापीतेः संसारव्यपदेशात् ॥ ८ ॥ एवं विदुषामुत्क्रान्तिमङ्गीकृत्य तत्र कारणविशेषेण भाव्यमित्याक्षेपः समाहितः । इह तेषां नोत्क्रान्तिर्नवा तत्पूर्विका गतिरित्याक्षिप्य समाधीयत इति सङ्गतिः । श्रुतिद्वैविध्यात्संशये पूर्वपक्षः । वागादीनां मनःप्रभृतिष्वप्रकृतित्वाद्वृत्तिलयमात्रमित्यस्त्वेतत् । तेजः परस्यां देवतायामित्युक्तिस्तु स्वरूपलयो भवितुमर्हति । न च वाच्यं विद्वदविद्वत्साधारण्येनोत्क्रान्तिप्रकार उच्यते अविद्वत्संबन्धिनां वागादीनां स्वरूपलयो वक्तुं न शक्यते अतो विद्वत्संबन्धिनामपि तदानीं वृत्तिलय एव वाच्यः एकशब्दोत्पातत्वादिति । 'वाङ्मनसि संपद्यत' इत्यादेर्विद्याप्रकरणाम्नातत्वेन विद्वद्विषयत्वात् । अतो विदुषो वागादिमनःप्राणभूतसूक्ष्माणां प्रविलीनत्वेन तदपेक्षार्चिरादिगतिर्न संभवतीत्युपपत्तिसहिता 'अत्र ब्रह्मस्वमश्नुत' इति श्रुतिः प्रबलेत्यर्चिरादिगतिश्रवणं मुक्तिफलकेतरविद्याविषयं योजनीयम् । न चात्र परं ब्रह्म नास्ति येन तत्प्राप्त्यर्थं गत्यपेक्षा स्यादिति । सिद्धान्तस्तु सर्वत्र परविद्यासु परब्रह्मणःसत्त्वेऽपि देशविशेषस्थितस्य तस्य प्राप्तौ सत्यामेव देहबन्धापगमः । तत्प्राप्तिपर्यन्तं देहबन्धोऽनुवर्तत एव। विरजानदीमतिक्रम्य परब्रह्मलोकप्राप्तौ सत्यामेव कर्मबन्धक्षयोक्त्या तावत्पर्यन्तं तन्मूलसूक्ष्मदेहानुवृत्त्यवगमात् । अतस्तत्र विद्यायामर्चिरादिश्रवणं मुक्तिफलप्राप्त्यर्थमेव । मुक्तिफलकविद्याप्रकरणाम्नानात्तदपेक्षितत्वाच्च 'अथ मर्त्योऽमृतो भवती'ति वचनं वर्तमानसामी-

---

नयमणिमालायाम्

अथ सृत्युपक्रमाधिकरणम् ॥ ४ ॥

सू० ॥ समाना चासृत्युपक्रमादमृतत्वं च ॥ ७ ॥

उपपादितस्वरूपा नोत्क्रान्तिर्विद्वदविदुषोस्तुलया । अतिविसदृशफलभाजोस्साप्येवं विसदृशी युक्ता ॥ ३६१ ॥

गमनोपक्रमतः प्राक्तुल्यैवोत्क्रान्त्यवस्थैषा । विदुषस्तु सुषुम्नातो मूर्ध्नो निष्क्रान्तिरमृतभावत्वं च ॥ ३६२ ॥

इति सृत्युपक्रमाधिकरणम् ॥ ४ ॥

---

(१) 'तत्र विशेषेण भाव्यमित्याक्षिप्य समाहितम्' इति ख. पाठः ।

इति देहपातानन्तरमेवामृतत्वं श्रूयते । 'तेऽर्चिषमभिसंभवन्ति' इत्यर्चिरादिगतिश्च श्रूयते । एवमुभयश्रवणादयं सन्देहः । तत्र ब्रह्मणि लीनानां वागादीनां पुनरुत्पादासंभवान्मुक्तस्य गत्यनुपपत्तेरर्चिरादिगतिर्न मुक्तात्मनामिति प्राप्ते सिद्धान्त उच्यते । अर्चिरादिना ब्रह्मप्राप्तेः प्राक् शरीरसंबन्धव्यपदेशान्न संसारापगमः । अमृतत्ववचनमासन्नामृतत्वाभिप्रायम् । अत उत्क्रान्तस्यार्चिरादिगतिरुपपन्ना । यदुक्तं वागादिविलयात् तस्य गत्यनुपपत्तिरिति तत्राह—

सू ॥ सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ॥ ९ ॥

शरीरादुत्क्रान्तस्यापि सूक्ष्मशरीरमनुवर्तते । अन्यथा गत्यनुपपत्त्या चन्द्रसंवादाद्यनुपपत्तेः । श्रूयते हि पर्यङ्कविद्यायां देवयाने पथि विदुषश्चन्द्रमसा संवादः । 'ये वै के चास्माल्लोकात् प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति' इत्युपक्रम्य 'एतद्वै स्वर्गस्य द्वारं यश्चन्द्रमाः, तं यः प्रत्याह तमतिसृजते । अथ य एनं न प्र-

---

प्याभिप्रायमिति । पूर्वाधिकरणार्थानुवादभाष्ये अर्चिरादिगतेरुपपादितत्वोक्तिर्मूर्धन्यनाड्या निष्क्रान्तस्यामृतत्वफलोक्त्यर्थसिद्धस्यानुवादः । सन्देहभाष्ये देहादुत्क्रान्तस्येत्येतत्सन्देहकोटिमध्ये निवेशनीयम् । विदुषो देहादुत्क्रान्तस्य सतोऽर्चिरादिगतिरित्येतदुपपद्यते नवेत्यर्थः । पूर्वपक्षे देहमध्ये वाङ्मनस्सम्पत्त्याद्युत्क्रान्त्युपक्रमसत्त्वेऽपि देहाद्युत्क्रान्तेरभावात् । उपसंहारभाष्यस्याऽपि देहादुत्क्रान्तस्य सतोऽर्चिरादिगतिरुपपन्ना । देहादुत्क्रान्तिस्तत्पूर्विकार्चिरादिगतिश्चेत्युभयमुपपन्नमित्यर्थः । सूत्रे तदमृतत्वं देहादुत्क्रान्तस्य सतोऽर्चिरादिगतिपूर्वकमित्यध्याहारः । अपीतिः अप्ययो ब्रह्मणि लयः आपीतेः विरजानद्यतिक्रमणानन्तरभाविब्रह्मसायुज्यप्राप्त्युपक्रमपर्यन्तमित्यर्थः । संसारो देहमूलकर्मबन्धः तस्य व्यपदेशात् 'तत्सुकृतदुष्कृते विधूनुत' इति विधूननप्रतियोगित्वेन निर्देशादित्यर्थः । यद्वा । 'तेजः परस्यां देवताया'मित्यत्र तेजश्शब्दोक्तं वागादिकरणजातमनःप्राणभूतान्तसहितं सूक्ष्मदेहरूपं तेज आपीतेरनुवर्तत इत्यध्याहारः । तस्योक्त एवार्थः । तस्य च काकाक्षिन्यायेन हेतुनिर्देशेऽप्यन्वयः । आपीतेः सूक्ष्मदेहमूलकर्मव्यपदेशादित्यर्थः । पूर्वपक्षशङ्काबीजोत्तरत्वेनोत्तरसूत्रमवतारयति ॥ सू० ॥ सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ॥९॥ सूक्ष्मं शरीरं देहादुत्क्रान्तमनुवर्तत इत्यध्याहारः । प्रमाणतश्चन्द्रसंवादादिवाक्यरूपात्तथोपलब्धेः विदुष उत्क्रान्तस्य चन्द्रसंवादाद्युपयोगिदेहसंबन्धत्वेनोपलब्धेरित्यर्थः । चकारेणेदं समुच्चीयते । 'वाङ्मनसि सम्पद्यत' इत्यादिवाक्यं विद्याप्रकरणगतत्वेऽपि न विदुष एव 'वाङ्मनस्सम्पत्त्यादिप्रतिपादनपरं प्रतीयत' इत्यविशेषश्रवणात् विद्वदविद्वत्साधारण्येऽपि प्रयतो वाङ्मनसादिकं यस्यां परदेवतायां सम्पद्यते 'तत्त्वमसी'ति विद्योपयोगसत्वात् अन्यथा 'सता सोम्य तदा सम्पन्नो भवती'त्यादेः स्वापादिवाक्यजातस्यापि विद्वन्मात्रविषयत्वप्रसङ्गात् । किञ्च । 'तेजः परस्यां देवताया' मित्यत्र तेजश्शब्दार्थे पूर्ववाक्यनिर्दिष्टवाङ्मनःप्रभृतिसाहित्यमिव 'एवमेवेममात्मन'मित्यादिश्रुत्यन्तरप्राप्तजीवसाहित्यमपि विवक्षणीयम् । न च जीवस्य स्वरूपलयोऽस्ति । अतस्तं देशे व्यापारोपरममात्रपरत्वावश्यंभावादन्यत्रापि तथैव एकेन सम्पद्यत इति शब्देनोपात्तत्वादिति । तं यः प्रत्याहेति । चन्द्रप्रश्नस्य य उत्तरं वदति विद्वान् तं ब्रह्मलोकप्राप्त्यर्थमूर्ध्वदेशगमनाय

त्याह तमिह वृष्टिर्भूत्वा वर्षति स इह कीटो वा पतङ्गो वा शकुनिर्वा शार्दूलो वा सिंहो वा मत्स्यो वा परस्वान् वा पुरुषो वाऽन्यो वैतेषु स्थानेषु प्रत्याजायते यथाकर्म यथाविद्यं तमागतं पृच्छति कोऽसीति तं प्रति ब्रूयात्' इत्यादि। अतः शरीरादुत्क्रान्तस्य विदुषोऽर्चिरादिगतिरुपपन्ना ॥

सू ॥ नोपमर्देनातः ॥ १० ॥

अत उक्तन्यायात् 'अथ मर्त्योऽमृतो भवति' इत्यमृतत्ववचनं न देहसंबन्धोपमर्देन तदानीमेवामृतत्वं वदति ॥

सू ॥ अस्यैव चोपपत्तेरूष्मा ॥ ११ ॥

अस्य सूक्ष्मशरीरस्य क्वचिद्व्रियमाणत्वोपपत्तेश्च न तदुपमर्देन। उपलभ्यते ह्युत्क्रामतो विदुषोऽपि क्वचित् सूक्ष्मदेहगुण ऊष्मा, न स स्थूलदेहगुणः, अन्यत्रानुपलम्भात्। अतश्च गत्युपपत्तिः ॥

सू ॥ प्रतिषेधादिति चेन्न शारीरात्स्पष्टो ह्येकेषाम् ॥ १२ ॥

बृहदारण्यके 'तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुषो वा मूर्ध्नो वा अन्येभ्यो वा शरीरदेशेभ्यः तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति' इत्यादिवाक्यैरविदुषोऽप्युत्क्रान्त्यादिप्रकारमभिधाय 'इति तु कामयमानः' इत्यविद्वद्विषयं परिसमाप्य

विमुञ्चति यस्त्वविद्वान्नोत्तरं वदति तं यावत्संपातमुषितं तदत्यये मेघो भूत्वा वर्षजलेन सह मुञ्चतीत्यर्थः। 'वृष्टिर्भूत्वे'त्युक्ते वर्षणकालेऽपि चन्द्रस्य मेघानुप्रवेशन व्यापारोऽस्तीत्यवगम्यते। अथवा नात्र चन्द्रोऽनुवर्तते। वृष्टिः भूत्वा मेघः प्रादुर्भूय वर्षतीत्यर्थः। परस्वानारण्यो मृगविशेषः। सू० ॥ नोपमर्देनातः ॥ १० ॥ तदानीमेवेति। किन्तु पूर्वोक्तप्रकारेणासन्नामृतत्वं वदतीत्यर्थः। सू० ॥ अस्यैव चोपपत्तेरूष्मा ॥ ११ ॥ एवचकारौ भिन्नक्रमं योजयन्हेतोः पूर्वसूत्रनिर्दिष्टसाध्येनान्वयं दर्शयित्वा हेत्वसिद्धिपरिहारार्थत्वेनोष्मेतिपदं साध्याहारं व्याचष्टे—अस्येति। उत्क्रमणकाले क्वाचित्कोष्मदर्शनेन हेतुनोत्क्रममाणसूक्ष्मदेहसद्भावप्रतिपादनपरं सूत्रञ्चेत् 'सूक्ष्मं प्रमाणतश्चे'ति तत्सद्भावप्रतिपादकसूत्रसङ्गतत्वात् 'नोपमर्देने'ति सूत्रतः प्रागेवेदमकरिष्यत्। सू० ॥ प्रतिषेधादिति चेन्न शारीरात्स्पष्टो ह्येकेषाम् ॥ १२ ॥ अयमाशयः। 'तस्य ह्येतस्ये'त्यादिसन्दर्भेणाविरक्तस्योत्क्रान्तिमुक्त्वा विरक्तस्य प्राणानामुत्क्रान्तिः प्रतिषिध्यते। न च 'न तस्मात्प्राणा उत्क्रामन्ती'ति शाखान्तरपाठात्'तस्येतिसम्बन्धसामान्येविहितापष्ठ्यपि 'नटस्य शृणोती'तिवदपानार्थेति मुच्यमानान्न विशिश्लिष्यन्त इति तदर्थः इति वाच्यम्। उभयत्रापि तच्छब्दस्य शरीरपरामर्शित्वात्। बृहदारण्यक एव 'यत्रायं पुरुषो म्रियते उदस्मात्प्राणाः क्रामन्त्याहो ने'त्यार्तभागप्रश्नेने'ति होवाच याज्ञवल्क्योऽत्रैव समवलीयन्ते स उच्छ्वयत्याध्मातो मृतश्शेते' इत्यादि प्राणोत्क्रान्त्यपादानस्याध्मानेन वायुपूरणेन दृतिवदुच्छ्वयनस्य शरीरधर्मस्य कीर्तनात् जीवात्प्राणानामुत्क्रान्तेरप्रसक्तत्वेन तत्प्रतिषेधानुपपत्तेश्च। अतोऽर्चिरादिगतिश्चन्द्रसंवादस्सुकृतदुष्कृतविधूननमित्येतत्सर्वं सत्यलोकप्राप्त्य-

'अथाकामयमानो योऽकामो निष्काम आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येति' इति विदुष उत्क्रान्तिप्रतिषेधादत्रैव साक्षात् ब्रह्मप्राप्तिरिति चेन्न । विदुष उत्क्रममाणस्यार्चिरादिगमनाय प्रस्थितस्य प्राणास्तस्मान्न विश्लिष्यन्त इति ह्युच्यते 'न तस्य प्राणा उत्क्रामन्ति' इति । अयमर्थो माध्यन्दिनानां शाखायां स्पष्टोऽभिधीयते । 'योऽकामो निष्काम आप्तकाम आत्मकामो न तस्मात् प्राणा उत्क्रामन्ति' इति ॥

र्थविद्याविशेषफलं न तु मुक्त्यर्थब्रह्मविद्याफलमिति नेतव्यम् । ब्रह्मविदो मरणकाले क्वाचित्कोष्मदर्शनं तु तेजश्शब्दोक्तस्य सूक्ष्मदेहस्य परदेवतासम्पत्तेः प्राचीनत्वेनोपपद्यत इति । विदुष उत्क्रममाणस्येति । अयं भावः । आर्तभागप्रश्ने शारीरादुत्क्रान्तिर्न प्रतिषिध्यते किन्तु शरीरादेवोत्क्रान्तिप्रतिषेधस्याविद्वद्विषयत्वेनाविदुषः प्राणानां शरीरादुत्क्रान्तेः प्रतिषेद्धुमशक्यत्वात् । अविद्वद्विषयत्वं कथमवसीयत इति चेत् उत्तरसन्दर्भात् । उत्तरसन्दर्भेहि 'यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यं मनश्चन्द्रं दिशः श्रोत्रं पृथिवीं शरीरमात्मोषधीर्लोमानि वनस्पतीन्केशा अप्सु लोहितञ्च रेतश्च निधीयते क्वायं तदा पुरुषो भवती'त्यार्तभागप्रश्ने याज्ञवल्क्येनार्तभागेन च रहसि मन्त्रयित्वा पुण्यपापरूपकर्म तदाश्रयत्वेन निश्चितमिति तदनन्तरसन्दर्भे श्रुत्यैव प्रतिपादनात् । तत्र हि श्रूयते । तौ होत्क्रम्य मन्त्रयाञ्चक्राते तौ ह यदूचतुः कर्म हैव तदूचतुः अथ यत्प्रशशंसतुः कर्म हैव तत्प्रशशंसतुः पुण्यो वै पुण्येन कर्मणा भवति पापः पापेने'ति । न चा'पपुनर्मृत्युञ्जयती'ति पूर्ववाक्ये संसारतरणरूपं फलमुच्यते । तेन प्रकृतविद्वद्विषयत्वमुत्क्रान्तिप्रतिषेधस्यावसीयत इति वाच्यम् । अग्निर्वै मृत्युस्सोपामन्नसित्यपामन्नत्वेनोपासनमुक्त्वाहि तस्य फलमपपुनर्मृत्युं जयतीत्युच्यते तस्मादग्निजय एवात्र मृत्युजयो न संसारतरणम् । इतश्चात्र शरीरादेवोत्क्रान्तिः प्रतिषिध्यते । यतो यत्राऽयं पुरुषो म्रियत इति पूर्ववाक्ये पुरुषशब्देन प्रकृतस्सएव तस्मात्प्राणाउत्क्रामन्तीत्यत्र सर्वनाम्नापरामर्शनीयः । न च तत्र पुरुषशब्दस्य शरीरपरत्वं शङ्कनीयम् । 'यत्रास्य पुरुषस्याग्निं वागप्येती'त्युत्तरसन्दर्भे 'पृथिवीं शरीर'मिति प्रकृतपुरुषसंबधित्वेन शरीरस्य पृथक्कीर्तनात् । 'न चाकाशमात्मे'त्यात्मापि पृथक्कीर्त्यत इति वाच्यम् । तत्रात्मशब्दस्य मध्यमावयववाचित्वेन हृदयावकाशपरत्वात् । प्रसिद्धो हि मध्यमावयवेष्वात्मशब्द आनन्दमयवाक्यादिषु । 'तस्मात्स उच्छ्वयन्नाध्मात' इति निर्देशः शरीरशरीरिणोरभेदोपचारादिति नेतव्यः । शारीरात्प्राणानामुत्क्रान्तिरप्रसक्ता न प्रतिषिध्येतेति चेन्न । विद्वद्विषये "तस्य तावदेव चिर'मिति शरीरनाशकाले ब्रह्मसम्पत्तिवचनेन विदुषः प्राणानामपि स्थूलशरीरवियोगकाल एव विश्लेष इति शङ्कारूपप्रसक्तिसत्वात् । एवं प्रसक्त्या विशिष्य विदुषश्शरीरात्प्राणानामुत्क्रान्तिप्रतिषेधेनाविदुषस्तर्हि शरीरात्प्राणानामुत्क्रान्तिरस्तिकिमित्यविद्वद्विषयेऽपि इति शङ्कारूपप्रसक्तिसत्वाच्च । तस्मादर्चिरादिगतिश्रुतेरेवानुकूलोऽयं मार्ग इति विदुषः शरीरात्प्राणानां विश्लेषप्रतिषेध इति । ननु मूर्धन्यनाड्या निष्क्रम्यार्चिरादिमार्गेण ब्रह्मलोकप्राप्तिरूपममृतत्व'माभूतसंप्लवं स्थानममृतत्वं हि भाष्यत' इति स्मृतिप्रसिद्धं मुक्तिफलादन्यदेवामृतत्वमिति वक्तव्यं। चक्षुष्टो- वा मूर्ध्नो वेत्यविद्वद्विषयवाक्यसन्दर्भमध्य एव मूर्धन्यनाड्या निष्क्रमणस्यापि पाठादि-

सू ॥ स्मर्यते च ॥ १३ ॥

विदुषो मूर्धन्यनाड्या गमनं स्मर्यते । "ऊर्द्ध्वमेकः स्थितस्तेषां यो भित्त्वा सूर्यमण्डलम् । ब्रह्मलोकमतिक्रम्य तेन याति परां गतिम् ॥" इति । अतोऽर्चिरादिगतिरुपपद्यते विदुष उत्क्रान्तस्य । केचिन्निरन्वयोपासकानामिह शरीरपात एव मुक्तिरित्यर्चिरादिगतिमनियतामाहुः ॥

इति तदपीत्यधिकरणम् ॥ ५ ॥

अथ परसंपत्त्यधिकरणम् ॥ ६ ॥

सू ॥ तानि परे तथा ह्याह ॥ १४ ॥

पूर्वत्र प्राणसहितस्य जीवस्य तेजउपलक्षितेषु भूतेषु लय उपपादितः । 'तेजः

त्याशङ्कानिराकरणार्थं सूत्रम् ॥ सू० ॥ स्मर्यते च ॥ १३ ॥ यस्सूर्यमण्डलं भित्वोर्ध्वं स्थित इति योजना । तेन मूर्धसंबन्धिनाडीविशेषणान्मध्येऽपि सूर्यमण्डलपर्यन्तप्रसृतनाड्या निष्क्रमणस्य ब्रह्मलोकातीतदिव्यस्थानप्राप्तिहेतुत्वकीर्तनात् । चक्षुष्टो वा मूर्ध्नो वेत्यविद्वद्विषये मूर्धग्रहणं मूर्धसंबन्धिनाड्यन्तरविषयमवसीयत इति भावः । केचिदिति । तेषामयमाशयः । 'न तस्य प्राणा उत्क्रामन्ती'त्येतदनन्तरं 'अत्रैव समवनीयन्त' इति प्राणानामिहैव लयः श्रूयते । 'ब्रह्मैव सन्ब्रह्माप्येती'ति प्राक्सिद्धब्रह्मभावाभिव्यक्तिरूपैव ब्रह्मप्राप्तिर्ब्रह्मविद्याफलतया श्रूयते । अतो गुणान्वयरहितं निर्विशेषं ब्रह्म श्रवणमननानन्तरं ध्यायतां तत्साक्षात्कारादिहैव ब्रह्मभावाविर्भावरूपा मुक्तिरनेन संदर्भेणोच्यते । तस्मादर्चिरादिगतिस्सगुणविद्याफलप्राप्त्यर्थेत्येवं गतिरनियतेति । तदेत'दनियमस्सर्वेषामि'त्यधिकरणेप्युक्तम् ॥

इति तदापीत्यधिकरणम् ॥ ५ ॥

अथ परसम्पत्त्यधिकरणम् ॥ ६ ॥

सू० ॥ तानि परे तथा ह्याह ॥ १४ ॥ सङ्गतिं दर्शयितुं वृत्तमनुवदति—पूर्वत्रेति । ननु 'सोऽध्यक्षे'त्यधिकरणसिद्धस्य 'प्राणस्तेजसी'ति वाक्यार्थस्यानुवादोऽयम् । तथा च तेनैव सङ्गतिरुक्ता स्यान्न पूर्वाधिकरणेन । उक्तसङ्गत्या च तदधिकरणानन्तरमेवैतदधिकरणं युक्तं कर्त्तुम् । 'वाङ्मनसि सम्पद्यते मनः प्राणे प्राणस्तेजसी'ति वाक्यत्रयार्थो हि क्रमिकेणाधिकरणत्रयेण चिन्तितः । अतश्चतुर्थवाक्यार्थोऽपि तदनन्तरमेव चिन्तनीयः । न तु विद्वदविद्वत्सामान्योत्क्रान्तिप्रकारचिन्तां सावशेषां स्थापयित्वा विशिष्य विद्वद्वि-

---

नयमणिमालायाम्

अथ तदापीत्यधिकरणम् ॥ ५ ॥

सू० ॥ तदापीतेः संसारव्यपदेशात् ॥ ८ ॥ सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ॥ ९ ॥ नोपमर्देनातः ॥ १० ॥ अस्यैव चोपपत्तेरूष्मा ॥ ११ ॥ प्रतिषेधादिति चेन्न शारीरात्स्पष्टो ह्येकेषाम् ॥ १२ ॥ स्मर्यते च ॥ १३ ॥

विदुषो नोत्क्रान्तिः स्यादत्रैव ब्रह्मसम्पत्तेः । उत्क्रमणाभावस्य च तत्प्राणानां समामननात् ॥ ३६३ ॥

तस्यार्चि···ब्रह्मप्राप्त्यवधिदेहयोगश्रवणात् । सास्त्येव तन्निषेधो जीवाद्ब्रह्माप्तिवचन······ ॥ ३६४ ॥

इति तदापीत्यधिकरणम् ॥ ५ ॥

परस्यां देवतायाम्' इति । तस्य भूतान्तरसंसृष्टस्य जीवयुक्तस्य तेजसः परस्यां देवतायां लयोऽवगम्यते । स परब्रह्मणि स्वरूपलय उताविभागापत्तिमात्रमिति संशयः । स्वरूपलय इति युक्तम् । तथाहि 'देवात्तत्' इति देव एव देवतेत्युच्यते । परशब्दो महत्त्ववाची । अतः परो देवो महादेवः । 'सेयं देवतैक्षत' 'द्यावाभूमी जनयन् देव एक' इति स महादेव एव सकलभूतकारणं परब्रह्म श्रूयते । अतस्तस्मिन्नुपादाने सजीवानां भूतानां स्वरूपलय इत्येव युक्त इति पूर्वः पक्षः ॥

पयोत्क्रान्तिप्रकारचिन्तामारभ्य तन्मध्ये पुनरपि विद्वदविद्वत्सामान्यविषयोऽयं चिन्तयितुं युक्तः । किञ्च विशिष्य विद्वद्विषयोत्क्रान्तिचिन्ता 'समाना चासृत्युपक्रमा'दित्यारभ्य प्रवृत्ता । तत्र सृत्युपक्रमात्प्राचीनत्वं चतुर्थवाक्यस्यापि तुल्यम् । अतस्तस्मिन्नपि निर्णीत एव । तत्पर्यन्तं विदुषोऽपि समानमिति बोधयितुं शक्यम् । एवं स्वोचितस्थाने विद्यमाने तमपहाय किमयमत्र चिन्त्यते' । उच्यते । उक्तभङ्ग्या प्राक्सङ्गतस्यास्याधिकरणस्यात्राप्यस्त्येवाक्षेपिकी सङ्गतिः । ब्रह्मविदामुत्क्रान्तिस्तत्पूर्विका गतिश्चास्तीति पूर्वाधिकरणोक्तमयुक्तम् । 'तेजः परस्यां देवताया'मिति वागादिमनःप्राणसहितस्य सूक्ष्मदेहस्य सर्वप्रकृतिभूते परब्रह्मणि स्वरूपेणैव लयप्रतिपादनात् । विद्याप्रकरणपठितस्य 'वाङ्मनसि सम्पद्यत' इत्यादेः विद्वद्विषयत्वेन स्वरूपलयप्रतिपादनोपपत्तेश्च । देहेन्द्रियादिरहितस्य चन्द्रसंवादाद्यसंभवेन तदुक्ताया अर्चिरादिगतेरन्यविषयत्वस्यावश्यवक्तव्यत्वादिति । एवमुभयत्र सङ्गतं सदिदमधिकरणमिह कृतञ्चेत् कोऽत्र दोषः । किञ्च । वस्तुतोऽस्य वाक्यस्य सामान्यविषयत्वेऽपि विद्वन्मात्रविषयत्वेन पूर्वपक्षः कार्यः । अन्यथा 'तमुत्क्रान्त'मित्यादिश्रुतेर्निर्विषयत्वापत्तेः । अतोऽपि विद्वदुत्क्रान्तिप्रकारविशेषचिन्तामध्ये सङ्गततरमिदमधिकरणम् । सङ्गतिभाष्यं त्वेवं नेतव्यम् । तृतीयवाक्यार्थपर्यन्तं प्राङ्निर्णीतम् । चतुर्थवाक्यार्थस्तु विशेषेणात्र निर्णेतुमवशेषित इदानीं निर्णीयते । भाविनमेतद्वाक्यार्थनिर्णयमपेक्ष्य मनसि निधायैतत्पर्यन्तोत्क्रान्तिर्विदुषामविदुषां च समानेति प्रागुक्तमिति प्रसङ्गात्परस्यां देवतायामित्यस्य महादेवशब्दार्थविषयतया शिवे पर्यवसानं दर्शयन् पूर्वपक्षमुपपादयति—तथा हीति । जीवस्यापि स्वरूपतः कार्यत्वमङ्गीकृत्यैव पूर्वपक्षो निर्वोढव्यः । अन्यथा परस्यां देवतायामिति वाक्यगतस्यैकस्यैव सम्पद्यत इति शब्दस्य तेजश्शब्दोपलक्षितविशिष्टार्थमध्ये जीवांशे व्यापारोपरमपरत्वं तदतिरिक्तेषु स्वरूपलयपरत्वमिति वैरूप्यदोषस्यापरिहार्यत्वादित्यभिप्रायेण 'सजीवाना'मित्युक्तम् । वागादिवाक्येषु सम्पद्यत इति शब्दस्य वृत्तिलयपरत्वं तेजोवाक्ये स्वरूपलयपरत्वमिति वैरूप्यन्तु न दोषः । सूत्रेष्वनुवृत्तपदानां तत्तत्सूत्रगतपदान्तरसमभिव्याहारानुसारेणार्थभेदस्य दृष्टत्वादिति भावः । 'इत्येव युक्त'मित्यवधारणस्यायमभिप्रायः । 'तेजः परस्यां देवताया'मित्यस्य व्यापारोपरमपरत्वे तद्वाक्यमनन्वितार्थं स्यात् । वागादिमनःप्राणजीवसहितसूक्ष्मदेहव्यापारोपरमस्य नित्यसिद्धब्रह्मसम्बन्धाधीनत्वाभावात् । न च स्थानविशेषावच्छिन्नब्रह्मसंबन्धः प्रागसिद्धोऽत्राभिधीयते । स्थानविशेषानुवादनात् । राज्ञः प्रस्थानोपयुक्तपरिवारमेलने सति प्रस्थानस्येव जीवस्योत्क्रमणोपयुक्तसूक्ष्मदेहेन्द्रियमनःप्राणमेलने सत्युत्क्रमणस्यैव वक्तव्यत्वेन मध्ये स्थानविशेषावच्छिन्नब्रह्मसम्पत्त्यधीनकियत्कालपर्यन्तव्यापारोपरमोक्तिवैय-

सिद्धान्तस्तु । ब्रह्मण्युपादानेऽपि न स्वरूपलयः । किंतु अविभागमात्रम्, 'वाङ्मनसि संपद्यत' इति सम्पत्तिवचनस्यैकस्यार्थान्तरपरत्वे प्रमाणाभावात् । अतो मनःप्रभृतिवत् वृत्तिलय एवेति वदति ॥

सू ॥ अविभागो वचनात् ॥ १५ ॥

संपत्तिवचनादविभागमात्रं ब्रह्मणि भूतानामिति युक्तमेव ॥

इति परसंपत्त्यधिकरणम् ॥ ६ ॥

र्थ्याच्चेति । अविभागमात्रमिति । सुप्तिप्रलययोरिव व्यापारोपरमेण सूक्ष्मरूपतयावस्थानमविभागः । प्रमाणाभावादिति । एकस्य पदस्य श्रवणेऽनुषङ्गेऽप्यैकार्थ्यमौत्सर्गिकम् । सूत्रेषु पदान्तरसमभिव्याहाराद्यवगमितवत्क्रमविवक्षारूपेण बलवता प्रमाणेनापोद्यते । न चेह तथा किञ्चित्प्रमाणमस्ति । न चोपादानलयः स्वरूपलय एवेति नियमस्तत्र प्रमाणम् । सुषुप्तिप्रलययोर्जीवस्य ब्रह्मणि लये व्यभिचारेणानियमासिद्धेः । न च 'तेजः परस्यां देवताया'मिति वाक्यवैयर्थ्यप्रसङ्गोऽत्र प्रमाणम् । वागाद्युत्क्रमणक्लेशापनयाय कञ्चित्कालं सुषुप्ताविव ब्रह्मसम्पत्तेर्विश्रान्त्यर्थत्वेन तस्य सफलत्वात् विश्रान्तेश्चोत्क्रमणक्लेशप्रयुक्तहृदयक्षोभशमनेन निष्क्रमणार्थनाडीविशेषविवेचनोपयुक्तत्वेन सफलत्वाद्ब्रह्मणि हृदयाकाशरूपे सम्पत्तिरिह विवक्षिता । 'स एतास्तेजोमात्राःसमभ्याददानो हृदयमेवान्ववक्रामती'ति श्रुत्यन्तरात् प्रत्युत बाधकमेव प्रमाणमस्ति जीवांशे सम्पद्यत इति क्रियायाः वैरूप्यापत्तिरूपम् । न च जीवस्य स्वरूपतः कार्यत्वमभ्युपगन्तुं युक्तम् । तथा सति मोक्षस्यात्मनाशत्वेनापुरुषार्थत्वापत्तेः । तथा मुक्तिफलकपरब्रह्मविद्याप्रकरणेष्वर्चिरादिगतिश्रवणमपि बाधकं प्रमाणमिति । एवमाचार्यः स्वयमेव सिद्धान्तं प्रदर्श्य तस्मिन्नर्थे सूत्रमवतारयति सू० ॥ अविभागो वचनात् ॥ १५ ॥ भूतानामिति । भूतग्रहणं वागादिमनःप्राणजीवानामप्युपलक्षणम् ॥

इति परसम्पत्त्यधिकरणम् ॥ ६ ॥

नयमणिमालायाम्

अथ परसम्पत्त्यधिकरणम् ॥ ६ ॥

सू० ॥ तानि परे तथा ह्याह ॥ १४ ॥ अविभागो वचनात् ॥ १५ ॥

भूतानां ब्रह्मणि यो लयस्सतु स्यात्स्वरूपलयः । सर्वोपादानेऽस्मिन्नुक्तानुपपत्त्यभावेन ॥ ३६५ ॥
नैवं प्राकृतलयवत्पुनश्च दृष्टेरनुक्तत्वात् । वृत्तिलयस्तु तदर्थकसम्पद्यनुपपन्नो भवेदेषः ॥ ३६६ ॥

इति परसम्पत्त्यधिकरणम् ॥ ६ ॥

अथ तदोकोऽग्राधिकरणम् ॥ ७ ॥

सू ॥ तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया ॥ १६ ॥

पूर्वत्र विद्वदविदुषोरर्चिरादिगत्युपक्रमपर्यन्तमुत्क्रान्तिः समानेत्युक्तम् । निष्क्रमणवेलायामुभयोर्विशेषोऽस्ति न वेति विचार्यते । 'तेजः परस्यां देवतायाम्' इति भूतैः सह परमकारणे परदेवे परे ब्रह्मणि परमाकाशरूपे विद्वानविद्वांश्च विलीयाविभागेन क्षणं विश्रम्य तिष्ठतीति समभिहितम् । अतः समानैवोत्क्रान्तिः, तयोर्हृत्प्रद्योतनादेः समत्वश्रवणात् । 'तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुष्टो वा मूर्ध्नो वा अन्येभ्यो वा शरीरदेशेभ्य' इति श्रूयते, अतः समानत्वादुत्क्रान्तेस्तयोरविशेष इति पूर्वपक्षे प्राप्ते

अथ तदोकोऽग्राधिकरणम् ॥ ७ ॥

सू० ॥ तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतश्शताधिकया ॥ १६ ॥ सङ्गतिं दर्शयति—पूर्वत्रेति । गत्युपक्रमात्प्राक् ब्रह्मसम्पत्तिपर्यन्तोत्क्रान्तिर्विद्वदविदुषोस्समानेति 'समाना चासृत्युपक्रमात्' इत्यधिकरणे वर्णितम् । ततः परमुत्क्रान्तिस्तत्पूर्विका गतिश्च स्वरूपत एव नास्ति यस्यां विशेषमभिप्रेत्यासृत्युपक्रमादित्यवधिक्रियेतेत्याशङ्क्य तदुभयसद्भावस्समर्थितः । इहत्वस्तु स्वरूपतस्तदनन्तरमप्युत्क्रान्तिव्यापारः नाडीभिर्निष्क्रमणरूपः तत्र विदुषां विशेषो नास्तीत्याशङ्क्य समाधीयत इति सङ्गतिरित्यर्थः । विशेषसद्भावाऽसद्भावाभ्यां(१) संशयः । विशेषोऽपि 'तेजः परस्यां देवताया'मित्येतत्पर्यन्तं मध्ये वा भवेत्पश्चाद्वा । नाद्यः । तावत्पर्यन्तं साम्याङ्गीकारात् । न द्वितीयः । तदनन्तरमपि हृदयाग्रप्रज्वलनं ययाकयाचिन्नाड्या निष्क्रमणमित्यविशेषात्(२) । न च विदुषां मूर्धन्यनाड्यैव निष्क्रमणमिति विशेषो वक्तुं शक्यते । नाडीनामतिसूक्ष्माणां दुर्विवेचत्वेन तदीयानां मूर्धन्यनाड्याः विदुषोऽपि विविच्यावगन्तुमशक्यत्वात्(३) । न च विद्यानुष्ठानदशायां स्वयमीदृशप्रदेशस्थितयैतादृश्या नाड्या निष्क्रम्य ब्रह्म प्राप्नुवानीत्यनुसन्धानाभ्यासपाटवात्तदानीं स्वनिष्क्रमनाडीपरिज्ञानं भवेत् उत्क्रमणक्लेशप्रयुक्तस्य क्षोभस्य ब्रह्मणि विश्रान्तोपशान्तत्वेन तदानीं विवेचनकौशलसत्वादिति वाच्यम् । तथापि घनसंतमसावृतहृदयावरणगतस्य विदुषो निरन्तरानेकसूक्ष्मतमनाडीमध्ये स्वनिष्क्रमणनाडीविशेषस्यावगन्तुमशक्यत्वात् । न च हृदयाग्रप्रकाशेन विवेचनं स्यादिति वाच्यम् । अधोमुखहृदयाग्रप्रकाशस्य मूर्धाभिगतोर्ध्वगतावनुपयोगात् । न च 'तयोर्ध्वमाय'न्निति श्रुतिर्विदुषां मूर्धन्यनाड्यैव निष्क्रमणमिति नियच्छति किन्तु यो मूर्धन्यनाड्या निष्क्रामति सोऽमृतत्वं प्राप्नोतीत्येतावन्मात्रं वदति । तच्च नाडीस्तुत्यर्थत्वेनाप्युपपद्यत इति पूर्वः पक्षः । सिद्धान्तस्तु 'तयोर्ध्वमायन्नि'ति श्रुतिर्मूर्धन्य-

(१) 'विशेषसंभवासंभवाभ्यां' इति ख. पाठः । (२) 'मित्यस्य तुल्यत्वात्' इति ख. पाठः । (३) 'नाड्या विविच्यावगन्तु' इति ख. पाठः ।

विशेषोऽस्तीति सिद्धान्त उच्यते। तथा हि। हार्दस्य हृदयगतस्य परमेश्वरस्याराधनरूपविद्यासामर्थ्यात् तदङ्गगत्यनुसंधानाच्च प्रीतेन तेन सर्वानुग्राहकेण स्वस्वरूपावरणमलध्वंसनाविदग्धयाऽनुग्रहदृष्ट्या निरीक्षितस्तदनुग्रहप्रकाशितद्वारः शताधिकया मूर्धन्यनाड्या विद्वानुत्क्रामति। न तथा परः। किंतु इतरनाडीभिरेव। तथा श्रुतिः। "शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिस्सृतैका। तयोर्द्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति ॥" इति। स एष विदुष उत्क्रमणे विशेषः। एतदुक्तं भवति। "रुद्रो जनानां हृदये सन्निविष्टः। हृत्पुण्डरीकं विरजं विशुद्धम् ॥" इत्यादिश्रुतिषु 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति' इत्यादिस्मृतिषु च सर्वजनहृदयगतो हि परमेश्वरोऽवगम्यते। यत्र सुषुप्तो जीवः स्वेन्द्रियवृत्तिभिः सह विलीय तदेकरसो भवति, यश्च 'विश्वाधिको रुद्रो महर्षिः' 'सर्वो वै रुद्रः' इत्यादिश्रुतिषु निमित्तत्वाद्विश्वाधिकत्वेनोपादानत्वाद्विश्वात्मकत्वेन चावगम्यते, 'एको हि रुद्रो न द्वितीयाय तस्थुः' इत्यादिश्रुतिषु यस्य विश्वाधिपत्यं श्रूयते, 'शिव एको ध्येयः' 'यदा चर्मवदाकाशम्' इति यमन्तरेण मुमुक्षूणां ज्ञेयं वस्तु नास्तीति विज्ञायते, "अत्र हि जन्तोः प्राणेषूत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे येनासावमृती भूत्वा' इति य उत्क्रान्तिसमये विदुषां स्वरूपप्रकाशकतारकब्रह्मोपदेष्टृत्वेनाम्नायते, 'आ वो राजानम्' इत्यादिषु यस्याराध्यत्वेन सर्वयज्ञाधिपत्यं वर्ण्यते, 'उग्रो वीराँ अर्पय भेषजेभिर्भिषक्तमं

नाड्या निष्क्रान्तानामेवामृतत्वं नान्येषामिति नियच्छन्त्यर्थाद्विदुषां मूर्धन्यनाड्यैव निष्क्रमणमित्यपि नियच्छत्येव। अन्यथा नाड्यन्तरनिष्क्रान्तानां विदुषामपि मुक्त्यभावप्रसङ्गेन मुक्त्यर्थविद्याविधायिशास्त्राऽप्रामाण्यप्रसङ्गात्। न च नाडीनां दुर्दर्शत्वम्। विद्याराधितपरमेश्वरप्रसादात्तद्दर्शनोपपत्तेः। न चैवं श्रुत्यर्थोपपादने संभवत्यसदर्थावलम्बनत्वेन पाक्षिकार्थावलम्बनत्वेन वा ब्रह्मनाडीस्तुत्यर्थत्वकल्पनं युक्तमिति तमिमं सिद्धान्तं सूत्राऽऽरूढं कुर्वन्नुपपादयति—तथाहीति। सूत्रेण ब्रह्मनाडीदर्शनोपायमात्रं दर्श्यते। तेन तदपेक्षस्य सिद्धान्तस्यार्थात्सिद्धिः। विद्यासामर्थ्यात् विद्याविशेषभूतगत्यनुसन्धानपरिशीलनाच्च विद्वान्हृदयगतेन परमेश्वरेणानुगृहीतो भवतीति। ततश्च तस्य परमेश्वरस्योकः स्थानं हृदयं तदग्रे ज्वलनं प्रकाशो भवति। तेन प्रकाशेन ब्रह्मनाडीद्वारं प्रकाशितं भवति। ब्रह्मनाड्याः खलु द्वारं नाभिचक्रे प्रसिद्धं न तु हृदयादूर्ध्वप्रदेशे हृदि। नाभ्यादिमूर्धपर्यन्तव्यापित्वात्तस्याः। अतो विद्वान्प्रकाशमानेन हृदयाग्रप्रकाशेन तावद्देशव्यापिना प्रकाशितं ब्रह्मनाडीद्वारं प्रविष्टस्तया शताधिकया नाड्या नलीकमुखनिवेशितशीसगुलिकावत् झटिति निष्क्रामतीति सूत्रस्यार्थः। ननु यस्यैवमुत्क्रान्तिसमये परमेश्वरानुग्रहैकलभ्यो हृदयाग्रप्रकाशो नास्ति तस्य कथं मूर्धन्यनाड्या निष्क्रमणनियमस्सिद्ध्येदित्याशङ्क्य नियमेन परमेश्वरस्य तदानीमाविर्भूयानुग्राहकत्वं तदीयवैभवप्रख्यापनेन समर्थ्यते। **एतदुक्तमित्यादिना। उग्रो वीरानिति।** वीरा देवव्रतादिषु प्रसिद्धास्सदा पर-

---

(१) 'जीवस्य यदोकः' इति ख. पाठः।

त्वा भिषजां शृणोमि' इति यः संसाररोगस्य भिषक्तम इति निरूप्यते। 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्' इति सकलप्रपञ्चविचित्रकलिकानिकुरुम्बावलम्बिनी मायालक्षणा परमशक्तिर्यस्य रूपैकदेशस्वभावतया प्रतिपाद्यते। स खलु हृदयगतो हार्दः परं ब्रह्म परमेश्वरः परममङ्गलस्वरूप उमापतिः परमात्मा स्वाज्ञारूपश्रुतिचोदितेषु कर्मस्वग्निहोत्रादिषु स्वाराधनरूपेषु नियतं निर्मुक्तसकलाविहितकर्मलवं स्वार्पितसकलकर्मफलं स्वायत्तचित्तं स्वज्ञानामृतपरिपूर्णं निरस्तसमस्तकाम्यफलं विवेकादिसंपन्नं स्वभक्तिमात्रैकनिरतं स्वप्रसादाकाङ्क्षिणं विद्यावन्तं साधकमवलोक्य शरीरपरित्यागसमये तद्विषयसंपन्नप्रसादः तस्मिन् संसारमलकलङ्कापकर्षिणीमनुग्रहदृष्टिं निदधाति। तदनुग्रहविशेषेणासौ विगलितसांसारिकमलः प्रकाशितात्मद्योतितमूर्धन्यनाड्या निर्गत्यार्चिरादिना तदीयं परं पदमप्राकृतं निरतिशयानन्दस्वभावं प्राप्य तदाकारो भूत्वा नित्यनिरतिशयानन्दस्वरूपो भवति। तस्मादविदुषो विदुषश्च गतिवैषम्यमस्तीति युक्तमेव ॥

इति तदोकोऽग्राधिकरणम् ॥ ७ ॥

मेश्वरसन्निधावन्तरङ्गसेवां कुर्वन्तः गणनाथाः। तेषु हि वीरशब्दः प्रसिद्धः। 'क्षयद्वीराय प्रभरामहे मतिं' 'क्षयद्वीराय नमसा विधेम ते' 'दिव्या गणा बहुरूपाः पुराणाः' 'आयुश्छिदो नः प्रथमं तु वीरा' इत्यादिमन्त्रेषु प्रसिद्धः। क्षयन्तो वसन्तो वीरा यस्मिन् तस्मै क्षयद्वीरायेति परमेश्वरस्य विशेषणम्। एवंभूतान् वीरान् सर्वेष्वपि पारमेश्वरेषु सर्वेष्वपि दिव्यस्थानेषु सन्निहितान्प्राप्य कर्मभूतान्नः अस्मान् उदर्पय ऊर्ध्वदेशे सर्वस्यापि प्रपञ्चोपरिस्थिते परमपदरूपे दिव्यस्थाने प्रापय परमपदे मां तैस्सह संयोजयेत्यर्थः। प्रकाशितात्मद्योतितमूर्धन्यनाड्येति। मलविगलनोपक्रमाद्धृदयाग्रे खद्योतवत्संजातप्रकाशो य आत्मा स्वापृथग्भूतधर्मज्ञानप्रभारूपतः तेन द्योतितया मूर्धन्यनाड्येत्यर्थः। सर्वमिदं प्रस्तुतविद्वदुत्क्रान्त्यनुसारेण वर्णितम्। एवमविद्वदुत्क्रान्तावपि वर्णाश्रमधर्माराधितपरमेश्वरानुग्रहवशात्प्राप्यलोकानुगुणनाडीप्रवेशार्थः तत्तन्नाडीद्वारकप्रकाशोऽनुसन्धेयः ॥

इति तदोकोऽग्राधिकरणम् ॥ ७ ॥

नयमणिमालायाम्

अथ तदोकोग्राधिकरणम् ॥ ७ ॥

सू० ॥ तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतश्शताधिकया ॥ १६ ॥

विद्वानपि निष्कामति देहान्नाड्या यया कयाचिदपि। ननु नियमेन कथश्चिन्नाडीनां दुर्विवेचत्वात् ॥ ३६७ ॥

विद्याराधितशंभुप्रकाशितद्वारको जीवः। निष्कामति मूर्धगया नाड्या श्रवणात्तयोर्ध्वमिति ॥ ३६८ ॥

इति तदोकोऽग्राधिकरणम् ॥ ७ ॥

अथ रश्म्यनुसार्यधिकरणम् ॥ ८ ॥

सू ॥ रश्म्यनुसारी ॥ १७ ॥

पूर्वत्र साधकस्य हृदयगतपरमेश्वरानुगृहीतस्य मूर्धन्यनाड्या निर्गम उक्तः। निर्गतस्य तदूर्द्धगमनं निशि दिवा च संभवति न वेति संशयः। किं तावत् प्राप्तम्? 'यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्द्धमाक्रमत' इति समुत्क्रान्तस्य रश्मिसंबन्धेनोर्द्धदेशाक्रमणमवगम्यते। रश्मिसंबन्धस्तु दिवैव संभवति, न तु रात्राविति प्राप्ते ब्रूमः। उत्क्रान्तो विद्वान् रश्मिसंबन्धादेवोर्द्धं गच्छतीति सत्यम्। स तु दिवा च रात्रौ च संभवति। निदाघेषूष्मदर्शनेन निश्यपि रश्मिसत्त्वात्। तस्माद्दिवा च रात्रौ च रश्म्यनुसारी गच्छत्यूर्द्धमिति निर्णयः॥ आशङ्क्य परिहरति—

सू ॥ निशि नेति चेन्न संबन्धस्य यावद्देहभावित्वाद्दर्शयति च ॥ १८ ॥

निशि मृतस्यापि रश्मिसंबन्धेन ब्रह्मप्राप्तिरभिहिता। सा न संभवति, "दिवा च शुक्लपक्षश्च उत्तरायणमेव च। मुमूर्षतां प्रशस्तानि विपरीतं तु गर्हितम्॥" इति निशामरणनिन्दनात्। इति चेन्न। संसारबन्धस्य यावद्विद्याभावित्वात्। विद्यया अनारब्धकार्येषु बन्धहेतुषु कर्मसु नाशितेषु अनुवर्तमानस्य प्रारब्धस्यापि यावच्चरमदेहावसानभावित्वाच्चरमदेहावसाने प्रारब्धेऽपि नष्टे सति पुनर्ब्रह्मप्राप्तिविघ्नहेत्वभावात्। तथा दर्शयति श्रुतिः 'तस्य तावदेव चिरं यावन्न

अथ रश्म्यनुसार्यधिकरणम् ॥ ८ ॥

सू० ॥ रश्म्यनुसारी ॥ १७ ॥ मूर्धन्यनाड्या निष्क्रमणे विचारिते तदनन्तरभाविरश्मिभिरूर्द्ध्वाक्रमणमधिकृत्य विचार्यत इति सङ्गतिः। विदुष ऊर्द्ध्वदेशाक्रमणकारणानां सूर्यरश्मीनां रात्रौ सत्वाऽसत्वाभ्यां तस्य निशामरणनिन्दाविषयत्वाऽविषयत्वाभ्याञ्च संशयः। विदुषो निशि मृतस्य ऊर्द्ध्वगतिर्न संभवति। तत्कारणानां सूर्यरश्मीनामभावात् निशास्वनुभूयमानस्योष्मण आग्नेयत्वेनाप्युपपत्तेः। ज्योतिश्शास्त्रप्रक्रियया चन्द्रमण्डलमनुप्रविष्टाः सूर्यरश्मय एव चन्द्ररश्मय इत्यङ्गीकारेऽपि दर्शादिरात्रिषु तेषामप्यभावात्। न च निशि मृतस्य विदुषो विनापि सूर्यरश्मीनूर्द्ध्वगतिः शङ्कनीया। एतैरेव रश्मिभिरित्यवधारणविरोधात्। न च निशि मृतस्य विदुषो मूर्धन्यनाड्या निष्क्रान्तस्य यावदुदयं सूर्यरश्मिप्रतीक्षणेनोर्द्ध्वगतिर्वाच्या। 'स यावत् क्षिप्येन्मनस्तावदादित्यं गच्छे'दिति शैघ्र्यवचनविरोधात्। तथा निशामरणनिन्दनस्य विद्वदविद्वत्साधारण्येन प्रवृत्तत्वादपि निशि मृतस्य विदुषो न संभवत्यूर्द्ध्वगतिरिति पूर्वः पक्षः। सिद्धान्तस्तु निश्यपि विद्वान्सूर्यरश्म्यनुसारी ऊर्द्ध्वं गच्छति ग्रीष्मे दिवा सौरातपोष्मप्रकर्षे सत्येव रात्रावूष्मदर्शनेन तस्य सूर्यसंबन्धित्वावगत्या रात्रावपि सूर्यरश्मीनामनुवृत्त्यवधारणादिति। अथ निशामरणनिन्दारूपपूर्वपक्षहेत्वन्तरनिराकरणार्थं सूत्रम्॥ **सू० ॥ निशि नेति चेन्न संबन्धस्य यावद्देहभावित्वाद्दर्शयति च ॥ १८ ॥ यावद्विद्याभावित्वादिति।** विद्याशब्देन विद्यादेहो विव-

विमोक्ष्येऽथ संपत्स्य' इति । निशानिन्दा त्वितरपुरुषविषया । अतो निश्यपि मृतस्य ब्रह्मप्राप्तौ न विरोधः ॥

इति रश्म्यनुसार्यधिकरणम् ॥ ८ ॥

अथ दक्षिणायनाधिकरणम् ॥ ९ ॥

सू ॥ अतश्चायनेऽपि दक्षिणे ॥ १९ ॥

अत एव बन्धहेत्वभावादेव। दक्षिणायनमृतस्यापि विदुषो ब्रह्मप्राप्तिरस्त्येव ॥

सू ॥ योगिनः प्रति स्मर्यते स्मार्ते चैते ॥ २० ॥

ननु विदुष एव मुमूर्षून् प्रति पुनरावृत्त्यपुनरावृत्तिहेतुत्वेन कालविशेषः स-

---

क्षितः । अत एव 'यावच्चरमदेहावसानभावित्वादि'त्युक्तम् । निशानिन्दा त्विति । मुक्त्यर्थविद्याविधायिशास्त्रप्रामाण्यादविद्वद्विषयत्वं कल्पनीयम् । अविद्वत्स्वपि येषामिष्टापूर्तादिकारिणामतिशिष्टानां निशामरणं दृश्यते, तेषां ततोऽपि प्रबलस्य प्राचीनस्य दुष्कर्मणः फलोन्मुखता फलबलात्कल्पनीयेति भावः ॥

इति रश्म्यनुसार्यधिकरणम् ॥ ८ ॥

अथ दक्षिणायनाधिकरणम् ॥ ९ ॥

सू० ॥ अतश्चायनेऽपि दक्षिणे ॥ १९ ॥ अतिदेशाधिकरणस्यास्येयमधिकाशङ्का । 'य एवं विद्वानुदगयने प्रमीयते देवानामेव महिमानं गत्वादित्यस्य सायुज्यं गच्छत्यथ यो दक्षिणे प्रमीयते पितृणामेव महिमानं गत्वा चन्द्रमसः सायुज्यं सलोकतामाप्नोती'ति तैत्तिरीयोपनिषदि पुरुषविद्यावसाने पूर्वानुवाकविहितब्रह्मविद्यावत उत्तरायणमृतस्यादित्यप्राप्तिमुक्त्वा दक्षिणायनमृतस्य चन्द्रप्राप्तिरुक्ता । न चेयमर्चिरादिमार्गपर्वभूतचन्द्रप्राप्तिः । तस्योत्तरायणमृतविद्वत्साधारण्येन दक्षिणायनमृताविद्वन्मात्रविषयत्वायोगात् 'पितृणामेव महिमानं गत्वे'ति पित्र्यभोगानुभवोक्तिविरोधाच्च । अतो विदुषोऽपि दक्षिणायनमृतस्य धूमादिमार्गेण चन्द्रं प्राप्य पुनरावृत्तिर्विवक्षितेत्यवसीयते । चन्द्रलोके पित्र्यभोगानुभवस्य पुनरावृत्तिपर्यन्ततायाः 'यावत्सम्पातमुषित्वे'त्यादिवाक्यावगतत्वादिति। अत्राऽयं परिहारः । उदगयनदक्षिणायनमृतयोरुभयोरपि विदुषोरत्र ब्रह्मप्राप्तिरेव प्रतिपिपादयिषिता । 'ब्रह्मणो महिमानमाप्नोती'ति वाक्यविशेषात् । उत्तरायणमृतस्यादित्यलोके दिव्यलोकानुभवः दक्षिणायनमृतस्य चन्द्रलोके पित्र्यभोगानुभवश्च मार्गे विश्रान्तिहेतुत्वेन विवक्षित इत्यधिकरणद्वयाक्षेपसमाधानार्थत्वेनोभयशेषभूतमिदं सूत्रम् ॥ **सू० ॥ योगिनः प्रति स्मर्यते स्मार्ते चैते ॥ २० ॥** 'यत्र काले त्वनावृत्ति'मिति स्मृतौ काल-

---

नयमणिमालायाम्

अथ रश्म्यनुसार्यधिकरणम् ॥ ८ ॥

सू० ॥ रश्म्यनुसारी ॥ १७ ॥ निशि नेति चेन्न संबन्धस्य यावद्देहभावित्वाद्दर्शयति च ॥ १८ ॥

रश्मिभिरूर्द्ध्वाक्रमणं निष्क्रान्तस्य श्रुतं विदुषः । तन्निशि मृतस्य नास्ति ब्रह्माप्तिर्गर्हिताऽपि निशा ॥ ३६९ ॥

नैवं निश्यपि सत्ता रश्मीनामूष्मणावगता । तद्गर्हा चाविदुषां नोचेत्पाक्षिकफला भवेद्विद्या ॥ ३७० ॥

इति रश्म्यनुसार्यधिकरणम् ॥ ८ ॥

र्यते। "यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः। प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ॥" "अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्। तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः॥ धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम्। तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते॥ शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते। एकया यात्यनावृत्तिमन्यया ऽऽवर्तते पुनः॥" इति। तस्माद्विद्वद्विषया निशादक्षिणायननिन्देत्ययुक्तमिति शङ्कोत्तरमिदं सूत्रम्। विदुषामर्चिरादिगतिः, तद्विपरीताऽन्येषामिति योगिनो योगयुक्तान्प्रति योगाङ्गतया प्रतिदिनमनुस्मर्तव्ये देवयानपितृयानाख्ये एते गती इति स्मर्यते 'यत्र काले त्वनावृत्तिम्' इत्यादिना। न तु विदुषः प्रति मरणकालविशेषः स्मर्यते। "नैते सृती पार्थ जानन् योगी मुह्यति कश्चन। तस्मात् सर्वेषु कालेषु योगयुक्तो भवार्जुन॥" इत्युपसंहारात्, 'अग्निर्ज्योतिः' 'धूमो रात्रिः' इति श्लोकयोर्देवयानपितृयानगतिप्रत्यभिज्ञानाच्च। 'यत्र काले तु' इति कालशब्दस्त्वातिवाहिकगणस्य कालाभिमानिदेवताभूयस्त्वात्। अतः सर्वथा विदुषां ब्रह्मप्राप्तौ निशादक्षिणायनकृष्णपक्षनिषेधो नास्त्येव। यदा देहापगमस्तदानीमेव तत्प्राप्तिरिति॥

इति दक्षिणायनाधिकरणम् ॥ ९ ॥

इति श्रीकण्ठशिवाचार्यविरचिते ब्रह्ममीमांसाभाष्ये चतुर्थाध्यायस्य द्वितीयः पादः ॥ ४ ॥ २ ॥

शब्दो योगिनां मुमुक्षूणामेवावृत्त्यनावृत्तिहेतुनिशादिपदं दक्षिणायनोत्तरायणरूपमरणकालरूपविशेषपरमित्यभिप्रायेणाक्षेपः। तं कालं वक्ष्यामीति प्रतिज्ञाय मार्गद्वयपर्वणामुपदेशात् कालशब्दः कालाभिमानिदेवताबहुलातिवाहिकगणपरः। 'आवृत्तिं चैव योगिना' मिति योगिशब्दो न मुमुक्षुमात्रविषयः किन्त्वावृत्त्यनावृत्तिभाजामैश्वर्यार्थिनां मुमुक्षूणां च योगिनां साधारण इति परिहारः॥ इति दक्षिणायनाधिकरणम्॥ ९ ॥

इति श्रीशिवातिवादिमूर्द्धन्यशिवदर्शनस्थापनधुरन्धरसकलदेवभूदेवप्रतिष्ठापक-
श्रीमच्चन्नबोम्मभूपालहृदयकमलकुहरविहरमाणश्रीसाम्बशिवप्रेरितस्य
श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरिवर-
सूनोरप्पय्यदीक्षितस्य कृतौ श्रीकण्ठशिवाचार्यविरचितब्रह्म-
मीमांसाभाष्यव्याख्यायां शिवार्कमणिदीपिकाख्यायां
चतुर्थस्याध्यायस्य द्वितीयः पादः ॥ ४ ॥ २ ॥

नयमणिमालायाम्

अथ दक्षिणायनाधिकरणम् ॥ ८ ॥

सू० ॥ अतश्चायनेऽपि दक्षिणे ॥ १९ ॥ योगिनः प्रति स्मर्यते स्मार्ते चैते ॥ २० ॥

एवमपि दक्षिणायनमृतस्य न ब्रह्मलोकगतिः। कथमन्यथोत्तरायणकालं भीष्मः प्रतीक्षेत ॥ ३७१ ॥
विद्याफलनैयत्यात्तदा मृतस्यापि सास्त्येव। भीष्मस्य तु प्रतीक्षा कर्तुं स्वच्छन्दमृत्युताप्रथनम् ॥ ३७२ ॥

इति दक्षिणायनाधिकरणम् ॥ ९ ॥

इति श्रीमदप्पय्यदीक्षितकृतौ अधिकरणसारसङ्ग्रहे नयमणिमालाख्ये तृतीयपरिच्छेदे तुरीयाध्यायस्य द्वितीयः पादः ॥ ४ ॥ २ ॥

॥ श्रीः ॥

शिवाभ्यां नमः ।

श्रीकण्ठाचार्यकृतौ

ब्रह्ममीमांसाभाष्ये

अथ चतुर्थाध्यायस्य तृतीयः पादः ॥

अथ अर्चिराद्यधिकरणम् ॥ १ ॥

सू ॥ अर्चिरादिना तत्प्रथितेः ॥ १ ॥

पूर्वत्रोपासकस्य हृदयगतपरमेश्वरानुग्रहेण प्रकाशितद्वारस्य मूर्धन्यनाड्या देहान्निष्क्रान्तिरभिहिता । एवंविधस्य ब्रह्मप्राप्तिरर्चिरादिना मार्गेणैव, उतान्यथाऽपि संभवतीति प्रथममिह विचार्यते । तथा हि । एकत्र 'यत्रासौ केशान्तो विवर्तते । व्यपोह्य शीर्षकपाले । भूरित्यग्नौ प्रतितिष्ठति । भुव इति वायौ । सु-

शिवार्कमणिदीपिकायाम्

अथ तुरीयाध्यायस्य तृतीयः पादः ॥

अथ अर्चिराद्यधिकरणम् ॥ १ ॥

पूर्ववृत्तार्थानुवादेन सङ्गतिसूचनपूर्वकमाद्याधिकरणस्य विचार्यं दर्शयति—पूर्वत्रेति । मार्गैक्योपपादकप्रत्यभिज्ञानसत्वाऽसत्वाभ्यां संशयः । ननु यथा बह्वीषु शाखासु श्रुतापि दहरविद्यैका एवं मार्गोऽप्येकः स्यादिति पूर्वपक्ष इत्याशङ्क्य पूर्वपक्षमुपपादयति—तथा हीति । स्थानगुणादिप्रत्यभिज्ञानाद्युक्तं विद्यैक्यम् । इह तथा मार्गैक्योपपादिनी प्रत्यभिज्ञा न दृश्यते । न ख'ल्वन्तरेण तालुके । य एष स्तन इवावलम्बते । सेन्द्रयोनिः । यत्रासौ केशान्तो विवर्तते व्यपोह्य शीर्षकपाले ।' इति श्रुतानि तालुकान्तरवलम्बमानावयवकेशान्तशीर्षकपालानि व्याहृतिविद्यायामिव विद्यान्तरेषु मार्गपर्वत्वेन श्रुतानि । तत्राग्न्यादीनां तु ब्रह्मण इव प्राप्यत्वेनैव श्रवणं मार्गपर्वत्वेन । शैब्यप्रश्ने च 'स सामभिरुन्नीयते ब्रह्मलोक'मिति सामवेदपठितानां साम्नामेव ब्रह्मलोकपर्यन्तप्रापकत्वं श्रूयते । न त्वर्चिरादिपर्वमध्ये किञ्चिदप्याम्नायते । तथा छान्दोग्ये दहरविद्यायां 'यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्व आक्रमत' इति । सूर्यरश्मीनामेवेतरव्यवच्छेदेन प्रापकत्वं श्रूयते 'सूर्यद्वारेण ते विरजाः प्रयन्ती'ति । यत्रार्चिरादिमार्गान्तर्गतस्यादित्यस्य श्रवणं तत्रापि 'स यावत्क्षिप्येन्मनस्तावदादित्यं गच्छे'दिति श्रुत्यन्तरे त्वरावचनादादित्यप्राप्तेरर्चिरादिपूर्वपर्वानपेक्षत्वं प्रतीयते । कौषीतकिशाखायां 'स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छती'ति प्रथममाद्यपर्वभूताग्निश्रवणेऽपि तदनन्तरं 'स वायुलोकं स वरुणलोकं स आदित्यलोकं स चन्द्रलोकं स प्रजापतिलोक'मित्यन्यान्येव मार्गपर्वाणि श्रूयन्ते । तत्र वैरूप्यभूयस्त्वात्किञ्चित्प्रत्यभिज्ञानं सदप्यसत्कल्पं, तथा बृहदारण्यके क्वचित् 'यदा वै पुरुषोऽस्माल्लोकात्प्रैति स वायुमागच्छती'ति वायुः प्रथमप्राप्यः श्रूयते । एवं मार्गपर्वभेदा-

वरित्यादित्ये । मह इति ब्रह्मणि । आप्नोति स्वाराज्यम्' इति ब्रह्मप्राप्तेरर्चिरादिगतिमन्तरेणाप्युपपत्तिरवगम्यते । तस्मात् ब्रह्मप्राप्तौ नार्चिरादिनियम इति प्राप्तेऽभिधीयते । विद्वानर्चिरादिनैव ब्रह्म प्राप्नोति पञ्चाग्निविद्यादिषु 'तेऽर्चिषमभिसंभवन्ति' इत्यादिनाऽर्चिरादेर्ब्रह्मप्रापकत्वेन प्रसिद्धत्वात् ।' 'भूरित्यग्नौ' इत्यादिषु न ब्रह्मप्राप्तिमार्ग उच्यते, किंतु तत्तद्विभूतिप्राप्तिरेव । ततः परप्राप्तिरर्चिरादिनैव । निरन्वयोपासकानां नार्चिरादिरिति केचित् ॥

इति अर्चिराद्यधिकरणम् ॥ १ ॥

त्तत्क्रमभेदाच्च यथाम्नानं प्रकरणभेदेन विद्याभेदेन च मार्गभेद इत्येव युक्तम् । अन्यथा स्थानगुणभेदेऽप्युपास्यं ब्रह्म सर्वत्रैकमिति सर्वासामपि दहरवैश्वानरादिविद्यानामैक्यं प्रसज्येतेति । एवं प्राप्ते सिद्धान्तः । सू० ॥ अर्चिरादिना तत्प्रथितेः ॥ १ ॥ प्रसिद्धस्तावदर्चिरादिमार्गः सर्वविद्यासाधरण इति । छान्दोग्ये पञ्चाग्निविद्यायां 'तद्य इत्थं विदु'रिति प्रकृतान्पञ्चाग्निविदः संकीर्त्य 'ये चेमेऽरण्ये श्रद्धां तप इत्युपासत' इति विद्यान्तरवतामप्यनुकीर्तनाद्बृहदारण्यकेऽपि तथैव 'ये चामी अरण्ये श्रद्धं सत्यमित्युपासत' इति विद्यान्तरवतामप्यनुकीर्तनात् । ननु यासु विद्यासु न कश्चिदपि मार्गः श्रूयते तद्विषयमिदं विद्यान्तरवदनुकीर्तनं भविष्यति । स्यादेतदेवं यदि मार्गैक्यमशक्योपपादनं स्यात् । शक्यते तु तदुपपादयितुं नानाशाखागतनानाविद्यासु श्रुतानां पर्वणामुपसंहारेण लाघवाद्बाधकाभावात्तत्र तत्रैकदेशप्रत्यभिज्ञानसत्वाच्च । तथाहि व्याहृतिविद्यायां स्तनाकृतिनेन्द्रस्य जीवस्य परमेश्वरस्य वा स्थानभूतावयवेन निर्गत्य केशान्तस्थानस्य शिरःकपालस्यातिलङ्घनं यदुक्तं तन्मूर्धन्यनाड्या निष्क्रमणमेव । अग्न्यादीनाञ्च मार्गपर्वभूतानामेव कीर्तनं । तत्र यद्ब्रह्मणीवाग्न्यादिष्वपि प्रतिष्ठितत्वश्रवणं तु तेषु कियत्कालं विश्रान्तिरस्तीत्यभिप्रायेण । व्याहृतिविद्यायां हि चतुर्थव्याहृतिरूपस्य ब्रह्मण इव व्याहृतित्रयरूपाणामग्न्यादीनामस्त्युपास्यत्वं तद्बलात्तेषां लोकेषु विश्रान्तिवचनं युक्तम् । 'स सामभिरुन्नीयते ब्रह्मलोक' मित्यत्र 'यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण पुरुषमभिध्यायीते'त्येकमात्रद्विमात्रप्रणवसाधनकोपासनानुकीर्तनानन्तरं त्रिमात्रप्रणवसाधनकोपासनाविधानात् तत्र प्रणवमात्राणामृग्यजुस्सामरूपतया प्रतिपादितत्वाच्च । विद्यासाधनप्रणवतृतीयमात्रारूपाण्येव सामानि विद्यासाधनत्वाद्ब्रह्मप्रापकत्वेनानुकीर्तितानि न तु मार्गतया । 'अथैतैरेव रश्मिभि'रित्यत्रावधारणं रश्मिविधानार्थप्राप्ततदयोगव्यवच्छेदानुवादकं न त्वितरेषामर्चिरादीनां व्यवच्छेदकम् । एकस्य वाक्यस्य रश्मिप्रापणे तदितरव्यवच्छेदे च तात्पर्यायोगात् त्वरावचनं पितृयाणमार्गापेक्षयोपपन्नं न पूर्वपर्वाणि व्यवच्छिनत्ति । नापि विदुषामेव मार्गान्तरमवधित्वेनापेक्षते । तत्र वायुवरुणादिश्रवणं तु विद्यासु गुणोपसंहारवन्मार्गपर्वोपसंहारेणोपपद्यत इति न मार्गैक्यविरोधि । तत्पाठक्रमोऽपि न तद्विरोधी । श्रुत्यादिबलेनैकरूपक्रमोपपादनसम्भवात् । तस्माल्लाघवाद्बाधकाभावाच्चैक एव मार्गः । न चैवं दहरवैश्वानरादिविद्यानामैक्यमभ्युपगन्तुं शक्यं गुणानामानन्त्येनाशक्यानुष्ठानत्वात् । मार्गपर्वणां तु नानाशाखासु श्रुतानामुपसंहारेऽपि न द्वादशसंख्यातिलङ्घनमस्तीति वैषम्यम् । केचिदिति । तेषां मते 'अर्चिरादिना तत्प्रथिते'रितीदं सूत्रं प्रथितिग्रहणात्प्रायोऽ-

अथ वाय्वधिकरणम् ॥ २ ॥

सू ॥ वायुमब्दादविशेषविशेषाभ्याम् ॥ २ ॥

अत्र श्रुतस्यार्चिरादिक्रमस्य मध्ये श्रुत्यन्तरसिद्धक्रमोऽत्र निवेशनीयः अथवा अयमेव क्रम इति संदिह्यते। 'तेऽर्चिषमभिसंभवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान् षडुदङ्ङेति मासांस्तान् मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः स एनान् ब्रह्म गमयति' इत्यर्चिरादिक्रमश्छान्दोग्यसिद्धः । बृहदारण्यके 'यदा वै पुरुषोऽस्माल्लोकात्प्रैति स वायुमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य खं तेन स ऊर्ध्व आक्रमते स आदित्यमागच्छति' इति संवत्सरादित्ययोर्मध्ये वायुः श्रुतः।

भिप्रायं नेतव्यम् । अवश्यं च प्रयोऽभिप्रायमिदमिति सर्वैरपि वक्तव्यम् । हिरण्यगर्भपर्यन्तानां देवानां स्वस्वलोकेषु स्थित्वैव मुच्यमानानामर्चिरादिमार्गासंभवात् । न च भुवि विद्यामनुष्ठाय मुच्यमानानां मनुष्याणामयमेक एव मार्ग इति नियमो विवक्षित इति वाच्यम् । मधुविद्योपासकानां वसुरुद्रादित्यमरुत्साध्यगणपदप्राप्तिपूर्विकायां मुक्तौ वस्वादिपदपर्वकमार्गान्तरावश्यंभावादिति ॥

इति अर्चिराद्यधिकरणम् ॥ १ ॥

अथ वाय्वधिकरणम् ॥ २ ॥

सू० ॥ वायुमब्दादविशेषविशेषाभ्याम् ॥ २ ॥ यदुक्तं नानाशाखाश्रुतसर्वपर्वयुक्त एको मार्ग इति तन्न युक्तम् । मार्गैक्ये वायोः क्वचिदपि निवेशासंभवेन कासुचिच्छाखासु तदाम्नानस्याप्रामाण्यप्रसङ्गादिति पूर्वाधिकरणसिद्धार्थाक्षेपेण प्रत्यवस्थानात्सङ्गतिः । **अर्चिरादिक्रमस्य मध्य इति ।** अर्चिरादिरूपस्य क्रैमिकस्यातिवाहिकगणस्य मध्य इत्यर्थः । **श्रुत्यन्तरसिद्धोऽपि क्रम इति ।** क्रमिकः, पर्वविशेष इत्यर्थः । ननु श्रुतोऽर्चिरादिरातिवाहिकगणस्तन्मध्ये निवेशनीयत्वेन विचारविषयः पर्वविशेषः क इत्याकाङ्क्षायां तदुभयं विवेचयति—तेऽर्चिषमिति । 'स आदित्यमागच्छती'त्यनेन 'वायुः श्रुत' इत्यस्यान्वयः । ततस्संवत्सरादित्ययोर्मध्ये स निवेश्यो न वा इति संशयवाक्यं द्रष्टव्यम् । वायोस्संवत्सरादित्यमध्यनिवेशनीयदेवलोकरूपत्वतदभावाभ्यां संशयः । अत्रेयं विषयशुद्धिः । पञ्चाग्निविद्यायामर्चिरादिमार्गमामनन्तश्च छन्दोगाः मासादित्ययोर्मध्ये संवत्सरं पठन्ति । वाजसनेयिनस्तु 'मासेभ्यो देवलोकं देवलोकादादित्य'मिति तयोर्मध्ये देवलोकं

नयमणिमालायाम्

अथ अर्चिराद्यधिकरणम् ॥ १ ॥

सू० ॥ अर्चिरादिना तत्प्रथितेः ॥ १ ॥

यत्रासौ केशान्तश्रुतौ विनाप्यर्चिरादिकं मार्गम् । ब्रह्मप्राप्तिश्रवणान्नासौ विदुषां गतौ नियमः ॥ ३७३ ॥

येचेमेऽरण्य इति श्रवणात्सर्वत्र नियत एवासौ । ······दिति विभूत्याप्तिं ब्रह्मप्राप्तौ नेतरं मार्गम् ॥ ३७४ ॥

इति अर्चिराद्यधिकरणम् ॥ १ ॥

---

१ क्रमप्राप्तस्येति. ख. पा.

स निवेश्यो न वेति संशये न निवेश्योऽश्रवणादिति प्राप्ते ब्रूमः । गुणोपसंहारन्यायेन संवत्सरादूर्द्ध्वमादित्यात् पूर्वं वायुर्निवेश्यः । बृहदारण्यक एवा-

पठन्ति । मार्गैक्यपक्षे तावुभावुभयत्रोपसंहार्यौ । तयोश्च संवत्सरो मासादनन्तरमेव निवेशनीयः । अहश्शुक्लपक्षोत्तरायणमासानामुत्तरोत्तरमधिकपरिमाणानां कालानामुपर्युपरि निवेशनदर्शनात् परिशेषाद्देवलोकस्तदनन्तरं निवेशनीयः । ततश्च यदि देवलोक एव वायुः स्यात्तदा संवत्सरादित्ययोर्मध्ये वायोर्निवेशो लभ्यते । तल्लाभे सत्येक एव मार्ग इति पूर्वोक्तमुपपद्यते । यदि देवलोकादन्यो वायुस्स्यात्तदा तस्य न निवेशो लभ्यते । तदलाभे च मार्गैक्ये तस्यान्यत्रापि निवेशासंभवात् । शाखाविशेषेषु तदाम्नानप्रामाण्योपपादनार्थं मार्गभेदमभ्युपगम्य 'यदा वै पुरुषोऽस्माल्लोका'दित्यादिवाजसनेयकवाक्यश्रुते मार्गे वायुः प्रथमपर्व 'स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति स वायुलोक'मिति कौषीतकिवाक्यश्रुते मार्गे द्वितीयं पर्वेत्युपपादनीयमित्येक एव मार्ग इत्येतत्पूर्वोक्तं नोपपद्यत इति । तत्र पूर्वपक्षमाह—**न निवेश्योऽश्रवणादिति** । अत्रायमाशयः । न तद्वाजसनेयकवाक्यानुसारेण वायुः प्रथमपर्वतया निवेशनीयः । कौषीतकिवाक्यपाठक्रमविरोधात् । न च कौषीतकिवाक्याम्नातार्च्युपसंहारेण वाक्यद्वयाविरोधं संपाद्य द्वितीयपर्वतया निवेशनीयः । 'अर्चिषोऽहरि'ति पञ्चाग्निविद्याम्नातपञ्चमीविभक्तिश्रुत्यार्च्यनन्तरमह्नः प्राप्तेः । न चादित्यात्पूर्वं निवेशनीयः । 'देवलोकादादित्य'मिति श्रौतक्रमविरोधात् । ननु 'स वायुमागच्छती'त्यादिवाजसनेयकवाक्ये नीरन्ध्रतया मार्गमावृत्य स्थितो वायुः स्वावयवप्रहाणेन रथचक्रप्रमाणच्छिद्ररूपं मार्गं ददाति तेनादित्यमागच्छतीति वायुदत्तमार्गस्यादित्यप्राप्तौ करणत्वं श्रूयते । न चोर्ध्वदेशोत्क्रमणमात्रे वायुदत्तमार्गस्य करणत्वं श्रुतं नत्वादित्यमण्डलोत्क्रमण इति वाच्यम् । ऊर्ध्वदेशस्य विशेषाकाङ्क्षायां वाक्यशेषश्रुतादित्यमण्डलरूपतया पर्यवसानादिति चेत् । किं ततः । 'देवलोकादादित्य'मित्यपि हि श्रुतिरेव । 'संवत्सरादादित्यं देवलोकादादित्य'मिति पञ्चम्योः श्रुतित्वाविशेषेऽपि संवत्सरस्य पूर्वनिवेशे माससमभिव्याहारवद्वायुदेवलोकयोर्मध्ये देवलोकस्य पूर्वनिवेशे किञ्चिद्विनिगमकमस्ति । न च 'संवत्सरादादित्य'मिति व्यवहिते पञ्चमी श्रूयते 'तेन स ऊर्ध्व आक्रमत'इति साधकतमत्ववाचिनि तृतीयात्वव्यवधान एवोपपद्यत इति वाच्यम् । 'स आदित्यमागच्छती'त्येतदनन्तरं हि 'तस्मै स तत्र विजिहीते यथाडम्बरस्य खं तेन स ऊर्ध्व आक्रमते स चन्द्रमसमागच्छति तस्मै स तत्र विजिहीते यथा दुन्दुभेः खं तेन स ऊर्ध्व आक्रमते स ब्रह्मलोकमागच्छत्यशोकमहिमं तस्मिन्वसति शाश्वतीस्समा' इति श्रूयते । तत्रादित्यदत्तस्याडम्बराख्यवाद्यविशेषप्रमाणस्य मार्गस्य चन्द्रप्राप्तावव्यवधानेन कारणत्वं यद्यपि संभवति तथापि चन्द्रदत्तस्य मार्गस्य शोकमहिमशब्दोक्तदुःखज्ञानरहितपरब्रह्मलोकप्राप्तावव्यधानेन कारणत्वं न संभवति । विद्युदादिप्राप्तिव्यवधानात् । तथा च तृतीयापि व्यवहिते श्रूयत इति नैतद्विनिगमकम् । प्रसिद्धं च ज्योतिष्टोमादिवाक्येषु व्यवहितकरणे तृतीयाश्रवणम् । तर्हि विनिगमकाभावे वायुदेवलोकयोः पौर्वापर्ये विकल्पोऽस्त्विति चेत् । मार्गभेदपर्याय एवायं विकल्पशब्दः । न हि विद्यानुष्ठानमात्रार्थो मार्गोपदेशः किं तु ब्रह्मलोकप्राप्त्यर्थोऽपि । तथापि केचिद्देवलोकपूर्वकेण मार्गेण ब्रह्मलोकं प्राप्नुवन्ति

न्यत्र 'मासेभ्यो देवलोकं देवलोकादादित्यम्' इति पठितेऽर्चिरादिक्रमे छान्दोग्यश्रुतित उपसंहार्यात् मासाधिककालरूपत्वेन मासेभ्य उपरि निवेशनीयात् संवत्सरादुपरि देवलोकः श्रुतः, सोऽपि वायुरेव। देवलोकशब्दो देवानां लोक इति व्युत्पत्तेरविशेषेण वायुवाचकः। वायुशब्दस्तस्यैव विशेषेण वाचक इत्यविशेषविशेषाभ्यां देवलोकवायुशब्दाभ्यां वायुरेक एवाभिहित इत्यब्दादूर्द्ध्वमादित्यात् पूर्वं वायुर्निवेश्यः। 'वायुर्देवानामासनभूतः' इति श्रूयते। 'योऽयं पवत एष देवानां ग्रह' इति ॥

इति वाय्वधिकरणम् ॥ २ ॥

अथ तटिदधिकरणम् ॥ ३ ॥

सू ॥ तटितोऽधिवरुणः संबन्धात् ॥ ३ ॥

कौषीतकिनामुपनिषदि श्रूयते। 'स एतं देवयानं पन्थानमापद्याग्निलोकमाग-

---

केचिद्वायुपूर्वकेणेति मार्गभेद एवाऽश्रितो भवति। तदाश्रयणावश्यंभावे च व्यर्थमाम्नानस्थानाद्वायोर्देवलोकस्य वा प्रच्यावनम्। यथापाठक्रमं स्वस्वस्थानादप्रच्युतैरेव पर्वविशेषैर्घटिता बहवो मार्गास्सन्तु। न च 'योऽयं पवते एष देवानां ग्रह' इति श्रवणान्नानयोः पौर्वापर्यं व्यवस्थापनीयमिति वाच्यम्। 'संवत्सरः सुवर्गो लोक' इत्यनुवादान्तरश्रवणात्संवत्सर एव देवलोक इत्यपि कल्पनासंभवेन सोमादित्ययोर्मध्ये संवत्सरदेवलोकौ निवेशनीयौ। न तु देवलोकवायू इत्यत्र विनिगमकाभावप्रसङ्गात्। तस्मात्स्वस्वस्थानादप्रच्युतैर्यावदाम्नातपर्वविशेषैर्युक्ता बहवो मार्गा इत्येव युक्तमिति। सिद्धान्तस्तु कासुचिच्छाखासु श्रवणं देवलोकपरं 'योऽयं पवत' इत्यादिश्रवणात्। न च 'संवत्सरस्सुवर्गो लोक' इति यत्तदर्थवादमात्रम्। दिव्यानां विभावानां वायुपाशधृतत्वेन वायोः स्तंभवद्देवगृहान्तर्भावोपपत्त्या स्वार्थपरत्वसंभवात्। तस्मा'द्देवलोकादादित्यं' 'तेन स ऊर्ध्वमाक्रमत' इति श्रुत्योरेकविषयत्वात्तदुभयविरोधेन पाठक्रमोऽनादरणीय इति संवत्सरादित्यमध्यनिविष्टेन देवलोकरूपेण वायुना युक्त एव मार्ग इति ॥

इति वाय्वधिकरणम् ॥ २ ॥

अथ तटिदधिकरणम् ॥ ३ ॥

सू० ॥ तटितोऽधिवरुणः सम्बन्धात् ॥ ३ ॥ एवं वायुपठनप्रयुक्ता मार्गभेदशङ्का निराकृता। अथ तदनन्तरश्रुतवरुणेन्द्रप्रजापतिपठनप्रयुक्ता सा निराक्रियते इति स-

---

नयमणिमालायाम्

अथ वाय्वधिकरणम् ॥ २ ॥

सू० ॥ वायुमब्दादविशेषविशेषाभ्याम् ॥ २ ॥

श्रुत्यन्तरप्रसिद्धो ह्यनिलो नात्रोपसंहार्यः। क्वचिदब्ध्यनन्तरं क्वचिदादित्यात्पूर्वमाम्नानात् ॥ ३७५ ॥

तेनेति देवलोकादिति च श्रौतमस्य बलवत्त्वात्। मध्येऽब्दादित्यं स्याद्वायुस्स हि देवलोकोऽपि ॥ ३७६ ॥

इति वाय्वधिकरणम् ॥ २ ॥

---

(१) 'विशेषित' इति ख. पाठः।

च्छति स वायुलोकं स वरुणलोकं स इन्द्रलोकं स प्रजापतिलोकं स ब्रह्मलोकम्' इति । तत्राग्निलोकशब्दोक्तस्यार्चिषः प्राथम्यमविरुद्धम्, वायोरादित्यस्य च श्रुत्यन्तरसिद्धश्रौतक्रमेणात्रत्यपाठक्रमबाधात् संवत्सरादूर्ध्वं क्रमेण विनिवेशः । अत्र वरुणादयोऽपि श्रुताः । तेऽर्चिरादिमार्गे निवेशयितुं शक्या उत न शक्या इति संशये नियामकाभावादशक्यसंनिवेशा इति प्राप्ते ब्रूमः । वरुणादीनामपि संनिवेशः कार्यः । तत्र विद्युल्लोकस्योपरि वरुणलोकस्य संबन्धवशात् व्यवस्था

ङ्गतिः । अत्रापि किमेक एव मार्गः उत भिन्नमार्ग इति प्रथमं संशयः । मार्गैक्ये वरुणादयो निवेशयितुं शक्या न वेति भाष्योक्तस्तदर्थसंशयः । यथापाठमादित्यात्पूर्वं वरुणस्यादित्यानन्तरमिन्द्रप्रजापत्योश्च निवेशो न संभवति । देवलोकादित्यचन्द्राणां श्रौतक्रमेण तेषां पाठक्रमस्य बाधात् । अन्यत्रापि निवेशो न संभवति । अर्चिरादिविद्युत्पर्यन्तानां सर्वेषामपि श्रौतक्रमसत्वात् । तदनन्तरममानवपुरुषस्यैव ब्रह्मपर्यन्तं गमयितृत्वश्रवणात् । विद्युदनन्तरं वरुणादिसविद्युतमारभ्य तस्य ब्रह्मगमयितृत्वाभावप्रसङ्गात् । एवं वरुणेन्द्रप्रजापतिसहितस्य मार्गस्य प्रसिद्धार्चिरादिमार्गाद्भेदावश्यंभावेनाशक्योपपादने मार्गैक्ये 'देवलोकादादित्य'मिति पञ्चम्या इव 'संवत्सरादादित्य'मिति पञ्चम्या अप्यव्यवहितविषयत्वं न भङ्गनीयम् । नापि यया कया चार्थवादमात्रावलम्बनेन वायुदेवलोकयोरैक्यं समाश्रयणीयमिति संवत्सरसहितो देवयानमार्ग एकः देवलोकसहितोऽपरः वायुप्रथमपर्वान्यः तद्द्वितीयपर्वेतर इति चत्वारो देवयानमार्गा इति युक्तम् । तथा स'त्यारोहथो बहुदेवयानान्ये पन्थानो बहवो देवयाना' इति बहुवचनानुगृहीता 'ये चत्वारः पथयो देवयाना' इति देवयानचतुष्ट्वश्रुतिरप्युपपद्यत इति पूर्वः पक्षः । **नियामकाभावादिति** । प्रमाणाभावादित्यर्थः । सर्वत्रापि साधकसत्त्वादिति भावः । **विद्युत्पूर्वकेति** । श्रुतिक्रमविरोधात्स्वस्थानतः प्रच्युतेषु विद्युतोऽनन्तरं वरुणस्य निवेशः विद्युद्वरुणयोर्वृष्टिगतनीरसम्बन्धित्वाद्विद्युत उपरि स नीररसितदर्शनेन नीराधिपतेर्वरुणस्य तत उपरिभावौचित्याच्च । तदनन्तरमिन्द्रप्रजापत्योर्निवेशः । परिशेषा'दागन्तुकानामन्ते निवेश' इति न्यायाच्च अत्रामानवपुरुषस्य ब्रह्मप्रापकत्वं वरुणादिव्यवधानेन तत्साहित्येन वोपपद्यत इति न विरोधः । एवं वरुणादिनिवेशासम्भवप्रयुक्तमार्गभेदशङ्कानिरासे सति मार्गैक्यनियमे संभवति अनियमाश्रयणस्य विकल्पाश्रयणस्य चायुक्तत्वात् । पूर्वोक्तरीत्या संवत्सरदेवलोकयोः क्रमिकपर्वत्वेन वायुदेवलोकयोरैक्येन च मार्गैक्यसमर्थनमेव युक्तम् । देवयानबहुत्वश्रवणं तु 'तृप्ता यात पथिभिर्देवयानै'रिति पितृयाणेऽपि देवयानत्वव्यवहारदर्शनात् । तत्र प्राप्यलोकसंस्थानविशेषप्राप्यावान्तरमार्गभेदसद्भावाच्च पितृयाणसाहित्येन बहुत्वमुपपादनीयम् । अत एव 'ये चत्वार' इति मन्त्रे 'तेषां यो अज्यानिमजीतिमावहा'दिति तेषां मार्गाणां मध्ये एकस्यैव मार्गस्याजरामरत्वप्रापकत्वमुक्तम् । अत एवोपकोसलविद्याया 'मेष देवपथो ब्रह्मपथ' इति वर्णितस्यार्चिरादिरूपस्य देवयानमार्गस्य ब्रह्ममार्गत्वरूपो विशेषो दर्शितः । तेन हि विशेषणेन ब्रह्ममार्गव्यतिरिक्तोऽपि देवमार्गोऽस्तीत्यवसीयते । तस्मादर्चिरहश्शुक्लपक्षोत्तरायणसंवत्सरदेवलोकादित्य-

युक्ता। विद्युत्पूर्वकवृष्टिगतनीरस्य वरुणोऽधिपतिः प्रसिद्ध इति विद्युद्वरुणयोः संबन्धः। तदनन्तरमिन्द्रप्रजापतिलोकौ, परिशेषात्, इत्यविरोधः॥

इति तदिद्धिकरणम्॥ ३॥

अथ आतिवाहिकाधिकरणम्॥ ४॥

सू ॥ आतिवाहिकास्तल्लिङ्गात् ॥ ४ ॥

किमर्चिरादयो मार्गचिह्नभूताः स्थानभेदा, उत विदुषां गमयितारो देवताविशेषा इति संदेहः॥ किं तावत् प्राप्तम्? स्थानभेदाः, तल्लाञ्छनसत्त्वात्। लोके हि ग्रामान्निर्गत्य नदीं गत्वा ततो घोषः प्राप्तव्य इति व्यवहरन्ति। तद्वदर्चिरादयोऽपीति प्राप्तेऽभिधीयते। अर्चिरादयो मार्गाभिमानिनो विदुषां गमयितारो देवताविशेषा एव। 'तत्पुरुषोऽमानवः स एनान् ब्रह्म गमयति' इति

चन्द्रविद्युद्वरुणेन्द्रप्रजापतिरूपद्वादशपर्वशाल्येक एव ब्रह्मपथरूपो देवयानमार्गः। 'ये चत्वार' इति मन्त्रे देवयानचतुष्ट्वकीर्तनं तु 'सर्व एते पुण्यलोका भवन्ती'ति श्रुत्युक्तमुमुक्ष्वाश्रमत्रयप्राप्यपुण्यलोकप्राप्तिहेतुमार्गाणामाश्रमत्रित्वोपाधिकया त्रित्वसंख्यया क्रोडीकारेण ब्रह्मपथसंयोजनेन च लब्धस्य चतुष्ट्वस्यानुवादरूपमित्युपपादनीयमिति न कश्चिद्विरोध इति भावः॥

इति तदिद्धिकरणम्॥ ३॥

अथ आतिवाहिकाधिकरणम्॥ ४॥

सू०॥ आतिवाहिकास्तल्लिङ्गात्॥ ४॥ अर्चिरादीनां क्रमो निरूपितः तत्स्वरूपमिह चिन्त्यत इति सङ्गतिः। अर्चिरादिशब्दानां लोकसंस्थानविशेषदेवताविशेषान्यतरपरत्वानवधारणात्संशयः। तेऽर्चिषमित्यादिस्थाने 'अग्निलोकमागच्छती'त्यादिकौषीतकिशाखावाक्यदर्शनादर्चिरादिशब्दास्सर्वे लोकसंस्थानविशेषपराः। तथा च मार्गोपदेशवाक्यसारूप्यान्मार्गचिह्नप्रदर्शकान्यर्चिरादिवाक्यानीत्यर्चिरादयो मार्गचिह्नभूता एव न तु मुच्यमानानामतिवहने परमेश्वरेण नियुक्ता देवताविशेषाः। न चामानवपुरुषस्यातिवाहिकत्वं देवताविशेषत्वञ्च सम्प्रतिपन्नमित्यन्यैरपि तथा भाव्यमित्यस्ति नियमः। यावद्वचनं वाचनिकार्थप्रवृत्तेः। अन्यथा विद्युतमारभ्य ब्रह्मलोकपर्यन्तममानवपुरुषस्य वोढृत्वोक्तिर्विरुध्येत। विद्युद्वरुणेन्द्रप्रजापतीनां वोढृणां सत्वादिति पूर्वपक्षः। 'तेऽर्चिषमभिसंभवन्ती'त्यादिवाक्येषु विदुषामर्चिरादीनां च सामान्येन निर्दिष्टसम्बन्ध'स्स एना'नित्यग्रिमवाक्यनिर्दिष्टगम्यगमकभावरूप इति युक्तम्। सामान्यतो निर्दिष्टस्य विशेषपर्यव-

---

नयमणिमालायाम्

अथ तदिद्धिकरणम्॥ १०॥

सू०॥ तटितोऽधिवरुणस्संबन्धात्॥ ३॥

वरुणादीनां वायोरुपरि निवेशः श्रुतिविरुद्धः। नान्यत्र च संबन्धग्राहकमस्तीति न निवेशः॥ ३७७॥
विद्युत उपरि निवेशो वरुणस्य घटेत संबन्धात्। तत्संबन्धादिन्द्रप्रजापती तदुपरि स्याताम्॥ ३७८॥

इति तदिद्धिकरणम्॥ ३॥

विद्युत्पुरुषस्य गमयितृत्वलिङ्गेनार्चिरादीनामविशेषनिर्दिष्टानामपि गमयितृत्वमेव संबन्ध इति निश्चय उपपन्नः ॥ विद्युत्पुरुषस्य ब्रह्मगमयितृत्वे वरुणादिभिः किं फलमित्यत आह—

सू ॥ वैद्युतेनैव ततस्तच्छ्रुतेः ॥ ५ ॥

वैद्युतपुरुषात् परस्तात् स एव ब्रह्म गमयति 'तत् पुरुषोऽमानवः स एनान् ब्रह्म गमयति' इति श्रुतेः । वरुणादीनां तदनुग्राहकत्वेन गमयितृत्वमिति न विरोधः ॥

इति आतिवाहिकाधिकरणम् ॥ ४ ॥

अथ कार्याधिकरणम् ॥ ५ ॥

सू ॥ कार्यं बादरिरस्य गत्युपपत्तेः ॥ ६ ॥

किममानवः पुरुषः उपासकान् साक्षादेव ब्रह्म गमयति, उतान्यमिति संशये पूर्वपक्षः । कार्यं हिरण्यगर्भमेव गमयति, अस्य हि गतिरुपपद्यते । न व्यापिनः परब्रह्मणः ॥ पुनरुपपत्तिमाह—

सानाकाङ्क्षासत्वात् 'स एनानिति वाक्यस्य पुरुषत्वं गमयितृत्वं च सिद्धवत्कृत्यामानवत्वरूपविशेषमात्रप्रतिपादकत्वेन पूर्वेषामर्चिरादीनामपि आतिवाहिकपुरुषत्वावगतेश्च लोकशब्दोप्यर्चिरादिशब्दवदभिमानिदेवतायां वर्तितुमर्हतीति नास्ति तद्विरोध इति सिद्धान्तः । पूर्वपक्षशङ्कोत्तरत्वेनोत्तरसूत्रमवतारयति—सू० ॥ वैद्युतेनैव ततस्तच्छ्रुतेः ॥ ५ ॥ विद्युति भवो वैद्युतः अमानवः पुरुषः । विद्युल्लोकप्रभृतिश्रुतिबलादमानवपुरुषस्य गमयितृत्वेऽपि वरुणादीनां तदनुग्राहकत्वेन गमयितृकोटिनिवेशस्संभवतीति न तद्वैफल्यमिति भावः ॥

इत्यातिवाहिकाधिकरणम् ॥ ४ ॥

अथ कार्याधिकरणम् ॥ ५ ॥

सू० ॥ कार्यं बादरिरस्य गत्युपपत्तेः ॥ ६ ॥ गमयितृनिरूपणानन्तरं गन्तव्यं निरूप्यत इति सङ्गतिः । उतान्यमिति । हिरण्यगर्भं नारायणं वेत्यर्थः । गत्युपपत्त्यादिकं मुख्यत्वादिकं च संशयबीजम् । व्यापिन इति । नचाव्यापित्वेऽपि देशविशेषे तदनुभव एव पुरुषार्थ इति वाच्यम् । निरतिशयानन्दरूपस्य सर्वत्र तुल्यत्वादिति भावः ।

नयमणिमालायाम्

अथ आतिवाहिकाधिकरणम् ॥ ६ ॥

सू० ॥ आतिवाहिकास्तल्लिङ्गात् ॥ ४ ॥ वैद्युतेनैव ततस्तच्छ्रुतेः ॥ ५ ॥

गच्छामुं न्यग्रोधं ततो नदीपर्वतं ततो ग्रामम् । इति निर्देशौपम्यात्स्थितिचिह्नान्यर्चिराद्याः स्युः ॥ ३७९ ॥

ते देवताविशेषा नेतारो गतिजुषां विदुषाम् । उपसंहारे वैद्युतपुरुषे नेतृत्ववर्णनतः ॥ ३८० ॥

इति आतिवाहिकाधिकरणम् ॥ ४ ॥

---

(१) 'गमयितृत्व'

सू ॥ विशेषितत्वाच्च ॥ ७ ॥

'प्रजापतेः सभां वेश्म प्रपद्य' इति विशेषितत्वाच्च हिरण्यगर्भपदमेव गमयति॥

सू ॥ सामीप्यात्तु तद्व्यपदेशः ॥ ८ ॥

'ब्रह्म गमयति' इति ब्रह्मव्यपदेशस्तु हिरण्यगर्भस्य तत्सामीप्यात् । 'हिरण्यगर्भं पश्यत जायमानम्' इति प्रथमकार्यत्वश्रवणादस्य सामीप्यम् ॥

सू ॥ कार्यात्यये तदध्यक्षेण सहातः परमभिधानात् ॥ ९ ॥

प्रथमं हिरण्यगर्भपदप्राप्तावपि तदनावृत्तिश्रुतिर्न विरुध्यते । हिरण्यगर्भलोकात्यये तदध्यक्षेण सह अतःपरं कार्यब्रह्मलोकात् परं परमपदं गच्छन्तीति । तथाऽभिधीयते । "ते ब्रह्मलोके तु परान्तकाले परामृतात् परिमुच्यन्ति सर्वे ॥" इति श्रुत्या । अतो न विरोधः ॥

सू ॥ स्मृतेश्च ॥ १० ॥

"ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे। परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम् ॥" इति स्मृतेरप्येवमवगम्यते । अतो हिरण्यगर्भपदमर्चिरादिगणो नयति प्रथमम् । ततः प्रलये परं ब्रह्म प्राप्यते तेन सहेति ॥

सू ॥ परं जैमिनिर्मुख्यत्वात् ॥ ११ ॥

हिरण्यगर्भात् परमुत्कृष्टं नारायणमेव अर्चिरादिर्गमयति । परब्रह्मण एवोपादानावस्थान्तरत्वेन तत्र ब्रह्मव्यपदेशस्य मुख्यत्वादिति जैमिनिः ॥ तत्रोपपत्तिमाह—

सू० ॥ विशेषितत्वाच्च ॥ ७॥ प्रजापतेः सभामिति । 'आकाशो ह वै नाम नामरूपयोर्निर्वहिते'ति ब्रह्मविद्यां प्रस्तुत्येदमाम्नायते । तस्मादिह ब्रह्मविद एव ब्रह्मप्राप्त्यभिसन्धिः । प्रजापतेरिति च हिरण्यगर्भ एवोच्यते । 'प्रजापतिर्वै हिरण्यगर्भ' इति श्रुतेरिति भावः । सू० ॥ सामीप्यात्तु तद्व्यपदेशः ॥ ८ ॥ हिरण्यगर्भस्य प्रथमापत्यत्वेन परब्रह्मसन्निकृष्टत्वात्तत्र तद्वाचिशब्द औपचारिकः। "तस्मादेतद्ब्रह्म नामरूपमन्नञ्च जायत" इति मन्त्र इवेति भावः । सू० ॥ कार्यात्यये तदध्यक्षेण सहातः परमभिधानात् ॥ ९ ॥ परान्तकाल इति । परं हि हिरण्यगर्भस्य तन्मानेन शतवर्षपरिमितमायुः तदवसानकाल इत्यर्थः । परामृतादिति ल्यब्लोपे पञ्चमी । परं ब्रह्म प्राप्येत्यर्थः ॥ सू० ॥ स्मृतेश्च ॥१०॥ प्रतिसञ्चरः प्रलयः । अस्मिन्पक्षे फलितार्थमाह—अत इति ॥ सू० ॥ परं जैमिनिर्मुख्यत्वात् ॥ ११ ॥ 'कार्यं बादरि'रिति प्रकृतहिरण्यगर्भापेक्षमुत्कृष्टत्वं परशब्दार्थ इति व्याचष्टे—हिरण्यगर्भादिति । हिरण्यगर्भापेक्षया प्रत्यासत्त्यतिशयसत्वेन मुख्यकल्पत्वादित्यर्थः । तत्रोपपत्तिमिति । पदस्य शिवपरत्वे परममुख्यत्वसंभवेऽपि । तदनादरेण

सू ॥ दर्शनाच्च ॥ १२ ॥

'सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्' इति तत्पदस्य प्राप्यत्वं दृश्यते । अतश्च तमेव गमयतीति ॥

सू ॥ न च कार्ये प्रत्यभिसन्धिः ॥ १३ ॥

'प्रजापतेः सभां वेश्म प्रपद्य' इति यदुक्तम्, न तत्र कार्ये हिरण्यगर्भे प्रत्यभिसन्धिः, प्रजापतिशब्दस्य प्रजापालनत्वेन नारायणवाचकत्वसंभवात् । यदुक्तम् 'ते ब्रह्मलोके तु परान्तकाले परामृतात् परिमुच्यन्ति सर्वे' इति तत्रापि ब्रह्मशब्दो नारायणपरः । तस्य लोके पदे स्थित्वा योगिनः परान्तकाले पश्चिमदेहसमाप्तौ परामृतं विश्वाधिकं ब्रह्म प्राप्य मुक्ता भवन्तीति न विरोधः । 'एतानि ह वा अमृतस्य नामधेयानि' इत्यादौ शिवस्य परब्रह्मणोऽमृतशब्दाभिधेयत्वमनादिमुक्तत्वं चावगतम् । अतो विष्णुपदे प्रारब्धकार्यदेहावसाने प्रारब्धभोगपर्यन्तं स्थित्वा योगिनः परामृतं विश्वाधिकं ब्रह्म प्राप्य मुक्ता भवन्तीति । अथ सिद्धान्त उच्यते—

सू ॥ अप्रतीकालम्बनान्नयतीति बादरायण उभयथा च दोषात्तत्क्रतुश्च ॥ १४ ॥

प्रतीकालम्बना हि ते, ये चेतनमचेतनं वा ब्रह्मदृष्ट्या केवलमुपासते । अप्रती-

नारायणपरत्वाभ्युपगतावुपपत्तिमाहेत्यर्थः ॥ सू० ॥ दर्शनाच्च ॥ १२ ॥ न चात्र विष्णुशब्दश्शिवपरः इति शङ्कनीयम् । 'तद्विष्णोः परमं पदं सदा पश्यन्ति सूरय' इति प्रसिद्धवैष्णवमन्त्रैकदेशत्वेन तदर्थप्रत्यभिज्ञाविरोधादिति भावः ॥ सू० ॥ न च कार्ये प्रत्यभिसन्धिः ॥ १३ ॥ प्रपद्यत इति प्रत्यभिसन्धिः प्रत्यभिसन्धिशब्देन विवक्षितः । प्रजापालकत्वेनेति । पतिशब्दो हि पातेर्धातोर्डतिप्रत्ययेन निष्पन्नः पालके स्वरसः । 'अतस्तद्विष्णोः परमं पद'मिति मन्त्रदर्शनात्प्रजापतिशब्दस्य पालके नारायणे योगस्समाश्रयणीय इति भावः । परान्तकाल इत्यत्र परशब्देन हिरण्यगर्भस्यायुर्नोच्यते किंतु विष्णुपदे स्थितस्य विदुषश्चरमदेह इति व्याचष्टे । पश्चिमदेहेति । प्रारब्धकार्येति । विरजानद्युत्तरणपर्यन्तं प्रारब्धशेषानुवृत्तेः प्राक्समर्थितत्वाद्विष्णुपदे स्थितस्यापि प्रारब्धानुवृत्तिरस्तीति भावः ॥ सू० ॥ अप्रतीकालम्बनान्नयतीति बादरायण उभयथा च दोषात्तत्क्रतुश्च ॥ १४ ॥ अन्यत्रान्यदृष्टिरेव प्रतीकोपासनेति प्रसिद्धार्थग्रहणवारणाय व्याचष्टे—प्रतीकालम्बना इति । सकलचिदचित्प्रपञ्चविशिष्टरूपस्य ब्रह्मणः एकदेशश्चिद्रूपोऽचिद्रूपश्च प्रतीकः । "अङ्गं प्रतीकोऽवयव' इति प्रतीकशब्दस्यावयववाचित्वस्मरणात् । तस्य यदुपासनसामान्यं तत्सर्वं प्रतीकोपासनमुच्यत इति भावः । अप्रती-

(१) 'प्रतिकूले प्रतीकस्त्रिष्वेकदेशे तु पुंस्यय'मिति प्रतीकशब्दस्यैकदेशवाचित्वस्मरणादिति ख. पाठः ।

कालम्बनास्तु ते, ये विश्वाधिकं ब्रह्म साक्षादुपासते । साक्षाद्ब्रह्मोपासकान् पुरुषः साक्षाद्ब्रह्मैव गमयति, यद्विश्वाधिकं कृष्णपिङ्गलं विरूपाक्षं श्रूयते । साक्षाद्ब्रह्मोपासकस्य 'परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते' "उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम् । ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात् ॥" इत्यादिषु साक्षात् ब्रह्मप्राप्त्यवगमात् । पूर्वोक्तपक्षद्वयेऽपि दोषः श्रुतिविरोधाद्भवति । तत्क्रतुः ब्रह्मोपासको ब्रह्मैव गच्छति, न मध्ये विलम्बते, प्रयोजनाभावात् । सकलकार्यसमष्टिरूपाद्धिरण्यगर्भात् परो नारायणस्तदुपादानत्वात्, ततोऽपि परं शिवाख्यं निमित्तं विरूपाक्षं परं ब्रह्म सर्वज्ञं सर्वशक्तिकं नित्यतृप्तं स्वतन्त्रं स्वप्रकाशमिति । तथा शिवसंकल्पोपनिषदि । "परात् परतरो ब्रह्मा तत्परात् परतो हरिः । तत्परात् परतोरीशः" इति । रेफश्छान्दसः । अन्यत्र च—'नारायणपरं ब्रह्म' इति नारायणात् परत्वेन ब्रह्माभिधाय तत् कीदृशमित्याकाङ्क्षायाम् 'ऋतं सत्यम्' इति मन्त्रेण सर्वज्ञतया मनोवाग्विपर्यासरहितं स्वशक्तिमरीचिभिः सकलजगत्पूरकं स्वाविभक्तया परप्रकृतिरूपया परमानन्दचिदेकरसपरमाकाशलक्षणया स्वावस्थाभेदपरमचेतननारायणारब्धहिरण्यगर्भादिसकलकार्यप्रपञ्चया परशक्त्योमया शबलितरूपं निर्विकारं

कालम्बनास्त्विति । अप्रतीकशब्देन प्रतीकरूपप्रपञ्चविलक्षणं विश्वाधिकं ब्रह्माभिधीयत इति भावः । नयतीत्यस्य प्राप्यकर्माकाङ्क्षायामप्रतीकशब्दोक्तं तदेव विश्वाधिकं ब्रह्मोपतिष्ठत इति व्याचष्टे—साक्षाद्ब्रह्मैवेति । श्रुतिविरोधादिति । उदाहृतया कैवल्यश्रुत्या तत्र तत्रोदाहृताभिः श्वेताश्वतरादिश्रुतिभिश्च विरोधादित्यर्थः । ननु विलम्बेन परब्रह्मप्राप्त्या तद्विरोधः परिहृतः स्यादित्याशङ्कोत्तरत्वेन सूत्रशेषं व्याचष्टे—तत्क्रतुरिति । यथाक्रतुवाक्यानन्तरं हि 'स क्रतुं कुर्वीते'त्यारभ्य 'एतमितः प्रेत्याभिसंभवितास्मी'त्यन्तेन मनोमयत्वादिगुणकः परमेश्वरः 'तमहं प्राप्नवानी'त्येवंरूपक्रतोस्संकल्पस्य विषय उपन्यस्तः । तदनुसारेण यथाक्रतुवाक्यस्यैवमर्थो लभ्यते । इह यद्गुणविशिष्टब्रह्मप्राप्तिसङ्कल्पवानुपासको भवति इतः प्रेत्य तद्गुणविशिष्टब्रह्मप्राप्तिमान्भवतीति । अतस्तत्क्रतुन्यायेनोपास्यब्रह्मतादवस्थ्यं प्राप्तव्यम् । तत्प्राप्तावेव तदनुभवरूपो भोग इति न मध्ये फलप्राप्तिविरोधिविलम्बः कल्पनीयः । कल्पकाभावादिति भावः । व्यापिनः परब्रह्मणः प्राप्तौ नास्ति गत्यपेक्षेति शङ्काव्यावृत्त्यर्थश्चकारः । देशविशेषावच्छिन्नब्रह्मप्राप्तौ सत्यामेव ब्रह्मानन्दानुभवप्रयोजकः साकल्येन स्वरूपाविर्भावो भवतीति श्रुतिबलादवसीयत इति भावः । ननु ब्रह्मोपासको ब्रह्मैव प्राप्नोतीत्येतदस्तु तत्प्राप्यं हिरण्यगर्भो नारायणो वा किं न स्यादित्याशङ्क्याह—सकलकार्यसमष्टिरूपादिति । स्वशक्तिमरीचिभिरिति । स्वशक्तेर्मरीचयः तत्कार्याणि जगद्भासकाः वैषयिकवृत्त्यवच्छिन्नास्तदंशा वा । निर्विकारमिति । पूर्वमूर्ध्वरेतस्कवह्निरेतस्कपरतया व्याख्यातम् । इदानीमेवमपि संभवतीति तस्यार्थान्तरं

(१) 'तत्क्रतुवाक्यस्य' इति ख. पाठः ।

त्रिलोचनं परं ब्रह्म सर्वोत्तरमिति निरूपितम्। 'विश्वाधिको रुद्र' इति च विश्वस्मादधिकत्वेन चावगतम्। तस्माद्वैदिकानामतः परं कल्पयितुमन्याय्यमेव ॥

सू ॥ विशेषं च दर्शयति ॥ १५ ॥

ब्रह्मणो विश्वाधिकस्य तदवस्थाभेदस्योपादानस्य विष्णोस्तत्कार्यभूतस्य हिरण्यगर्भस्य च विशेषं दर्शयति श्रुतिरेव 'परात् परतरो ब्रह्मा' 'हिरण्यगर्भं पश्यत जायमानम्' 'पुरुषो वै रुद्रः' इत्यादिका। ततश्च ब्रह्मविष्णवोः परं परब्रह्मणः शिवस्य पदं परमाकाशरूपं परमानन्दमयममानवः पुरुषो गमयतीत्येव युक्तम्। यच्छङ्कितम् 'सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्' इति। तत्र विष्णुशब्दः परब्रह्मवाचकः। षड्विधस्याध्वनः पारं तदतीतं पदं हि विश्वाधिकस्य शिवस्यैवोपपन्नम्। यद्वा विष्णोः प्रपञ्चावस्थितस्य परमुत्कृष्टं पदं स्वरूपं परमाकाशरूपं परमानन्दलक्षणं शिवस्य परब्रह्मणः पदमेव। यत्रासौ निहितात्मा प्रपञ्चाकारोऽपि न संसरति। अतो न कश्चन विरोधः ॥ अत्र केचित् 'परान्तकाले परामृतात् परिमुच्यन्ति सर्वे' इति श्रुतेः परब्रह्मणः शिवस्य परमविभूतित्वेन ये विष्णुमुपासते, ते तदवस्थत्वात् ब्रह्मशब्दवाच्यस्य तस्य लोकं प्राप्य प्रादुर्भूततद्विभूतयः परान्तकाले चरमदेहावसाने परामृतं शिवं प्राप्य मुक्ता भवन्तीति विष्णूपासकानामर्चिरादिना विष्णुपदप्राप्तिपूर्वकं विलम्बेन शिवपदप्राप्तिरिति वचनादत्र न विरोध इति ॥

इति कार्याधिकरणम् ॥ ५ ॥

इति श्रीकण्ठशिवाचार्यविरचिते ब्रह्ममीमांसाभाष्ये
चतुर्थाध्यायस्य तृतीयः पादः ॥ ४ ॥ ३ ॥

दर्शितम्। अतः परं कल्पयितुमन्याय्यमेवेति 'सकलकार्यसमष्टिरूपा'दित्यारभ्यैतावत्पर्यन्तमुत्तरसूत्रार्थानुवादत्वादर्थतस्तदवतारिकाभाष्यरूपमिति द्रष्टव्यम् ॥ सू० ॥ विशेषं च दर्शयति ॥ १५ ॥ वैष्णवमन्त्रैकदेशत्वेन तदर्थप्रत्यभिज्ञानमनुसरन्नाह—यद्वेति। परमाकाशरूपा पराशक्तिरेव हि शिवस्य दिव्यस्थानरूपतयावतिष्ठते। अतस्तदवस्थाविशेषरूपस्य विष्णोः स्वरूपं भवितुमर्हति दिव्यस्थानमिति भावः। यत्रासौ निहितात्मा यत्पदं प्राप्तो विद्वान् प्रपञ्चाकारोऽपि प्रपञ्चशरीरकोऽपि न संसरति परमेश्वरवशियन्तृमात्ररूपत्वात्। अतो न कश्चन विरोध इति। शिवस्यैव मुक्तप्राप्यत्व इति शेषः। 'ते ब्रह्मलोके त्वि'त्यादिकं वैष्णवोपासनाविशेषफलप्रतिपादकत्वेन योजयति—अत्र केचिदिति। हैरण्यगर्भोपासनाविशेषफलप्रतिपादकत्वेनान्ये योजयन्तीति मतान्तरसूचनार्थं केचिद्ग्रहणम्। वचनादत्र न विरोध इति। अवश्यं हि तत्र ब्रह्मलोकशब्दः शिवलोकातिरिक्तलोकपरो

वाच्यः। तत्र स्थितस्य कालान्तरे मुक्त्यभिधानात्। अतस्तेषां मतविरुद्धत्वाद्वैष्णवोपासनाफलपरत्वे प्रत्यासत्त्यतिशयलाभाच्च ग्राह्यमित्यर्थः॥

इति कार्याधिकरणम्॥ ५॥

इति श्रीशिवाद्वैतवादिमूर्द्धन्यशिवदर्शनस्थापनधुरन्धरसकलदेवभूदेवप्रतिष्ठापकश्रीमच्चिन्नबोम्मभूपालहृदयकमलकुहरविहरमाणश्रीसाम्बशिवप्रेरितस्य श्रीभरद्वाजकुलजलधिकौस्तुभश्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पय्यदीक्षितस्य कृतौ श्रीकण्ठशिवाचार्यविरचितब्रह्ममीमांसाभाष्यव्याख्यायां शिवार्कमणिदीपिकाख्यायां चतुर्थस्याध्यायस्य तृतीयः पादः॥ ४॥ ३॥

नयमणिमालायाम्

अथ कार्याधिकरणम्॥ ५॥

सू०॥ कार्यं बादरिरस्य गत्युपपत्तेः॥ ६॥ विशेषितत्वाच्च॥ ७॥ सामीप्यात्तु तद्व्यपदेशः॥ ८॥ कार्यात्यये तदध्यक्षेण सहातः परमभिधानात्॥ ९॥ स्मृतेश्च॥ १०॥ परं जैमिनिर्मुख्यत्वात्॥ ११॥ दर्शनाच्च॥ १२॥ न च कार्ये प्रत्यभिसन्धिः॥ १३॥ अप्रतीकालम्बनान्नयतीति बादरायण उभयथा च दोषात्तत्क्रतुश्च॥ १४॥ विशेषं च दर्शयति॥ १५॥

गत्युपपत्तेर्द्रुहिणं नयति हरिं वा परं तस्मात्। यत्र शिवस्यावस्थाभेदे ब्रह्मपदमुख्यत्वात्॥ ३८१॥

शिवमेव ततोऽपि परं नयति स पुरुषं प्रतीकरहितधियः। शिवभावनया हि शिवप्राप्तिस्तत्क्रतुतया विहिता॥३८२॥

इति कार्याधिकरणम्॥ ५॥

इति श्रीमदप्पय्यदीक्षितकृतौ अधिकरणसारसङ्ग्रहे नयमणिमालायां तृतीयपरिच्छेदे चतुर्थस्याध्यायस्य तृतीयः पादः॥ ४॥ ३॥

॥ श्रीः ॥

शिवाभ्यां नमः ।

श्रीकण्ठाचार्यकृतौ

ब्रह्ममीमांसाभाष्ये

अथ चतुर्थाध्यायस्य चतुर्थः पादः ॥

अथ संपद्याविर्भावाधिकरणम् ॥ १ ॥

सू ॥ संपद्याविर्भावः स्वेन शब्दात् ॥ १ ॥

पूर्वत्रार्चिरादिना मार्गेण विद्यावतां हिरण्यगर्भनारायणपदातीतं परब्रह्मणः शिवस्य परमसुखरूपतया स्वर्गशब्दवाच्यं पदं प्राप्यमिति निरूपितम् । इह तत्प्राप्तानां स्वरूपाविर्भावादिप्रकारो निरूप्यते । 'अस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत' इति परंज्योतीरूपं महाप्रकाशं परब्रह्म प्राप्तस्य स्वरूपाविर्भाव उच्यते । तत् स्वरूपं तस्य तात्कालिकमुत पूर्वसिद्धं वेति संशयः ॥ न पूर्वसिद्धम् । किं त्वभिनिष्पत्तिश्रवणात् स्वर्गवदागन्तुकमेव । पूर्वसिद्धत्वे च कुतोऽस्य संसारः । अतस्तदुपासनाजन्यं मुक्तिफलरूपमागन्तुकम् ॥ इति प्राप्तेऽभिधीयते—ब्रह्मप्राप्तजीवस्य मलतिरोहितं ब्रह्म-

---

शिवार्कमणिदीपिकायाम्

अथ चतुर्थस्याध्यायस्य तुरीयः पादः ॥

अथ संपद्याविर्भावाधिकरणम् ॥ १ ॥

सू० ॥ संपद्याविर्भावः स्वेन शब्दात् ॥ १ ॥ सङ्गतिं दर्शयति—पूर्वत्रेति । पूर्वपादे दिव्यस्थानस्थितपरब्रह्मप्राप्तिपर्यन्तं निरूपितम् । इह तत्प्राप्तस्य स्वरूपाविर्भावसदेहत्वादिप्रकारो निरूप्यत इति सङ्गतिः । अभिनिष्पत्तिश्रवणं 'स्वेने' ति विशेषणं च संशयबीजम् । अभिनिष्पत्तिश्रवणस्य स्वेनेति विशेषणापेक्षया प्राबल्यमुपपत्तिसाहित्येन दर्शयति—पूर्वसिद्धत्वे चेति । मोक्षदशायां यत्फलरूपतया प्राप्तव्यं रूपं तत्पूर्वमप्यस्ति चेत् पूर्वमप्ययं मुक्त एव स्यात् । न च पूर्वसिद्धमप्यस्य पुरुषार्थात्मकं रूपं संसारदशायां तिरोहितं परंज्योतिरुपसन्नस्याविर्भवतीति वाच्यम् । स्वप्रकाशचैतन्यरूपस्याहमिति सर्वदा भासमानस्य तिरोधानायोगात् । एतेनाणवमलाख्येनाविद्यावरणेन तिरोहितं जीवस्वरूपमिति निरस्तम् । तिरोहितत्वे संसारदशायां जीवस्वरूपस्यानवभासप्रसङ्गात् । अणुरूपे तस्मिन् किंचिदवच्छेदेन, तिरोधानं किंचिदवच्छेदेन प्रकाश इति कल्पयितुमशक्यत्वात् । एतेनापहतपाप्मत्वादिगुणाष्टकं संसारदशायां तिरोहितं मोक्षदशायामभिव्यज्यत इत्यपि निरस्तम् । तिरोधानासंभवाद्योगदशायामपि, तदभिव्यक्त्यनङ्गीकाराच्च । तस्मात्कर्मफलवद्विद्याफलमपि लोकविशेषप्राप्त्यानन्तरमुत्पद्यमानं किंचिदङ्गीकरणीयमित्युपपत्तिसाहित्येनाभिनिष्पत्ति-

सदृशगुणं स्वरूपं पूर्वं सदेव मलावरणापगमादाविर्भवति । 'स्वेन रूपेण' इति शब्दात् तथाऽवगम्यते । अन्यथा स्वागन्तुकस्यापि रूपस्य स्वासाधारणत्वात् 'स्वेन' इति विशेषणमनर्थकं स्यात् । तत्र सर्वानुग्राहकस्य शिवस्य परब्रह्मणः प्रसादेन स्वावरणे मले विगलिते तत्सदृशगुणमात्मस्वरूपं प्रादुर्भवति, न कर्मफलवदुत्पद्यते । मलस्यानादित्वात् संसारोपपत्तिः । अतः स्वाभाविकमेव मुक्तस्य स्वरूपं चिदानन्दघनं सर्वज्ञत्वादिविशिष्टमाविर्भवति ॥

सू ॥ मुक्तः प्रतिज्ञानात् ॥ २ ॥

आत्मस्वरूपमात्रस्य प्रागेव सिद्धत्वेऽपि मलविनिर्मुक्तस्यापरिच्छिन्नानन्दाद्या-

---

श्रवणस्य प्रबलत्वात्तदनुसारेण 'स्वेने'ति विशेषणमर्थसिद्धस्वकीयत्वानुवादकमित्युपपादनीयमिति भावः । मुक्तस्य स्वरूपं चिदानन्दघनं सर्वज्ञत्वादिविशिष्टमाविर्भवतीति । अत्रेदं विवक्षितम् । वस्तुतो निरतिशयानन्द एव जीवः स्वभावतः । तस्मिन्निरतिशयेस्वरूपानन्दे प्रतियोगिविशेषापेक्षतारतम्यापन्नोत्कर्षरूपा बहवस्सन्ति विशेषाः । ते सर्वे मलमायाकर्मदेहेन्द्रियावरणैस्तिरोहिताः । तेषामावरणानि तेष्वस्तित्वप्रकाशमानत्वव्यवहारं निरुन्धाना मलमायादीनां शक्तिविशेषाः । तत्रानन्दत्वसामान्यं कदापि न तिरोहितमिति संसारदशायामपि सर्वदैवात्मनि प्रेमानुवर्तते । सुषुप्तिप्रलययोर्देहेन्द्रियव्यापारोपरमेण तदावरणीयः कियान्विशेषः प्रकाशते । कृतश्रवणमननादिकस्य निदिध्यासनं कुर्वत उपर्युपरि योगभूमिकासु मलमायादिगतानामसंख्यानामावरणशक्तीनां मध्ये काचित्काचित्क्षीयत इति तत्तदावरणीया विशेषाः क्रमेण प्रकाशन्ते । मुक्तौ सर्वासामावरणशक्तीनामवगमान्निरतिशयस्वरूपानन्दः प्रकाशते । यथा खल्वरोचकव्याधिपरिपूर्णस्य चिकित्साविशेषैः किंचित्किंचिद्व्याधिशक्त्यपचये जायमाने भोज्यवस्तुरसे तत्तदावरणीया विशेषाः क्रमेण प्रकाशन्ते । सर्वात्मना व्याध्यपगमे च रसोऽपि सर्वात्मना प्रकाशते । एवमेव योगसिद्ध्यारम्भदशाप्रभृतिमुक्तिदशापर्यन्तेषु दशाविशेषेषु सार्वज्ञ्यापहतपाप्मत्वाद्याविर्भावेऽपि विशेषोऽवगन्तव्यः । इयांस्तु विशेषः । स्वरूपानन्दस्याविर्भावः प्रकाशः घनतिरोहितस्येव चन्द्रस्य घनापगमे सार्वज्ञ्यापहतपाप्मत्वादीनां तु शक्तिविशेषरूपाणां स्वस्वकार्यप्रयोजकत्वमाविर्भावः । मणिमन्त्रादिप्रतिबद्धानां वह्निगतदाहस्फोटादिशक्तीनामिव प्रतिबन्धकमण्याद्यपाये । एवं प्राक्सिद्धयोरपि स्वरूपानन्दसार्वज्ञ्यादिगुणबृन्दयोराविर्भावस्य समर्थयितुं शक्यत्वेनाप्यभिनिष्पद्यत इत्यस्य तत्परतयार्थवत्त्वसंभवान्न तत्स्वारस्यानुसारेण स्वेनेति विशेषणं सर्वथा वैयर्थ्यमापादनीयमिति । ननु स्वेनेति विशेषणावैयर्थ्यायाभिनिष्पत्तिरौपचारिकी नेतव्येत्यस्तुनाम । सा स्वरूपानन्दाविर्भावरूपापहतपाप्मत्वाद्याविर्भावरूपा चेति कुतोऽवगम्यत इत्याकाङ्क्षायां तत्रोभयथापि गमकं क्रमेण सूत्रद्वयेनोच्यते—सू० ॥ मुक्तः प्रतिज्ञानात् ॥ २ ॥ आत्मविविदिषयोपसन्नायेन्द्राय प्रजापतिना जागराद्यवस्थापन्नात्मस्वरूप उपदिष्टे तेन च 'नाहमत्र भोग्यं पश्यामी'त्यक्षिपुरुषादिषु विनाशभयदर्शनादिदोषादात्मनो न पुरुषार्थरूपतेति पृष्टे 'चैतं त्वेव ते भूयोऽनुव्याख्यास्यामी'ति प्रतिज्ञाय 'भगवन्मर्त्यं वा इदं शरीरमात्तं मृत्युना तदस्यामृ-

विर्भाव उच्यते, 'एतं त्वेव ते भूयोऽनुव्याख्यास्यामि' इति मलप्रयुक्तजागरिताद्यवस्थाविनिर्मुक्तस्यैव वक्तव्यतया प्रतिज्ञानात् ॥ किंच—

सू ॥ आत्मा प्रकरणात् ॥ ३ ॥

तत्र 'भूयोऽनुव्याख्यास्यामि' इति प्रकृतापहतपाप्मत्वादिगुणक आत्मा वक्तव्यः प्रकरणादवगम्यते। 'य आत्माऽपहतपाप्मा' इत्यादि प्रकृत्यैव 'भूयोऽनुव्याख्यास्यामि' इत्युक्तत्वात् । अतः प्रादुर्भूतस्वाभाविकापहतपाप्मत्वादिको मुक्त आत्मा ब्रह्मसदृशगुणस्वरूप इति सिद्धम् ॥

इति संपद्याविर्भावाधिकरणम् ॥ १ ॥

अथ अविभागाधिकरणम् ॥ २ ॥

सू ॥ अविभागेन दृष्टत्वात् ॥ ४ ॥

पूर्वाधिकरणे ब्रह्मगुणस्वरूपसदृशं मुक्तस्य गुणस्वरूपमिति प्रतिज्ञातम् । तत्सादृश्यं मुक्तस्योपपद्यते न वेति विचारः । किं प्राप्तम् ? 'एको रुद्रो न द्वितीयाय

तस्यात्मनोऽधिष्ठान'मित्यादिना यदात्मस्वरूपमुपदिष्टं तन्मलमायाकर्मादिसकलबन्धप्रहाणादाविर्भूतस्वरूपानन्दमात्मतत्त्वं भवितुमर्हति । अन्यथा पुरुषार्थरूपस्यात्मतत्त्वस्योपदेष्टव्यत्वेन प्रतिज्ञातस्योपदेशालाभात् । न च दुःखाविशिष्टत्वेनैव पुरुषार्थता भवेदिति वाच्यम् । सुषुप्तिदशायां दुःखाभाववैशिष्ट्ये सत्यप्यानन्दोत्कर्षस्फुरणाभावेनापुरुषार्थतया विनाशमेवापीतो भवति । नाहमत्र भोग्यं पश्यामीति निन्दितवन्तमिन्द्रं प्रति ततो विलक्षणं पुरुषार्थरूपमात्मतत्त्वं व्याख्यास्यामीति प्रतिज्ञाय पुनरपि प्राङ्निन्दितस्यैव दुःखाभावमात्रविशिष्टस्योपदेशायोगात् । तस्मान्मलमायादिबन्धविनिर्मुक्त आविर्भूतस्वरूपानन्द आत्मा प्रजापतिविद्यायामुपदिष्ट इति प्रतिज्ञाबलादवसीयत इति भावः ॥ सू० ॥ आत्मा प्रकरणात् ॥ ३ ॥ अपहतपाप्मत्वादिगुणक आत्मा परमः प्रकृतः । स एव भूयोऽनुव्याख्यास्यामीति व्याख्येयत्वेन पुनः प्रतिज्ञातः । अतस्सएवाविर्भूतापहतपाप्मत्वादिगुणक आत्मोपदिष्ट इति प्रकरणादवसीयत इति भावः ॥

इति संपद्याविर्भावाधिकरणम् ॥ १ ॥

अथ अविभागाधिकरणम् ॥ २ ॥

सू० ॥ अविभागेन दृष्टत्वात् ॥ ४ ॥ सङ्गतिपूर्वकं संशयं दर्शयति—पूर्वाधिकरण इति । चिदानन्दघनं सर्वज्ञत्वादिविशिष्टं मुक्तस्य यत्स्वरूपमभिहितं पूर्वाधिकरणे तद्ब्रह्मसाम्यरूपमेव । ब्रह्मणोऽपि हि तथाभूतमेव रूपमतस्तन्नोपपद्यत इत्याक्षेपात्पूर्वाधिकरणसङ्गतिः । तदुपपद्यते न वेति ब्रह्मसाम्यविधिनिषेधश्रुतिभ्यां संशयः । तत्र पूर्वः

नयमणिमालायाम्

अथ संपद्याविर्भावाधिकरणम् ॥ १ ॥

सू० ॥ संपद्याविर्भावः स्वेन शब्दात् ॥ १ ॥ मुक्तः प्रतिज्ञानात् ॥ २ ॥ आत्मा प्रकरणात् ॥ ३ ॥

निष्पद्यते विमुक्तः केनचिदागन्तुकेन रूपेण । आगन्तुकताभावे निष्पत्त्यर्थो न संघटते ॥ ३८३ ॥

स्वेनेति विशेषणतः स्वरूपमात्रं प्रपद्यते सहजम् । तत्साम्यशिवसमत्वं निष्पत्तिर्मलतिरोधिमुक्तिः स्यात् ॥ ३८४ ॥

इति संपद्याविर्भावाधिकरणम् ॥ १ ॥

तस्थौ' इत्यादिषु ब्रह्मणः सदृशस्य द्वितीयस्य निषेधात् कस्यचिदपि बद्धस्य मुक्तस्य वा तत्सादृश्यमनुपपन्नमिति ॥ एवं प्राप्ते सिद्धान्त उच्यते। मुक्तस्य ब्रह्मणा सादृश्यमस्ति। कुतः? 'निरञ्जनः परमं साम्यमुपैति' 'मुक्तः शिवसमो भवेत्' इति मुक्तस्य ब्रह्मगुणस्वरूपाविभागेन ब्रह्मसदृशतया दृष्टत्वात्। अतः 'ब्रह्म वेद ब्रह्मैव भवति' इति ब्रह्मसादृश्यमेवोच्यते। मुक्त आत्मा सादृश्याद्ब्रह्मस्वरूपाविभागेन स्वस्वरूपमनुभवति। यदुक्तम् 'एको रुद्रो न द्वितीयाय' इत्यादिना सादृश्यनिषेधः क्रियत इति, तत् जीवस्य जगद्व्यापाराद्यभावात्। वक्ष्यति 'भोगमात्रसाम्यलिङ्गाच्च' इति। अतो ब्रह्मण इव सकलकामावाप्तिरस्य तत्साम्यमुच्यते। तथा श्रूयते—'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता' इति। अतो मुक्तस्य ब्रह्मसादृश्यमुपपद्यते॥

इति अविभागाधिकरणम् ॥ २ ॥

पक्षः। 'एक एव रुद्रः' 'एकमेवाद्वितीयं' 'न तत्समश्चाभ्यधिकश्चे'त्यादिश्रुतिविरोधात्। बद्ध इव मुक्तेऽपि ब्रह्मसादृश्यमङ्गीकर्तुमयुक्तम्। तस्मा'त्परमं साम्यमुपैती'त्यादिश्रुतिरर्थवादरूपैवाङ्गीकरणीया। अवश्यं च 'सोऽश्नुते सर्वान्कामान्' 'मनसैतान्कामान्पश्यन् रमते जक्षन्क्रीडन्नममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वे'त्यादिवाक्यानामर्थवादरूपत्वमङ्गीकरणीयम्। सकलवैषयिकसुखवितृष्णं ब्रह्मानन्दानुभवैकप्रेप्सुं मुमुक्षुं प्रति कामावाप्त्यादीनां पुरुषार्थत्वासंभवात् अपहतपाप्मत्वविजरत्वादीनामपि कामभोगोपयोगिनां तत एव पुरुषार्थत्वासंभवाच्चेति। सिद्धान्तस्तु मुक्तस्य ब्रह्मणा साम्यमस्त्येव। 'साम्यमुपैती'त्यादिश्रुतिस्मृतिभ्यां तस्य तदवैलक्षण्येन दृष्टत्वात्। 'ब्रह्मवेद ब्रह्मैव भवती'ति श्रुतिरपि मुक्तस्य ब्रह्मसादृश्यमुपनयति। तत्र ह्येवकार इवार्थे। यथा'विनाशमेवापीतो भवती'त्यत्र, नत्वभेदार्थे। 'सुषुप्त्युत्क्रान्त्योर्भेदेने'त्यादि (ब्र० १-३-४३-१२) सूत्रैर्जीवब्रह्मणोर्भेदस्य प्रसाधितत्वात्। सादृश्यनिषेधश्रुतयस्तु जगद्व्यापारांशे द्रष्टव्याः। अत एव सूत्रकारस्तस्य भोगमात्रे साम्यं वक्ष्यति। नचैकेनाप्यंशेन सादृश्याभावे परमसाम्यश्रवणविरोधः। तस्य विवक्षितगुणांशे अत्यन्तसाम्यविषयत्वात्। न हि तुलाधृतयोः स्वर्णशिलाशकलयोः परमसाम्योक्तौ वर्णसाम्यमपि सिद्ध्यति। यद्यपि तस्य भोगः स्वतः पुरुषार्थो न भवति। अथापि सविभूतिकब्रह्मानन्दानुभवस्य पुरुषार्थत्वादितरप्रपञ्चवत्स्वात्मानन्दस्वभोग्यजातादिकं सर्वं ब्रह्मविभूतितयानुभूयमानं भवत्येव तं प्रति पुरुषार्थः। 'सोऽश्नुते सर्वान्कामा'नित्यादिश्रुतयोऽपि तदभिप्राया इति॥

इति अविभागाधिकरणम् ॥ २ ॥

नयमणिमालायाम्

अथ अविभागाधिकरणम् ॥ २ ॥

सू० ॥ अविभागेन दृष्टत्वात् ॥ ४ ॥

मुक्तस्यापि कथं स्यात् जीवस्य ब्रह्मणा साम्यम्। विश्वाधिकं हि विश्वप्रपञ्चरचनाधुरीणं तत् ॥ ३८५ ॥

एवमपि सोऽश्नुत इति श्रवणादस्त्येव भोगतस्साम्यम्। तेन ब्रह्मस्वात्मा विभक्तमनुभवति मुक्तिमितः ॥ ३८६ ॥

इति अविभागाधिकरणम् ॥ २ ॥

अथ ब्राह्माधिकरणम् ॥ ३ ॥

सू ॥ ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ॥ ५ ॥

पूर्वत्र स्वयंप्रकाशमपहतपाप्मत्वादिगुणविशिष्टं ब्रह्मसदृशं मुक्तस्य स्वरूपमाविर्भवतीत्युक्तम् । तदुभयरूपत्वं संभवति न वेति संशयः ॥ एवं सति मतान्तरेण पूर्वपक्षः प्रवर्तते । 'स्वेन रूपेण' इति स्वरूपाविर्भावो ब्राह्मेणापहतपाप्मत्वादिकेन । ते हि ब्रह्मगुणाः प्रत्यगात्मनोऽपि स्वाभाविकाः 'य आत्माऽपहतपाप्मा' इत्याद्युपन्यासात् 'जक्षन् क्रीडन् रममाण' इत्यादिश्रवणाच्चावगम्यते । अतो गुणसाम्यमिति जैमिनिः ॥

सू ॥ चितिमात्रेण तदात्मकत्वादित्यौडुलोमिः ॥ ६ ॥

'स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवं वा अरेऽयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव' 'विज्ञानघन एव' इत्यवधारणात् विज्ञानस्वरूपमात्रेण साम्यमित्यौडुलोमिः । एवमुभयदर्शनात् सविशेषनिर्विशेषत्वे सिद्धे युगपदुभयासंभवात् कालभेदादिना व्यवस्थेति ॥ अथ सिद्धान्त उच्यते—

सू ॥ एवमप्युपन्यासात् पूर्वभावादविरोधं बादरायणः ॥ ७ ॥

बादरायणस्तु परस्परविरोधाभावादुभयश्रुत्यवगतोभयस्वरूपमस्य प्रतिपादयति । तथा हि 'विज्ञानघन एव' इत्यादिना स्वप्रकाश इत्यवगतेऽपि 'य आत्माऽपहतपाप्मा' इत्युपन्यासात् पूर्वेषामपहतपाप्मत्वादीनामपि सद्भावोऽवगम्यते । अत उभयप्रमाणसिद्धं रूपद्वयं परस्पराविरोधीत्युभयरूपसमुच्चयः समुचितः ।

अथ ब्राह्माधिकरणम् ॥ ३ ॥

सू० ॥ ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ॥ ५ ॥ चितिमात्रेण तदात्मकत्वादित्यौडुलोमिः ॥ ६ ॥ यदिदं स्वप्रकाशानन्दस्वरूपं गुणबृन्दं चाविर्भवतीत्युक्तम् । तस्योभयस्य युगपदाविर्भावो न संभवति संभवति वेति विरोधाविरोधाभ्यां संशये पूर्वः पक्षः । अपहतपाप्मत्वादिगुणबृन्देनाविर्भावः स्वप्रकाशचिन्मात्ररूपेणाविर्भावश्चेति जीवस्य द्विविधमपि रूपं द्विविधश्रुतिप्रतिपन्नं प्रत्याख्यातुं न शक्यम् । नचोभयं यौगपद्येन संभवति । अतः कंचित्कालं सगुणविद्याफलेनापहतपाप्मत्वादिगुणबृन्देनावस्थानं ततश्चिन्मात्रतयेत्येवं कालभेदेन वा सगुणनिर्गुणविद्याधिकारिभेदेन वा तदुभयं व्यवस्थापनीयमिति एकस्मिन्नेव पूर्वपक्षे ऋषिद्वयसंकीर्तनपूर्वकं सूत्रद्वयप्रणयनं परस्परविरुद्धमपि श्रुतिषु श्रूयमाणत्वादृषिसंप्रतिपन्नत्वाच्चावश्यमङ्गीकरणीयम् । न च तदुभयं युगपदेकस्मिन्नङ्गीकर्तुं युक्तम् । अतः कालभेदादिना व्यवस्थापनीयमिति पूर्वपक्षदृढीकरणार्थम् ॥ सू० ॥ एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायणः ॥ ७ ॥ प्रज्ञानघनत्वं हि कार्त्स्न्येन स्वप्रकाशत्वं यथा सैन्धवखिल्यस्य रसघनत्वं कार्त्स्न्येन लवणरसत्वं तत्र गुणान्तरव्यव-

विरोधे हि कालभेदाद्यपेक्षा । अतो ज्ञानरूपत्वेन स्वयंप्रकाशमपहतपाप्मत्वादि-योगात् कल्याणगुणविशिष्टं च ब्रह्मसदृशं मुक्तस्वरूपमिति युक्तम् ॥

इति ब्राह्माधिकरणम् ॥ ३ ॥

अथ सङ्कल्पाधिकरणम् ॥ ४ ॥

सू ॥ सङ्कल्पादेव तु तच्छ्रुतेः ॥ ८ ॥

पूर्वत्र मुक्तस्य स्वयंप्रकाशस्य सत्यसङ्कल्पत्वाद्युक्तम् । तदुपपन्नं न वेति विचिकित्सा ॥ किं प्राप्तम्? मुक्तस्य भोग्यवस्तुविषये न सङ्कल्पमात्रं हेतुः बाह्यहेतुनैरपेक्ष्येण तावता तदसंभवादिति ॥ एवं प्राप्ते ब्रूमः । सङ्कल्पमात्रेण सकलभो-

---

च्छेदकम् । अतो विरोधाभावाद्युगपदुभयं संभवतीति न व्यवस्थापेक्षेति सिद्धान्तः । 'आह च तन्मात्र'मिति (ब्र० ३-४-१६) सूत्रसिद्धस्यैवार्थस्यायं प्रपञ्चस्तद्दृढीकरणार्थः॥

इति ब्राह्माधिकरणम् ॥ ३ ॥

अथ सङ्कल्पाधिकरणम् ॥ ४ ॥

सू० ॥ सङ्कल्पादेव तु तच्छ्रुतेः ॥ ८ ॥ एवं त्रिभिरधिकरणैर्मुक्तानां स्वरूपानन्दस्य गुणबृन्दस्य चाविर्भाव उक्तः । तत्र गुणबृन्दे सत्यसङ्कल्पत्वं न संभवति । तद्धि 'सङ्कल्पादेवास्य पितरस्समुत्तिष्ठन्ती'त्यादिश्रुत्युक्तसङ्कल्पमात्रेण पित्रादिस्वभोगोपकरणस्रष्टृत्वं । तन्न सङ्गच्छते । विमतं भोगोपकरणं सङ्कल्पाधीनसङ्कल्पयितृव्यापारान्तरापेक्षसंपादनं सङ्कल्पसाध्यत्वादिति प्रमाणविरोधात् । ततश्च यथा विज्ञानघन एवेत्यवधारणं श्रुत्यन्तरसिद्धस्य गुणान्तरस्य न व्यवच्छेदकमेवं 'सङ्कल्पादेवे'त्यवधारणमप्यनुमानसिद्धस्य व्यापारान्तरस्य न व्यवच्छेदकम् । नचेश्वरसङ्कल्पसाध्ये व्यभिचारः । पक्षसमत्वात् । 'उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि' (ब्र० अ २ पा १ सू १४) इत्यधिकरणे परमेश्वरस्य सङ्कल्पमात्रेण कारणान्तरोपसंहारनिरपेक्षेण स्रष्टृत्वं देवादिदृष्टान्तेनोपपादितं 'देवादिवदपि लोके' इति । यदा मुक्तानामपि सत्यसङ्कल्पत्वं न संभवतीत्याक्षिप्यते तदा कुतो देवानां तत्सिद्ध्येत् कुतस्तरां च तद्दृष्टान्तेन परमेश्वरस्येति पूर्वः पक्षः । सिद्धान्तस्तु युक्तं 'विज्ञानघन एवे'त्येवकारस्य गुणान्तराव्यवच्छेदकत्वं 'पटोऽयं शुक्ल एवे'तिवद्विशेषणसङ्गतत्वेनायोगव्यवच्छेदपरत्वात् । इह तु 'सङ्कल्पादेवे'त्येवकारस्सङ्कल्पयितृव्यापारान्तरव्यवच्छेदक एव 'पार्थ एव धनुर्धर' इतिवद्विशेष्यसङ्गतत्वेनान्ययोगव्यवच्छेदकत्वात् श्रुति-

---

नयमणिमालायाम्

अथ ब्राह्माधिकरणम् ॥ ३ ॥

सू० ॥ ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ॥ ५ ॥ चितिमात्रेण तदात्मकत्वादित्यौडुलोमिः ॥ ६ ॥ एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायणः ॥ ७ ॥

ब्राह्मेणाविर्भावं गुणबृन्देन ब्रवीत्येका । चिन्मात्रेणान्या श्रुतिरुभयमिदं कालभेदतो योग्यम् ॥ ३८७ ॥
नैवं विरोधहानेर्न कालभेदव्यवस्थितिः कामी । विज्ञानमात्रतास्य हि कात्स्न्र्येन स्वप्रकाशत्वम् ॥ ३८८ ॥
सा मुक्तस्याम्नाता निवर्तिका नेतरगुणानाम् । सैन्धवखिल्यस्य यथा रसघनता धवलादीनाम् ॥ ३८९ ॥

इति ब्राह्माधिकरणम् ॥ ३ ॥

ग्यवस्तुसिद्धिरस्ति । तथाहि श्रूयते । 'स यदि पितृलोककामो भवति सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्ति' इत्यादि । अतोऽस्य सङ्कल्पमात्रमेव सकलभोग्यवस्तुसंपादने हेतुः । न बाह्यहेत्वपेक्षा ॥

सू ॥ अत एव चानन्याधिपतिः ॥ ९ ॥

यत एव ब्रह्मस्वरूपापन्नोऽयं अपहतपाप्मत्वादिगुणकः अत एवानन्याधिपतिः स्वतन्त्रः। कदाचिदपि न कर्माधीनः। कर्मणो विनष्टत्वात् । नास्य परमेश्वरो नियामकः । प्रवाहसिद्धतदाज्ञारूपविधिनिषेधशास्त्रपथातीतत्वात् । कुतः? पशुत्वव्यावृत्तेः । मलापगमेन हि शिवत्वमेवास्य सिद्धम् । शिवत्वं नाम निखिलमलसंपर्करहितनिरतिशयमङ्गलास्पदत्वरूपं शिवसदृशस्वभावत्वम् । सर्वज्ञत्वादिरिह शिवस्य स्वभावः । अतोऽस्य मुक्तस्य शिवसदृशस्य सर्वज्ञत्वमनादिबोधत्वं नित्यतृप्तत्वं स्वतन्त्रत्वं सर्वशक्तिमत्त्वमलुप्तशक्तिकत्वमनन्तशक्तित्वं चेति । आत्मज्ञानसङ्कोचरूपो हि संसारः । सङ्कोचकारणमलापगमेऽस्य सर्वज्ञत्वम् । अत ए-

विरोधे च सामान्यतो दृष्टानुमानस्याप्रमाणत्वात् । अतो युक्तं मुक्तानां सत्यसङ्कल्पत्वमिति । 'संपद्याविर्भाव' इति (ब्र० अ ४ पा ४ सू १) सूत्रे स्वरूपानन्दस्य सर्वज्ञत्वादिषट्कस्यापहतपाप्मत्वाद्यष्टकस्य चाविर्भावो विवक्षितः । अत एव तत्सूत्रभाष्ये चिदानन्दघनं सर्वज्ञत्वादिविशिष्टमाविर्भवतीत्युक्तम् । तत्रापहतपाप्मत्वाद्याविर्भावः प्रागुदाहृतेन प्रजापतिविद्यावाक्येनावगम्यते । सर्वज्ञत्वाद्याविर्भावः कुतोऽवगम्यत इत्याकाङ्क्षायामपहतपाप्मत्वादित एवेति प्रतिपादयितुं सूत्रम् । सू० ॥ अत एव चानन्याधिपतिः ॥ ९ ॥ अनन्याधिपतिशब्दोक्तं स्वातन्त्र्यमङ्गान्तराणामप्युपलक्षणमित्यभिप्रेत्य मलाद्यावरणनिवृत्तिपूर्वकापहतपाप्मत्वाद्याविर्भावोक्त्यैव सार्वज्ञ्यादिषडङ्गान्तराणामप्युपलक्षणमित्यभिप्रेत्य मलाद्यावरणनिवृत्तिपूर्वकापहतपाप्मत्वाद्याविर्भावोक्त्यैव सार्वज्ञ्यादिषडङ्गाविर्भावसिद्धिमुपपादयन्प्रथममपहतपाप्मत्वोक्त्या स्वातन्त्र्यसिद्धिमुपपादयति—अत एवेति । नन्वन्तर्यामिपारतन्त्र्यं मुक्तिदशायामप्यस्तीति 'तस्य च नित्यत्वा'दिति द्वितीयाध्यायसूत्रेणाविष्कृतं कथं स्वातन्त्र्यमित्याशङ्क्याह—कदाचिदपीति । कर्माधीनत्वरूपं पारतन्त्र्यमत्र व्यावर्त्यते न त्वन्तर्यामिप्रेरणाधीनव्यापारत्वरूपमिति भावः । ननु प्राचीनकर्मणां विनष्टत्वेऽपि परमेश्वराज्ञारूपविधिनिषेधोल्लङ्घनात्पुण्यपापे . स्यातामित्याशङ्क्याह—नास्य परमेश्वर इति ॥ श्रुतिस्मृतिरूपस्वाज्ञाविषयत्वापादनेन नियामको भवतीत्यर्थः । अत एवाह—प्रवाहसिद्धेति । हेत्वसिद्धिमाशङ्क्याह—पशुत्वव्यावृत्तेरिति । मलमायादिपाशबन्धविषयत्वं पशुत्वं । पशुत्वव्यावृत्तौ सत्यां शिवभावाविर्भावे तदन्तर्गततया सार्वज्ञ्यादिसिद्धिमाह—मलापगमेन हीति । मुक्तिरिशवत्वरूपेति भारतेप्याविष्कृतम्—'धर्मान्वेषी तपः कर्तुं यतेत सततं प्रिये । अमरत्वं शिवत्वं च तपसैवाप्नुयान्नर' इति। संप्रतिपन्नमुक्तधर्मान्तरसिद्धिहेतुनैव तदीयसर्वज्ञत्वादिसिद्धिमुपपादयति—आत्मज्ञानेत्यादिना । अस्य सर्वज्ञत्वमिति । अनादिबोधत्वस्यापि तदुपलक्षणम् । अत एव ज्ञानस्येति । तत्त-

वाज्ञानस्य संसारनिदानस्य समूलनिवृत्तेः परिच्छिन्नापरिच्छिन्नदेहाद्यभिमानरूपभ्रमनिवृत्तिः। यतो ह्यस्य जरामरणशोकराहित्यं। अत एव कर्मवश्यत्वाभावात् स्वतन्त्रत्वं। निरतिशयस्वरूपानन्दानुभवैकरसिकतया स्वात्मारामत्वेन नित्यतृप्तत्वं। अत एवास्य जिघत्सापिपासादिराहित्यम्। अलुप्तसर्वशक्तिकत्वादस्य सत्यकामसत्यसङ्कल्पत्वम्। तस्मादसौ परमेश्वरश्च अपहतपाप्मत्वादिगुणाष्टकयुक्तः श्रूयते। अतो मुक्तस्य शिवसदृशस्य स्वातन्त्र्यं युक्तमेव॥

इति सङ्कल्पाधिकरणम् ॥ ४ ॥

द्विषयावरणभूतानामाणवमलस्य शक्तिविशेषाणां समुदायस्संसारकारणमज्ञानं तस्य सर्वस्यापि मूलम्। सार्वज्ञ्यत्वादिकपरमेश्वरशेषत्वादियुक्तनिजस्वरूपावरणभूता तच्छक्तिः तस्य सर्वस्याप्यावरणशक्तिसमुदायस्य निवृत्त्यैव हि 'शोकं मोहं जरां मृत्युमत्येती'त्यस्य मोहशब्दोक्तस्य परिच्छिन्नदेहाद्यभिमानरूपस्य भ्रमस्य निवृत्तिरभ्युपेयते। तत एवास्य सर्वज्ञत्वं सङ्कुचितस्यावृतस्य ज्ञानस्य प्रागपि सत्त्वाङ्गीकारादनादिबोधत्वं च सिद्ध्यतीति भावः। **यतो ह्यस्य जरामरणेति**। यतः कर्मवश्यत्वाभावादस्य जरामरणशोकराहित्यम्। अत एव स्वतन्त्रत्वं सिद्ध्यतीत्यर्थः। **अत एवास्य जिघत्सेति**। स्वरूपानन्दानुभवादेव ह्यस्य जिघत्सापिपासाराहित्यमुपपादनीयम्। तत एव नित्यतृप्तत्वं सिद्ध्यतीति भावः। **अलुप्तेति**। अलुप्तशक्तिकत्वमनन्तशक्तिकत्वं च विना सत्यकामत्वं सत्यसङ्कल्पत्वं च न सिद्ध्यतीति तत एव तदुभयं सिद्ध्यतीत्यर्थः। **परमेश्वरश्चेति** दृष्टान्तार्थम्। **स्वातन्त्र्यमिति**। स्वातन्त्र्योपलक्षितं सर्वज्ञत्वादिषट्कं युक्तमेवेत्यर्थः। केषुचिन्मूलकोशे'ष्वत एव चात्मन्यधिपति'रिति सूत्रपाठो दृष्टः। तत्राप्यात्मन्यधिपतिरात्मेश्वर इत्यनन्याधिपतिरित्यनेन समानार्थः॥

इति सङ्कल्पाधिकरणम् ॥ ४ ॥

नयमणिमालायाम्

अथ सङ्कल्पाधिकरणम् ॥ ४ ॥

सू० ॥ सङ्कल्पादेव तु तच्छ्रुतेः ॥ ८ ॥ अत एव चानन्याधिपतिः ॥ ९ ॥

मुक्तः पित्रादीनां स्रष्टा सङ्कल्पमात्रेण। इत्येतदनुपपन्नं लोके सङ्कल्पमोघतादृष्टेः ॥ ३९० ॥

अस्य हि याथाकाम्यं शास्त्रनिषिद्धमपि संभवात्किञ्चित्। सङ्कल्पहर्तिं कुर्यान्माहेश्वराज्ञातिलङ्घनत्वेन ॥ ३९१ ॥

मैवं यन्नापेक्षा तत्सृष्टिर्ब्रह्मसृष्टिरिव। सङ्कल्पादेवेति श्रुतिफणितेरनतिशङ्क्यत्वात् ॥ ३९२ ॥

अत एवात्मन्यधिपतिरसौ स्वतन्त्रो विमुक्तपशुभावः। नैतस्य बन्धकृदयं न नियन्ता तन्महेश्वरस्सोऽपि ॥ ३९३ ॥

इति सङ्कल्पाधिकरणम् ॥ ४ ॥

अथ अभावाधिकरणम् ॥ ५ ॥

सू ॥ अभावं बादरिराह ह्येवम् ॥ १० ॥

पूर्वं मुक्तस्य स्वयंप्रकाशत्वं सत्यसङ्कल्पत्वादिवैशिष्ट्यं चोपपादितम् । इह तस्य सशरीरत्वमशरीरत्वमुभयं वेति विचारः प्रवर्तते । बादरिस्तावत् मुक्तस्य देहेन्द्रियाद्युपकरणाभावं मेने । 'निष्कलं निष्क्रियम्' इत्यादिकं ब्रह्मणस्तदभावमाह हि तत्स्वरूपस्य मुक्तस्यापि तथात्वमिति ।

सू ॥ भावं जैमिनिर्विकल्पाम्नानात् ॥ ११ ॥

जैमिनिस्तु 'स एकधा भवति त्रिधा भवति' इत्यादौ देहेन्द्रियादिभिः विविधत्वश्रुतेस्तद्भावमेव मेने । तदेवं सदेहत्वश्रुतेर्विदेहत्वश्रुतेश्च किमस्य तात्त्विकमिति संशये विदेहत्वमेव तात्त्विकम् । 'मनसैतान् पश्यन् रमते य एते ब्रह्मलोके' इति बाह्येन्द्रियाद्यभावो हि मुक्तस्य श्रूयते । ब्रह्म च बाह्येन्द्रियादिरहितं श्रूयते 'सत्यात्म प्राणारामं मनआनन्दम्' इति । आत्मन्येवारामो न बाह्ये, मनस्येवानन्दो न बाह्ये करण इति हि तत्र निरुक्तिः । अतो मुक्तस्य विदेहत्वमेव । सदेहत्वस्य तु पुरुषभेदाद्व्यवस्थेति । एवं प्राप्ते सिद्धान्त उच्यते—

सू ॥ द्वादशाहवदुभयविधं बादरायणोऽतः ॥ १२ ॥

उभयश्रुतेः सशरीरत्वमशरीरत्वं च स्वेच्छया मुक्तस्येति भगवान् बादरायणो

अथ अभावाधिकरणम् ॥ ५ ॥

सू० अभावं बादरिराह ह्येवम् ॥ १० ॥ भावं जैमिनिर्विकल्पाम्नानात् ॥ ११ ॥ मुक्तस्य स्वरूपगुणविचारानन्तरं देहेन्द्रियविचार इति सङ्गतिः । मुक्तस्य सशरीरत्वमशरीरत्वं च श्रूयमाणं विद्याविशेषानुष्ठातृपुरुषभेदेनोपपादनीयमुतैकस्मिन्नेव पुरुषे सङ्कल्पभेदेनेत्युभयथा संभवात्संशयः । तत्र पूर्वः पक्षः । मुक्तस्य शरीरं भोगार्थं नापेक्षितं ब्रह्मसादृश्यं प्राप्तस्य तस्य ब्रह्मण इव भोगस्य मानसत्वौचित्या'न्मन आनन्द'मिति ब्रह्मण इव 'मनसैतान्कामान्पश्यन्रमते' इति तस्यापि भोगस्य मानसत्वश्रवणाच्च 'निष्कलं निष्क्रिय'मिति मन्त्रे ब्रह्मणो भोगार्थशरीरनिषेधेन तस्यापि तथाभूतशरीराभावस्याङ्गीकर्तव्यत्वाच्च । तत्र हि मन्त्रे शरीरावयवतत्क्रिययोर्निषेधः शरीरनिषेधः पर्यवस्यन्भोगोपकरणशरीरनिषेधो भवेत् । साधकानुग्रहार्थस्योमासहायत्वादिविशिष्टदिव्यविग्रहस्याङ्गीकारात् । न च तद्वन्मुक्तस्य साधकानुग्रहार्थं शरीरमङ्गीकर्तव्यम् । तेन कर्तव्यस्य साधकानुग्रहस्याभावात् । तस्मादशरीर एव परममुक्तः । 'स एकधा भवति त्रिधा भवती'त्यादेरच्छेद्ये जीवे स्वतोऽसंभवतः शरीरभेदोपाधिकत्वं वक्तव्यमिति यत्सशरीरत्वमापतति तद्विद्याविशेषानुष्ठानादवरमुक्तिं प्राप्तस्य कल्पनीयमिति 'ब्राह्मेण जैमिनि'रित्यधिकरण (अ० ४-४-६-३) इव अत्रापि ऋषिद्वयसङ्कीर्तनं युक्तम् । सूत्रद्वयं पूर्वपक्षदृढीकरणार्थम् । द्वितीयसूत्रे विकल्पो विविधप्रकारः बहुदेहत्वमित्यर्थः । एवं प्राप्ते सिद्धान्तः—सू० ॥ द्वादशाहवदुभयविधं बादरायणोऽतः ॥ १२ ॥ 'यत्र नान्यत्पश्यती'त्यादिवाक्यप्रति-

मन्यते। यथा द्वादशाहः उभयश्रुतेः सत्रमहीनं च तद्वदिति। अत्र पौराणिकी फणितिः "सर्वज्ञाः सर्वगाः शुद्धाः परिपूर्णाः स्वभावतः। शिवतुल्यबलोपेताः परमैश्वर्यसंयुताः॥ सदेहाश्च विदेहाश्च भवन्त्यात्मेच्छया पुनः॥" इत्यादिका शिवपदारूढविषया। अत उभयविधत्वं युज्यते। एकस्यैव कालभेदादुभयव्यवस्थामाह—

सू॥ तन्वभावे सन्ध्यवदुपपत्तेः॥ १३॥

मुक्तः स्वेच्छया कदाचित् बहूनि शरीराणि सृष्ट्वा तदनुप्रवेशेन विहरति। कदाचिदुपसंहृतशरीरश्च वर्तते। शरीराद्यभावावस्थायां मुक्तः स्वप्ने परमेश्वरसृष्टं रसादिकं मनसा बद्धपुरुष इव परमेश्वरसृष्टमेव रसं भुङ्क्ते। किमुक्तं भवति स्वप्ने पुरुषो यथा शरीरेन्द्रियादिनैरपेक्ष्येण केवलेन मनसैवेश्वरसंपादितान् विषयान् भुङ्क्ते, तथा मुक्तोऽपि स्वभूतेन मनसैव ब्रह्मस्वरूपरसमनुभुङ्क्त इति॥

सू॥ भावे जाग्रद्वत्॥ १४॥

स्वेच्छासृष्टशरीराद्युपकरणभावे जाग्रत्पुरुष इव सर्वकामं भुङ्क्ते। ननु यदि मुक्तस्य प्राकृतवस्तुदर्शित्वरूपं भोक्तृत्वं, तर्हि अपुरुषार्थप्रपञ्चदर्शिनो मुक्तस्य न

पन्नानिरतिशयात्मकपरब्रह्मविषयायां भूमविद्यायां श्रुतस्य 'स एकधा भवती'त्यादेरवरमुक्तिविषयत्वं न युक्तम्। अतो यथा 'द्वादशाहमृद्धिकामाः अपि यद्द्वादशाहेन प्रजाकामं याजये'दिति श्रुतिद्वयानुसारेण द्वादशाहस्य सत्राहीनोभयरूपत्वम्। एवं मुक्तस्य सदेहविदेहश्रुत्यनुसारेण तदुभयरूपत्वमङ्गीकरणीयम्। तच्च स्वसङ्कल्पात् 'सदेहाश्च विदेहाश्च भवन्त्यात्मेच्छया पुनः' इत्युपबृंहणादिति। ननु विदेहावस्थायां मनोमात्रेण कथं कामभोगः। यदि स तन्मात्रेणापि मुक्तस्य संभवति तर्हि कदाचिद्देहापेक्षा किमर्थेत्याशङ्कां निराकर्तुं विदेहसदेहावस्थयोर्भोगविशेषप्रतिपादनार्थमुपरितनसूत्रद्वयम्। सू०॥ तन्वभावे सन्ध्यवदुपपत्तेः॥ १३॥ सन्ध्यवत्सूक्ष्मविषयोपभोग इति विशेषोपपत्तेरित्यर्थः। शरीरस्यान्तः परमेश्वरसृष्टेषु वासनामयेषु सूक्ष्मेष्वर्थेषु मानसप्रत्यय एव चाक्षुषत्वाद्यभिमानरूपः स्वप्न इत्यङ्गीकृत्य सन्ध्यवदिति दृष्टान्तः कृतः। तत्र सूक्ष्मत्वांश इव परमेश्वरसृष्टत्वांशेऽपि सन्ध्यदृष्टान्त इति तत्स्वारस्यमनुसरन्नाह—परमेश्वरसृष्टमिति। ब्रह्मस्वरूपरसमिति। सविभूतिकब्रह्मानन्दमित्यर्थः। 'मनसैतान्कामान्पश्यन्रमत' इति श्रुतौ परमेश्वरसृष्टमिति प्राचीनभाष्यवाक्ये च केवलमानसानुभवेऽपि विभूत्यनुप्रवेशवर्णनात्। सू०॥ भावे जाग्रद्वत्॥ १४॥ उपपत्तेरित्यनुवर्तते। तथा च मुक्तस्य शरीरादिसद्भावे जाग्रत इव स्थूलविषयभोगोपपत्तेरित्यर्थः। ननु यदा कश्चिन्मुक्तः सदेहः अन्यश्च विदेहः तदा तया स्पष्टास्पष्टविषयौ भोगाविति मुक्तिफलेऽप्युत्कर्षापकर्षौ प्रसज्येयाताम्। नैव दोषः। सविभूतिकब्रह्मानुभवस्य सर्वान्प्रत्येकरूपत्वात्। तथाहि यदा कश्चिद्विदेहः तदा तस्य स्वप्नदृश इव वासनाभिः सूक्ष्मान्कांश्चन विषयानीश्वरः सृजति। ते च स्थूलप्रपञ्चान्तर्गतविषयाश्चेति द्विविधैरपि विभूतिभेदैर्विशिष्टं ब्रह्म सदेहानां विदेहानां च सर्वेषामपि मुक्तानामास्वाद्यम्। अतो न तस्यापि सविभूतिकब्रह्मानुभवे विशेषः। कथं तर्हि 'तन्वभाव

संसारदुःखानुषङ्गाभावसिद्धिरिति चेन्न । मुक्तस्यापुरुषार्थरूपेण प्रपञ्चदर्शनाभावात् । मुक्तेन ब्रह्माकारं हि दृश्यते विश्वमेतत् । तथा हि श्रूयते । 'एतत्ततो भवति । आकाशशरीरं ब्रह्म । सत्यात्म प्राणारामं मन आनन्दम् । शान्तिसमृद्धममृतम्' इति । पूर्वत्र 'आप्नोति स्वाराज्यम् । आप्नोति मनसस्पतिम्' इति स्वाराज्यसुखैकरसं शिवस्य परब्रह्मणः पदं मनसस्पतिं ज्ञानशक्त्यधिष्ठातृभूतमाप्नोति योगीत्युक्तम् । तदा स किंविशिष्ट इत्याकाङ्क्षायां 'वाक्पतिश्चक्षुष्पतिः । श्रोत्रपतिर्विज्ञानपतिरि'ति वागादीनां स्वेच्छाधीनत्वेन तदाधिपत्यमुक्तम् । तदेवंविधस्य मुक्तस्य परमाकाशरूपशिवपदाधिरूढस्य स्वेच्छाधीनविशुद्धवागादिकरणस्य ततः तत्पदप्राप्त्यनन्तरं एतत् विश्वजालं भवति । किं भवति? आकाश-

---

इत्यादिसूत्राभ्यां विदेहत्वावस्थायां सूक्ष्मभोगः सदेहत्वावस्थायां स्थूलभोग इति विशेष उक्तः । कथंचिद्विदेहत्वावस्थायां तदीयवासनामयसूक्ष्मविषयसृष्टिरप्यस्ति न तु सदेहत्वावस्थायामित्येव विशेषस्सूत्राभ्यामुक्त इति गृहाण । एतेन कश्चिन्मुक्तः सङ्कल्पेन बहूनि भोगोपकरणानि सृजेत्कश्चिदल्पानीति तयोर्भोगतारतम्यं स्यादित्यपि शङ्का निरस्ता । सर्वान्मुक्तान्प्रति स्वसृष्टपरसृष्टसर्वविधविभूतिविशिष्टब्रह्मानन्दानुभवस्यैकरूपत्वात् । नन्विति । यदि मुक्तस्य सविभूतिकब्रह्मानुभवः तदा मुक्तानुभववासनासृष्टभोगोपकरणानां मुक्तमात्रभोग्यानां सुखैकरूपत्वेऽप्यमुक्तसाधारणस्य स्थूलप्रपञ्चस्य सुखदुःखकरंबितत्वात्तदनुभवितुर्मुक्तस्यामुक्तवद्दुःखानुभवोऽपि स्यात् । इयांस्तु विशेषो भवेत् । अमुक्तस्य दुःखहेतुकतिपयविषयानुभव इत्यल्पं दुःखं । मुक्तस्य तु यद्यावद्दुःखानुभवहेतुभूतं दुर्गन्धादिविषयजातं तस्य सर्वस्याप्यनुभवोऽस्तीत्यधिकं दुःखमिति । तस्मादयुक्तस्सविभूतिकब्रह्मानुभव इति शङ्कार्थः । **संसारनिदानपुण्यपापरूपदोषाक्रान्तेनामुक्तेन स्वतन्त्रतयानुभूयमाने प्रपञ्चे कतिपयस्य यथाकर्म दुःखरूपत्वेऽपि तद्दोषरहितेन ब्रह्मविभूतितयानुभूयमानस्य तस्य सुखरूपत्वमेव भवति । यथा पित्तोपहतरसनेनास्वाद्यमानस्य शर्करादेर्दुःखरूपत्वेऽपि तद्रहितेनास्वाद्यमानस्य सुखरूपत्वं यथा च राजकुमारेण पुरतः स्वतन्त्रतयानुभूयमानस्य महासैन्यस्य दुःखरूपत्वेऽपि ततस्तस्यैव स्वपितृविभूतितयावगम्यमानस्य सुखरूपत्वमिति परिहारार्थः ।** मुक्तस्य ब्रह्मविभूतितया प्रपञ्चदर्शने श्रुतिमुदाहरति—**तथाहि श्रूयत इति** । एतद्विश्वजालमाकाशशरीरं 'ब्रह्मैव भवतीत्येतन्मुक्तं प्रत्युच्यत इति दर्शयितुं मुक्तस्य प्रकृतत्वमाह—**पूर्वत्रेति** । स्वः स्वर्गः 'देवा ह वै स्वर्गं लोकमगमन्नि'ति श्रुतिप्रसिद्धनिरतिशयसुखात्मकं परब्रह्मणः पदं तत्र राजतीति स्वराट् तस्य भावः स्वाराज्यं तत्प्राप्नोतीत्यस्य ब्रह्मणः पदं प्राप्नोतीत्यर्थे पर्यवसानमभिप्रेत्य व्याचष्टे—**स्वाराज्यमिति** । मनः ज्ञानशक्तिरूपा पारमेश्वरी तदधिष्ठाता शिवो मनसः पतिरित्यभिप्रेत्य व्याचष्टे—**मनसस्पतिमिति** । ब्रह्मभिन्नं विश्वजालं कथं मुक्तस्य ब्रह्म भवेदित्याकाङ्क्षायां चिच्छक्त्युपादानकस्य विश्वजालस्य चिच्छक्तिद्वारा ब्रह्मापृथग्भावात्तस्य च मुक्तेन साक्षात्कृतत्वादिति दर्शयितुं 'आकाशशरीर'मिति श्रुतौ विशेषणं कृतम् । तत्राकाशशब्दस्य

शरीरं ब्रह्मैव परमानन्दलक्षणपरमाकाशशरीरं ब्रह्मैव भवति । परप्रकृतिरूपा परमसत्ता प्रकाशानन्दसमरसा । परशक्तिर्हि ब्रह्मणः स्वरूपतया परमाकाश उच्यते या मुक्तानां परमेश्वरस्य च साक्षादर्थक्रियाहेतुः, परम्परयाऽन्येषाम् । तथा हि 'को ह्येवान्यात् कः प्राण्यात् । यदेष आकाश आनन्दो न स्यात् । एष ह्येवानन्दयाति' 'रसो वै सः । रसꣳह्येवायं लब्ध्वाऽऽनन्दी भवति' इति सर्वानुभवविषयत्वमस्याः श्रूयते । तथा च 'स एको मानुष आनन्द' इत्यारभ्य 'स एको ब्रह्मण आनन्द' इति ब्रह्मपर्यन्तमुपाधितिरोधानादानन्दाविर्भावस्तारतम्येन श्रूयते । निरुपाधिकतया ब्रह्मणि मुक्ते च परिपूर्णो वर्तते स आनन्दः 'स एको ब्रह्मण आनन्दः । श्रोत्रियस्य चाकामहतस्ये'ति श्रवणात् । ब्रह्मार्पणबुद्ध्या निष्कामानुष्ठिताग्निहोत्रादिकर्मा परविद्वानकामहतः श्रोत्रियः । तस्य जीवत एव मुक्तस्य ब्रह्मणश्च तुल्य एवानन्दः । तस्य योगातिशयेन तत्तद्भूमिमधिरूढस्य पूर्वत्र पूर्वत्र भूमावभ्यासः स्वल्प इति तदनुसारेण तत्तद्भूमौ तदीयानन्दाविर्भावस्य मानुषाद्यानन्दसाम्यकृतिरिति न विरोधः । अतोऽयमेव परमानन्दः परप्रकृतिः परमाकाशः पराभेदात् 'आनन्दो ब्रह्मेति व्यजानादि'ति

चिच्छक्तिरर्थ इत्येतद्दर्शयति—परप्रकृतिरूपेति । परमसत्तेति । ब्रह्मवत्प्रपञ्चस्यापि सैव सत्तेति पारम्यम् । प्रकाशानन्दसमरसा चिदानन्दघना परशक्तिर्हि परमाकाशः । सा परब्रह्मणः स्वरूपतयोच्यत इत्यन्वयः । शरीरपदव्याख्यानं स्वरूपतयेति । तस्यास्सर्वदा सर्वोपजीव्यत्वमाह—येति । साक्षाद्वृत्त्युपधानमनपेक्ष्यार्थक्रियाहेतुरखण्डानन्दतयास्वादहेतुः आस्वादनीयेति यावत् । परम्परयेति । पुण्यविशेषानुसार्यभिव्यक्तिविशेषहेतुवृत्त्युपधानद्वारेत्यर्थः । एतदेवोपपादयति—तथाहीत्यादिना । अननं प्राणवायुव्यापारः प्राणनं चक्षुरादिव्यापारः । अनेन लौकिकव्यापारहेतुत्वमप्यस्तीति दर्शितम् । 'एष ह्येवे'ति वाक्याभिप्रायः तद्धेतुव्यपदेशाच्चेत्यानन्दमयाधिकरणे (ब्र० १ पा० १ सू० १) वर्णितः । ब्रह्मपर्यन्तमिति । ब्रह्मणः प्रागित्यर्थः । ब्रह्मणि मुक्ते चेति । अनुभाव्यत्वसंबन्धो विवक्षितः नाधाराधेयभावः । तस्य मुक्तसाधारण्याभावात् 'स एको ब्रह्मण' इति श्रुतावनुभाव्यत्वसंबन्ध एव षष्ठ्यर्थः । तस्य जीवत एव मुक्तस्येति । तथाभूतः श्रोत्रियो यदा चरमदेहावसाने मुक्तो भवति तदा तस्य परब्रह्मणश्च तुल्य एव निरतिशयानन्दः । स यदा जीवद्दशायां योगमभ्यस्यति तदतस्या योगभूतिकाभेदानुसार्यभिव्यञ्जकतारतम्यात्क्रमेण मानुषानन्दादितुल्यानन्दाविर्भावः । एवं सत्यकामहतश्रोत्रियशब्दोक्तानां मुक्तानामेवानन्दतारतम्यमुच्यत इति विरोधो नाशङ्कनीयः । 'स एको ब्रह्मण आनन्द' इति पर्याय एवाकामहतश्रोत्रियशब्दस्य मुक्तिदशाविषयत्वात् प्राचीनपर्यायेषु तस्य तस्य जीवन्मुक्तिदशाविषयत्वादित्यर्थः । अस्त्वेवंभूतमहिमा परमाकाशः । तथापि कथं ब्रह्मणस्तत्स्वरूपत्वं धर्मिधर्मभावेन भेदसत्त्वादित्याशङ्क्य 'अभेदव्यपदेशोऽयमौपचारिकः' 'आनन्दो ब्रह्मे'ति श्रुत्यन्तर इवेत्यभिप्रेत्याह—अतोऽयमेवेति । 'यद्यप्याकाशशरीर'मित्यत्रायुतसिद्धप्रकारपरः शरीरशब्द इति वक्तुं शक्यम् । तथापि तदुपादा-

ब्रह्मत्वेन जगत्कारणत्वेन श्रूयते । तस्याभिव्यक्तिः 'सैषा भार्गवी वारुणी विद्या। परमे व्योमन् प्रतिष्ठिता' इति । अतो मुक्तानां परमानन्दरूपपरमाकाशशरीरकं ब्रह्म जगद्भवतीति परमानन्दानुप्रविष्टानामेषां ब्रह्मण इव दुःखानुषङ्गाभावः ॥

इति अभावाधिकरणम् ॥ ५ ॥

अथ प्रदीपवदावेशाधिकरणम् ॥ ६ ॥

सू ॥ प्रदीपवदावेशस्तथा हि दर्शयति ॥ १५ ॥

सूचितं हि पूर्वत्र मुक्तात्मनोऽपि स्वेच्छयाऽनन्तशरीरपरिग्रहणसामर्थ्येन विभुत्वम् । तदिह युज्यते न वेति विचार्यते । 'सर्वेषु लोकेषु कामचारो भवति' 'इमांल्लोकान् कामान्नीकामरूप्यनुसञ्चरन्' इत्यादिषु मुक्तस्य 'परिच्छिन्नतया सञ्चारावगमान्न व्यापकत्वमुचितम् । अतो बहुशरीरपरिग्रहणं क्रमेणैव, न युगपदिति पूर्वः पक्षः ॥ सिद्धान्तस्तु । घटादिपरिच्छिन्नस्य प्रदीपस्य परिच्छेदापाये स्वप्रभया यथा गृहादिव्याप्तिः, तथा मुक्तस्य स्वशक्तितिरोधायकमलापाये स्वश-

---

नकत्वेन तदभिन्नस्य विश्वजालस्य ब्रह्मसामानाधिकरण्यमभेदेनोपपादयितुं तस्य स्वरूपपरतया व्याख्यानं कृत्वा तदौपचारिकत्वेनोपपादितम् । वस्तुतस्तस्यायुतसिद्धप्रकारपरत्वेऽपि न दोषः। विश्वजालस्याप्ययुतसिद्धप्रकारत्वादेव सामानाधिकरण्योपपत्तेः। **तस्येति**। तस्य परमाकाशस्य । अभिव्यक्तिः महिमप्रकाशनम् । भृगुवल्ल्यामत एव 'सैषा भार्गवी'-त्यादिना तस्यास्तत्परत्वमुक्तमित्यर्थः । अवान्तरप्रमेयोपसंहारेणाधिकरणार्थं निगमयति— **अतो मुक्तानामिति** ।

इति अभावाधिकरणम् ॥ ५ ॥

अथ प्रदीपवदावेशाधिकरणम् ॥ ६ ॥

सू० ॥ प्रदीपवदावेशस्तथा हि दर्शयति ॥ १५ ॥ **सूचितं हीति** । पूर्वाधिकरणे 'स एकधा भवती'त्यादि श्रुत्युदाहरणेन मुक्तस्य विभुत्वं सूचितम् । अणुत्वे युगपदनेकशरीरपरिग्रहानुपपत्तिरित्यर्थः । अनेकशरीरपरिग्रहश्रवणादणुत्वश्रवणाच्च संशयः । संचरणादिलिङ्गेनाणुत्वस्य प्रतिष्ठितत्वादनेकशरीरपरिग्रहः क्रमिको व्याख्येय इति पूर्वः पक्षः। क्रमिकतायामेकधा त्रिधा पञ्चधेत्यादिपक्षभेदोपन्यासानुपपत्तेर्युगपदेव कदाचित्कदाचिदनेकशरीरपरिग्रहो वाच्यः । स च धर्मज्ञानविकासेनोपपद्यते । अवश्यं हि संसारदशायामपि हस्तिपुत्तिकादिशरीरेषु परिभ्रमतो जीवस्य तत्तद्देहव्याप्त्यनुगुणसङ्कोचविकासशा-

---

नयमणिमालायाम्

अथ अभावाधिकरणम् ॥ ५ ॥

सू० ॥ अभावं बादरिराह ह्येवम् ॥ १० ॥ भावं जैमिनिर्विकल्पामननात् ॥ ११ ॥ द्वादशाहवदुभयविधं बादरायणोऽतः ॥ १२ ॥ तन्वभावे संध्यवदुपपत्तेः ॥ १३ ॥ भावे जाग्रद्वत् ॥ १४ ॥

क्वचिदस्य देहभावस्तदभावो वाऽवगम्यते क्वचन । अत्र श्रुतिद्वयस्य व्यवस्थितिः पुरुषभेदेन ॥ ३९४ ॥

मैवं श्रुतेरयं स्वाभिजेच्छया सतनुरतनुश्च । तदभावे स्वप्नदृगिव तद्भावे जाग्रदिव भोगी ॥ ३९५ ॥

इत्यभावाधिकरणम् ॥ ५ ॥

क्त्या विश्वव्याप्तिः आवेशः भवति। तथा हि दर्शयति श्रुतिः। "स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा। यत्र देवा अमृतमानशानास्तृतीये धामान्यभ्यैरयन्त ॥" "परि द्यावापृथिवी यन्ति सद्यः परि लोकान् परि दिशः परि सुवः। ऋतस्य तन्तुं विततं विचृत्य तदपश्यत्तदभवत्प्रजासु॥" इति। तत्र हि प्रकरणं 'एष हि देवः' इति जगत्कर्तुः विश्वरूपस्य महादेवस्य। स महादेवो नः अस्माकं बन्धुः, जनिता पिता, स विधाता सकलश्रेयसां कर्ता, धामानि तेजोरूपाण्यप्राकृतानि भुवनानि विश्वान्यपि जानाति। अत्र बन्धुत्वादियोग्यस्य धामवेत्तृत्वस्य च प्रयोजनमुच्यते। यत्र यस्मिन् महादेवे अमृतं कैवल्यलक्ष्मीं आनशानाः प्राप्यानुभवन्तो देवाः तद्भावा देवनशीलाः तृतीये द्युसंज्ञके तत्पदे मायातीते धामानि तेजःप्रधानानि स्वाभिमतानि स्थानानि अभ्यैरयन्त स्वीकृतवन्तः। किमुक्तं भवति। बन्धुवज्जनकवत् सकलहितकारिणा परब्रह्मणा महादेवेन प्रसन्नेन दलितपाशबन्धा अमृतभावं गताः मुक्ताः तृतीये परमव्योमलक्षणे स्वपदे कल्पितानि धामानि प्रकाशमयानि पदानि प्राप्ता वर्तन्त इति॥ अतः परमेषां व्याप्तिरुच्यते। परि द्यावापृथिवी यन्तीति। मुक्तात्मानः स्वशक्तिमरीचिभिः द्यावापृथिवी परियन्ति व्याप्नुवन्ति। परि लोकान् हिरण्यगर्भादिलोकानपि व्याप्नुवन्ति। दिशश्चतस्रश्च परियन्ति व्याप्नुवन्ति। एवं सकलजगद्व्यापिनो वर्तन्ते। तथाहि ते सर्वज्ञा ऋतस्य कर्मणो विस्तीर्णं भोगतन्तुं विचृत्य छित्त्वा पुण्यपापविनिर्मुक्ताः सन्तः सर्वप्राणिषु तदेव महादेवाख्यं वस्तु अपश्यन् सर्वात्मतया तदभवत् तत्स्वभावाश्चाभवन्। यत्रेति संबन्धः। अतो मुक्तानां शिवैकरसानां व्यापकत्वमस्त्येव। एतेन महादेवसधर्माणो मुक्तस्वभावा जीवा देवशब्दवाच्याः। द्युप्रभृतिव्यापिनो देवव्रताख्ये सामनि श्रूयन्ते 'ये देवा दिविषद' इत्यादिना। पुराणे च—"ते हि साक्षाद्दिविषदस्त्वन्तरिक्षसदस्तथा। पृथिवीषद इत्येते देवा देवव्रते स्थिताः॥" इति। इह पृथिवीति ब्रह्माण्डरूपं, अन्तरिक्षमिति द्वितीयं मायापदं, द्यौरिति तृतीयं परमाकाशपर्यायं शुद्धशक्तिरूपं शिवपदमुच्यते। अतो मुक्तानां विभुत्वमिति॥

लित्वं धर्मज्ञानस्य वाच्यम्। तथा च मुक्तिदशायामनेकशरीरव्याप्त्यनुगुणो विकासो नानुपपन्नः। सङ्कोचकापाये च सङ्कुचितस्य प्रभामण्डलस्य व्यापनं दृष्टम्। श्रुतिर्मुक्तौ तद्व्याप्तिं दर्शयति—परिद्यावापृथिवीत्यादिना। सा श्रुतिः पूर्वापरमन्त्रोदाहरणपूर्वकं भाष्ये स्पष्टं व्याख्याता। तत्र धामानि स्थानानि। भाष्ये तेजोरूपत्वेन स्थानविशेषणं वस्तुवृत्तमभिप्रेत्य न तु धामशब्दार्थत्वमभिप्रेत्य। स्थानवाचिनो धामशब्दस्य तेजोरूपवाचित्वायोगात्तदावृत्तिमभिप्रेत्य वा तथा व्याख्यानम्। तदपश्यत्तदभवदिति बहुष्वेकवचनं छान्दसतया नेयम्। द्वितीयं मायापदमिति। अनेन परावरमायाकार्यं शुद्धमि-

सू ॥ स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतं हि ॥ १६ ॥

ननु ब्रह्मप्राप्तस्यान्तरबाह्यज्ञानलोपमाह श्रुतिः 'प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरमि' ति । कथं तस्य शक्तिरूपज्ञानव्याप्तिरुच्यत इति नाशङ्कनीयम् । इदं जीवस्य वेदनाभाववचनं सुषुप्तिमरणयोरन्यतरापेक्षं 'नाहं खल्वयमेवं संप्रत्यात्मानं जानातीत्ययमहमस्मीति नो एवेमानि भूतानि' इति सुषुप्तौ, 'एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञाऽस्ती'ति मरणे च श्रुत्या तथैवाविष्कृतं हि । तद्विलक्षणतया मुक्तेस्तत्र नाज्ञत्वादि । किन्तु मलतिरोधानापायात् सर्वज्ञत्वं च सर्वशक्तिकत्वं चेति न मुक्तौ ज्ञानादिनिषेधसंभवः ॥

इति प्रदीपवदावेशाधिकरणम् ॥ ६ ॥

अथ जगद्व्यापाराधिकरणम् ॥ ७ ॥

सू ॥ जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च ॥ १७ ॥

उक्तमीश्वरेण साम्यं मुक्तानां स्वप्रकाशत्वव्यापकत्वसर्वज्ञत्वादिभिः । तथा

श्रपदद्वयमपि ग्राह्यम् । अन्यथा परमशिवपदस्य तृतीयत्वायोगात् । सू० ॥ स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतं हि ॥ १६ ॥ ज्ञानाभावश्रुतीनां मुक्तिदशाविषयत्वे तदानीं ज्ञानविकासोक्तिरनुपपन्ना स्यादिति तासां यथाप्रकरणं सुषुप्तिविषयत्वं मरणविषयत्वं वेति प्रतिपादयितुमिदं सूत्रमिति शङ्कोत्तराभ्यां व्याचष्टे—नन्वित्यादिना । 'वाङ्मनसि संपद्यत' इत्यादिश्रुतिप्रसिद्ध्यनुसारेण संपत्तिशब्दो मरणे प्रयुक्तः । यथा सुषुप्तिमरणयोः श्रुत्यन्तरेषु ज्ञानाभावप्रसिद्धिः नैवं मुक्तावस्तीत्याह—तद्विलक्षणतयेति । न केवलं मुक्तौ वेदनाभावप्रसिद्ध्यभावमात्रमपि तु 'सर्वं ह पश्यः पश्यति सर्वमाप्नोति सर्वश' इत्यादिश्रुतिषु सर्वज्ञत्वादिप्रसिद्धिरप्यस्तीत्याह—किंत्विति ।

इति प्रदीपवदावेशाधिकरणम् ॥ ६ ॥

अथ जगद्व्यापाराधिकरणम् ॥ ७ ॥

सू० ॥ जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च ॥ १७ ॥ सङ्गतिपूर्वकं परमसाम्यश्रवणात्सदृशद्वितीयश्रवणाच्च संशयं दर्शयति—उक्तमिति । मलतिरोधानापगमात्स्वप्रकाशनिरतिशयानन्दस्वरूपाविर्भावेन धीसङ्कोचापगमात्तद्विकासाविर्भावेन सार्वज्ञ्यादेरपहतपाप्मत्वादेश्चाविर्भावेन च मुक्तस्य शिवसाम्यं प्राक्समर्थितम् । तद्वज्जगद्व्यापारे-

---

नयमणिमालायाम्

अथ प्रदीपवदावेशाधिकरणम् ॥ ६ ॥

सू० ॥ प्रदीपवदावेशस्तथा हि दर्शयति ॥ १५ ॥ स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतं हि ॥ १६ ॥

कायव्यूहस्य युगपत्कथमधितिष्ठेदसौ मुक्तः । आश्रित्य कालभेदं योज्यस्तस्मादनेकधाभावः ॥ ३९६ ॥

दीपो घटादिरोधापाये प्रभया यथाविशति गेहान्तम् । मुक्तस्तथा मलस्यापाये जगदिदमतोऽस्ति कायव्यूहः ॥ ३९७ ॥

इति प्रदीपवदावेशाधिकरणम् ॥ ६ ॥

जगत्सृष्ट्यादावपि साम्यं दुर्वारं, 'परमं साम्यमुपैती'ति निर्विशेषश्रवणात्। जगत्सृष्ट्यादिसाम्याभ्युपगमे च बह्वीश्वरत्वादीश्वरस्याद्वितीयत्वभङ्गप्रसङ्गः । अतः कीदृशं साम्यमीश्वरेण मुक्तानां विवक्षितम्। जगत्सृष्ट्यादियुक्तं तद्वर्जं वेति संशयः ॥ किं प्राप्तम्? 'स यदि पितृलोककामो भवती'त्यादिषु संकल्पमात्रात्पितृलोकादिसृष्टिसामर्थ्यश्रवणात् 'इमांल्लोकान् कामान्नीकामरूप्यनुसंचरन्' इति सर्वत्र व्यापारश्रवणात् परमेश्वरसाम्ये सङ्कोचायोगाच्च मुक्तस्य जगत्सृष्ट्यादिव्यापृतिरप्यस्तीति प्राप्ते ब्रूमः । मुक्तस्य परमेश्वरसाम्येऽपि जगत्सृष्ट्यादिव्यापारवर्जमेव स्वातन्त्र्यमस्य भोगवस्तुषु। 'यतो वा इमानि भूतानि जायन्ते' 'द्यावापृथिवी जनयन् देव एक' इत्यादिषु श्रुतं जगत्सृष्ट्यादिकं परमेश्वरस्य प्रकरणादवगम्यते । सृष्ट्यादिप्रकरणेष्वसन्निहित एव जीवः । अतो न मुक्तस्य जगत्सृष्ट्यादिकमस्ति ॥

णापि साम्यं प्राप्तमपोद्यत इति सङ्गतिः। तत्रैवं पूर्वपक्षः । परमसाम्यश्रुतेर्मुक्तस्य जगत्स्रष्टृत्वादिकमङ्गीकरणीयम्। न च समनिषेधश्रुतिविरोधात्साम्यं केनचिदेव रूपेणेति सङ्कोचनीयमिति वाच्यम्। साम्यश्रुतिविरोधात्तन्निषेधश्रुतिरेव संसारिषु ब्रह्मसाम्यनिषेधविषयेति सङ्कोचोपपत्तेः। अधिकारवाक्यावगतफलविरोधेन 'को हि तद्वेद यद्यमुष्मिँल्लोक' इत्यादेरिव साम्यनिषेधश्रुतेरेव स्तावकत्वकल्पनौचित्याच्च । अपि च साक्षादेवोपास्यगुणप्राप्तिः फलमवगम्यते यथाक्रतुरित्यादिश्रुतौ। न च परब्रह्मण्यैश्वर्यमात्रमुपास्यं न तु निरङ्कुशं सर्वजगदैश्वर्यमतो मुक्तस्य स्वसङ्कल्पसृष्टकतिपयवस्त्वैश्वर्यसिद्धावपि यथाक्रतुवाक्यमुपपद्यत इति वाच्यम्। 'सर्वस्य वशी सर्वस्येशानः एष सर्वेश्वरः कारणं तु ध्येयः सर्वैश्वर्यसंपन्न' इत्यादिश्रुतिषु निरङ्कुशस्य सर्वैश्वर्यस्योपास्यत्वावगमात्। किंच मुक्तस्य सर्वेषु लोकेषु कामचारः श्रूयते। न तस्य तत्तल्लोकगतफलभोगार्थत्वकल्पनं युक्तम्। ब्रह्मानन्दमनुभवतोऽपि विषयान्तरलिप्सया सञ्चाराभ्युपगमे तस्य निरतिशयत्वभङ्गापत्तेः । अतो मुक्तस्य नियमनादिलीलार्थ एव लोकसञ्चारः । तस्मात्परमसाम्यतत्क्रतुन्यायसर्वलोकसञ्चारादिप्रतिपादनदर्शनान्मुक्तस्यापि परमेश्वरवज्जगत्स्रष्टृतादिकमङ्गीकरणीयम् । न च यस्य यद्गुणप्राप्तिर्यदधीना तस्य स गुणस्ततो न्यून इति नियमोऽस्ति। गुरोर्विद्यामधिगतवतां शिष्याणां तद्वदेव व्याख्यातृत्वप्रबन्धनिर्मातृत्वादिदर्शनात्। न च सृष्ट्यादिप्रकरणेषु परमेश्वरस्यैव प्रकृतत्वान्मुक्तानामसंनिहितत्वाच्च परमेश्वरस्यैव सृष्ट्यादिव्यापारो न मुक्तानामिति वाच्यम्। श्येनप्रकरणे श्येनवदिषोरसंनिहितत्वेऽपि 'समानमितरच्छ्येनेने'ति साम्यवचनात्तदीयवैशेषिकाङ्गानामिषाविव मुक्तानां परमेश्वरसाम्यवचनात्तदीयसृष्ट्यादिव्यापाराणां तेषु सिद्ध्युपपत्तेः। गावामयनिकस्वरसामादिप्रकरणाम्नातानामपि प्रकरणान्तराम्नातस्वरसामैककपालामिक्षाणां साप्तदश्यादिलिङ्गबलात्तदीयधर्मान्तरप्राप्तिवत् सर्वलोकसञ्चारादिलिङ्गबलान्मुक्तानां पारमेश्वरजगद्व्यापारप्राप्त्युपपत्तेश्चेति । सिद्धान्तस्तु मुक्तानां ब्रह्मणा साम्यश्रवणेऽपि जगत्सृष्ट्यादिव्यापारवर्जमेव साम्यमास्थेयम् । अन्यथा जगत्कारणत्वस्य ब्रह्मलक्षणत्वोक्त्या जगत्स्रष्टुरेकत्वश्रुत्या च विरोधोपपत्तेः। तस्माद्यथाप्रकरणं परमेश्वरसाधारण एव जगद्व्यापारः नत्वसन्निहितमुक्तसाधारण इति । अथ लो-

सू ॥ प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः ॥ १८ ॥

'इमांल्लोकान् कामान्नी कामरूप्यनुसञ्चरन्' इत्यादिषु मुक्ते जगद्व्यापारस्य प्रत्यक्षोपदेशात् । अस्य तत्संबन्धोऽस्तीति चेन्न, 'कामान्नी' इति कामभोगसंबन्धादधिकारिणां ब्रह्मादीनां मण्डलेषु स्थितभोगानुषङ्ग एवोच्यते । अतोऽस्य न जगद्व्यापारः । तथा सति तस्य भोगानुषङ्गाद्विकारित्वमित्यत आह—

सू ॥ विकारावर्ति च तथा हि स्थितिमाह ॥ १९ ॥

तस्यानुभाव्यं सुखं विकारभावासंस्पृष्टं विशुद्धं परिपूर्णब्रह्मस्वरूपम् । तथा हि खल्वस्य स्थितिमाह श्रुतिः । 'रसो वै सः । रसꣳह्येवायं लब्ध्वाऽऽनन्दी भवती' ति । ब्रह्मस्वरूपं हि 'सत्यं ज्ञानमनन्तं ब्रह्म' 'आनन्दो ब्रह्म' इत्यादिष्वविकृतमेव श्रूयते । अतो न विकारि पशुसुखवन्मोक्षसुखम् । किमुक्तं भवति । सदाशि-

---

कसञ्चारलिङ्गावलम्बनां शङ्कामुद्भाव्य निराकरोति—सू० ॥ प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः ॥ १८ ॥ नियमनार्थो न भवति लोकसञ्चारः किन्तु तत्तल्लोकगतभोगप्राप्त्यर्थ इति 'कामान्नी' 'कामरूपी'ति विशेषणाभ्यामवसीयत इति भावः । एवं जन्मवृद्ध्यादिविकारवत्क्षुद्रभोगलिप्सया मुक्तस्य लोकपरिभ्रमणाङ्गीकारे तस्य निरतिशयब्रह्मानन्दानुभवनितान्ततृप्तत्वं न स्यात्, अमुक्तसाम्यमेव स्यादित्याशङ्कामुद्भाव्य तन्निराकरणार्थत्वेनोत्तरसूत्रमवतारयति—तथासतीति । विकारित्वमिति । मुक्तेष्यमाणभोगस्येति शेषः । यद्वा मुक्तस्यैव सुखाभिलाषरूपविकारवत्त्वं स्यादित्यर्थः ॥ सू० ॥ विकारावर्ति च तथा हि स्थितिमाह ॥ १९ ॥ विकारेषु जन्मवृद्ध्यादिषु न वर्तत इति विकारावर्ति परिपूर्णं ब्रह्मसुखम् । चकार एवकारार्थः । तदेवानुभवति मुक्त इति शेषः । रसो वै स इति । यद्यप्येषा श्रुतिर्मुक्तामुक्तसाधारणत्वेन 'भावे जाग्रद्व'दिति सूत्रे व्याख्याता तथापि मुक्तासाधारणत्वेनापि व्याख्यातुं शक्यत इत्यभिप्रेत्यैतदुदाहरणम् । यद्वा तत्प्रकरणाम्नातस्य 'यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते । अथ सोऽभयं गतो भवती'ति वाक्यान्तरस्योपलक्षणमेतत् । अविकृतमेवेति । ब्रह्मानन्तशब्दयोरपरिच्छिन्नवाचित्वादिति भावः । ननु, तत्तल्लोकगतभोगलिप्सया परिभ्रमति परिपूर्णं ब्रह्मसुखमेवानुभवतीति च परस्परविरुद्धम् । न च मुक्तौ सविभूतिकब्रह्मानुभवस्य पुरुषार्थताभ्युपगमाद्ब्रह्मसुखरूपतयैव मुक्तस्य तत्तल्लोकगतकामभोगानुभवो न संसारिवल्लौकिकसुखतयेति वाच्यम् । 'अहमन्नमहमन्नाद'इत्यादिमुक्तगीते भोग्यवर्गस्यात्मीयत्वादौपचारिकेणात्मत्वेन तद्भोक्तृत्वे चानुभूयमानस्यानुवाददर्शनेन प्रपञ्चस्य ब्रह्माकारतयानुभवासिद्धेरित्याशङ्क्य परिहरति—किमुक्तं भवतीति । अयमाशयः । भोग्यभोक्तृरूपं प्रपञ्चं ब्रह्माकारतया पश्यन्नपि मुक्तः स्वयमपि विगलितमनुष्यादिदेहाभिमानतया पराहंभावमुपगत इति स्वविशेषणतयाप्यनुभवति । अत एव 'तदपश्यत्तदभवत्तदासी'ति मन्त्रे सर्वत्र शिवात्मकं वस्त्वपश्यन्स्वयमपि सर्वात्मतया तत्सदृशोऽभवदिति ब्रह्मविभूतितयानुभूयमानस्यैव प्रपञ्चस्य स्वविशेषणतयाप्यनुभव उक्तः । एवं च स्वविशे-

वादीनामधिकारिणां ब्रह्मान्तानां मण्डलेषु स्वेच्छया सञ्चरमाणः कामाशी कामरूपी विगलितमनुष्यादिदेहाभिमानः असङ्कुचितशक्तित्रयव्यापारः परमानन्दप्रकाशविभूतिमयशक्तिशिवसामरस्यपरब्रह्मस्वरूपैकरसप्रपञ्चावगाहिनं परिपूर्णमहंभावं प्रकटमनुभवति। तथा हि 'अहमन्नमहमन्नमहमन्नम्। अहमन्नादोऽहमन्नादोऽहमन्नादः' इत्यादिना भोज्यभोक्त्रादिसकलप्रपञ्चात्मभावपरिपूर्णाहंभावनाऽस्यावगम्यते। अत्राहङ्कारो न सांसारिकः, सकलप्रपञ्चावगाहित्वेन परिपूर्णत्वात्, किन्तु मुक्तस्वभाव एव। कल्पितात् देवोऽहं मनुष्योऽहमिति देवादिदेहमात्रावगाहितया परिच्छिन्नात्सांसारिकाहङ्कारादयं विलक्षण एव। अतोऽत्र न प्राकृताहङ्कारसंबन्धः॥ यद्वा—अहमिति शक्तिशिवाद्वयं ब्रह्मोच्यते। तदेवान्नादिकं प्रपञ्चजालमिति भावना। तथाऽऽप्तवचनम्। "अनुत्तरविसर्गान्ता शिवशक्त्यद्वयात्मनः। परामर्शो निर्गुणत्वादहमित्युच्यते विभोः॥ हृद्यकारो द्वादशान्ते हकारस्तदिदं विदुः। अहमात्मकमद्वैतं यत्प्रकाशात्मविश्रमः॥" इति। अत्रानुत्तरब्रह्मानन्दपदानुप्रविष्टस्य मुक्तस्य सकलप्रपञ्चाकारशिवाभिधायकप्रासादाक्षरानुसंधानपूर्वकं गानं कर्तव्यतया न विधीयते। किंत्वानन्दास्वादपरमोल्लासद्योतनाय स्तुतिरिति। अतो मुक्तानां ब्रह्मानन्दानुभवव्यापारमन्तरेण सृष्ट्यादिव्यापारः स्वेच्छया न संभवति॥

षणतया कामभोगमनुभवन्नपि ब्रह्माकारमेव सुखमनुभवतीत्येतन्नानुपपन्नमिति। स्वेच्छया सञ्चरमाण इति। 'समस्तृतीयायुक्ता'दित्यात्मनेपदम्। शक्तयः इच्छाज्ञानक्रियाख्याः। परमानन्देति। परमानन्दात्मको यस्तत्प्रकाशः तद्विभूतिमयं तत्प्राचुर्यात्मकं यच्छिवशक्त्योस्सामरस्यं मेलनं तदात्मकं यत्परं ब्रह्म तद्रूपैकरसः तद्विशेषणतैकस्वभावो यः प्रपञ्चः तदवगाहिनं तं स्वविशेषणत्वेनाप्यवगाहमानमित्यर्थः। अन्नशब्देन भोग्यवर्ग उच्यते अन्नादशब्देन भोक्तृवर्गः तदुभयग्रहणं भोगस्थानादेरप्युपलक्षणमित्यभिप्रेत्य व्याचष्टे—भोज्यभोक्त्रादीति। एवं च प्राकृताहङ्कारबन्धरूपोऽयमहंभावः कथं मुक्तावित्यपि न शङ्कनीयमित्याह—अत इति। एवं'महमन्नमहमन्नाद'-इत्यत्राहंशब्दः स्वात्मपर इत्यङ्गीकृत्य तथापि प्रपञ्चस्य ब्रह्माकारतानुभवोऽप्यस्ति इत्युपपादितम्। इदानीं तस्य शिवशक्तिसामरस्यरूपपरब्रह्मपरत्वान्न विरोधशङ्कावकाश इति पक्षान्तरमाह—यद्वेति। अनुत्तरस्सर्वादिरकारः विसर्गान्तोहङ्कार इत्याहुः। शिवशक्त्योरद्वयमपृथग्भावः। तस्य योनिगुणत्वात्सत्त्वरजस्तमोगुणाभावमपेक्ष्य तुरीयात्मना परामर्शः तत्राहमिति प्रयुज्यत इत्यर्थः। अहमिति द्वंद्वैकवद्भावः। हृदीति हृदयपुण्डरीके अकारः हृदयादिद्वादशस्थानावसाने ब्रह्मरन्ध्रस्योपरि हकार इति तयोर्भावनास्थाने इमे। यत्प्रकाशात्मविश्रम इति। प्रकाशात्मनः शिवशक्तिमेलनस्य वाचकतया विश्रान्तिस्थानं यदहंपदमित्यर्थः। ननु किं मुक्तस्याप्ये 'तत्सामगायन्नास्त' इति सामगानं विधीयते किन्तु निरतिशयानन्दास्वादप्रयुक्तं गानमनूद्यत इत्याह—अत्रानुत्तरेति। अनुत्तरं सर्वोत्तरं ब्रह्मणश्शिवस्यानन्दरूपं यत्पदं दिव्यस्थानं तदनुप्रविष्टस्येति विधिवश्यत्वाभावे हेतुगर्भं विशेषणम्। सकलेति। सकलप्रपञ्चाकारशक्तिविशिष्टतया तदाकारस्य शिवस्याभिधायकं वैदिकप्रासादाक्षरमहमिति पदं तदनुसन्धानपूर्वकमित्यर्थः। स्तुतिरिति।

सू ॥ दर्शयतश्चैवं प्रत्यक्षानुमाने ॥ २० ॥

एवमुक्तमर्थं प्रत्यक्षानुमाने श्रुतिस्मृती दर्शयतः । 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः' इत्यादिका श्रुतिः । 'अप एव ससर्जादा'वित्यादिका स्मृतिश्च । अतो ब्रह्मण एव जगत्कारणत्वादिकमिति ॥ तथा सति । "यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम् । तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति ॥" 'मुक्तः शिवसमो भवेत्' इत्यादिषु मुक्तस्य च ब्रह्मणा शिवेन परमसादृश्यप्रतिपादनात् तस्य जगत्सृष्ट्यादिकं यद्यदस्ति तत्सर्वमसङ्कुचितमस्यापि स्यात् । अन्यथा परमसादृश्यहानिरित्यत आह—

सू ॥ भोगमात्रसाम्यलिङ्गाच्च ॥ २१ ॥

मुक्तस्य ब्रह्मणा साम्यं सकलकामभोगमात्रादेव, न जगत्सृष्ट्यादिना । तथा सति बह्वीश्वरत्वप्रसङ्गात् । तथा हि श्रूयते 'सोऽश्नुते सर्वान् कामान् सह

'आनन्दोद्रेकादित्थं गायन्नास्त' इति तदानन्दातिशयस्तुतिरित्यर्थः ॥ सू० ॥ दर्शयतश्चैवं प्रत्यक्षानुमाने ॥ २० ॥ तस्माद्वेति । नैवं काचन श्रुतिः स्मृतिर्वा मुक्तस्य जगद्व्यापारं प्रतिपादयन्ती दृश्यत इत्याशयः । उत्तरसूत्रव्यावर्त्याशङ्कामाह—तथाहीति । यद्यपि मुक्तस्य साक्षाज्जगद्व्यापारं प्रतिपादयन्ती श्रुतिः स्मृतिर्वा नास्ति । तथापि तस्य ब्रह्मसाम्यं प्रतिपादयन्ती श्रुतिः स्मृतिश्चास्तीति तत एव तस्य जगद्व्यापारः सिध्येत् । न च ब्रह्मलक्षणस्य सृष्टिकृत्त्वश्रुतेश्च विरोधः । अनाद्यनन्तकल्पानुवृत्तसर्वप्रपञ्चजन्मादिकारणत्वं ब्रह्मलक्षणं तथाभूतसर्वप्रपञ्चस्रष्टैक इति तदभिप्रायोपपत्तेः । सर्वोऽपि मुक्तः स्वमुक्तिप्राचीनप्रपञ्चकर्ता न भवतीति मुक्तानां स्वस्वमुक्त्यनन्तरभाविप्रपञ्चसृष्टौ कुलालादीनां कल्पाद्यकालसृष्ट्यनन्तरभाविघटादिसृष्टाविव कारणत्वेऽपि विरोधाभावादित्याशयः ॥ सू० ॥ भोगमात्रसाम्यलिङ्गाच्च ॥ २१ ॥ मुक्तस्य ब्रह्मणा साम्यं यद्यनन्याधीनत्वादिनापि तदा परमेश्वरानधीनया स्वस्वेच्छयैव जगत्सृष्ट्यादिषु प्रवर्तमानानां मुक्तानामैकमत्यनियमाभावात्कस्यचित्सिसृक्षायामन्यस्य संजिहीर्षापि कदाचिद्भवेदिति किमपि कार्यं न निर्वर्त्येत । अथानन्याधीनत्वं सर्वशेषित्वं सर्वैश्वर्यं सर्वप्रपञ्चस्रष्टृत्वं तदुपादानत्वमित्यादिगुणेभ्यो व्यावर्त्य परमसाम्यं तदितरगुणेषु सङ्कोच्येत तदा जगद्व्यापारसाम्यादपि व्यावर्त्य 'सोऽश्नुते सर्वान्कामान्सह ब्रह्मणे'ति श्रुतिसिद्धसविभूतिकब्रह्मानुभवरूपे भोगे तत्सङ्कोचयितुं युक्तम् । एवं कृतसङ्कोचायामेव साम्यश्रुतौ सङ्कोचकल्पने श्रुत्यन्तरसिद्धब्रह्मानन्दभोगाद्यतिरिक्तैस्सर्वैरपि गुणैस्साम्यनिषेधविषयतया 'तत्समश्चे'त्यादिश्रुतेरांजस्यं लभ्यते । नित्यमुक्तस्य तस्यैव शिवस्य वियदादिप्रपञ्चस्रष्टृतया लाघवंच लभ्यते । एतेन तत्क्रतुन्यायादपि मुक्तस्य जगद्व्यापारप्राप्तिर्निरस्ता । अनन्याधीनत्वादिष्विव जगद्व्यापारांशेऽपि सङ्कोचस्य न्याय्यत्वात् । अप्रतीकालम्बनसूत्रोक्तरीत्या यथाक्रतुरित्यस्य तद्गुणकब्रह्मप्राप्त्यर्थकत्वेन स्वयं तद्गुणप्राप्त्यर्थकत्वाभावाच्च । न च तथा सति श्रुतौ तत्क्रतुन्यायोपन्यासवैयर्थ्यम् । स्वर्गार्थोपासनया हि स्वर्गस्यैव प्राप्तिः नोपास्यगुणविशिष्टस्य ब्रह्मणः । मुक्त्यर्थोपासनायां तु न तथेति तद्वैषम्यप्रदर्शनार्थत्वोपपत्तेरित्यभिप्रायं सूत्रं

ब्रह्मणा विपश्चिता' इति । विविधं पश्यन्त्या चिता ज्ञानशक्त्या युक्तं हि ब्रह्म विपश्चिदित्युच्यते । यया स्वाभाविक्या हृदयभूतया परमसत्तास्फुरद्रूपया देशकालविशेषशून्यस्य ब्रह्मणः शिवस्य सर्वज्ञत्वं सर्वकारणत्वं सर्वात्मत्वं सर्वशक्तिमत्त्वमलुप्तशक्तित्वं स्वतन्त्रत्वं नित्यतृप्तत्वं निरतिशयैश्वर्यत्वं सर्वानुग्राहकत्वं सर्वमुक्तयोग्यरसरूपत्वं च संभवति, तादृश्या युक्तं परं ब्रह्मापि विपश्चित् । तेन सह समरसात्मा मुक्तोऽपि सर्वान् कामान् अन्तःकरणेन स्वाभाविकेन मनसा ज्ञानविशेषेण समश्नुते पश्यन् रमते । तथा हि 'मनसैवैतान् कामान् पश्यन् रमते' 'मनोऽस्य दैवं चक्षु'रिति श्रूयते । 'सत्यात्म प्राणारामं मनआनन्दम्' इति ब्रह्मणोऽपि मनस्यानन्दभोगः, न बाह्यकरणापेक्षा । ब्रह्मणो मुक्तस्य च शरीरेन्द्रियादिग्रहणमैच्छिकं विहारार्थमित्यदोषः । अतो यथा ब्रह्म सकलान् कामान् भुङ्क्ते, तथा मुक्तोऽपीति भोगमात्रसाम्यं मुक्तस्य ब्रह्मणेति समीचीनम् । लोके कतिपयधर्मसंबन्धादपि सिंहो देवदत्त इत्यादिषु सादृश्यव्यवहारदर्शनान्न तत्सादृश्यवचनहानिः ॥

इति जगद्व्यापाराधिकरणम् ॥ ७ ॥

व्याचष्टे—ब्रह्मणा सहेति । विविधं पश्यन्त्येत्यादि । भाष्यसंदर्भः प्राक्तत्र तत्र कृतेन व्याख्यानेन व्याख्यातप्रायः । लोके कतिपयेति । नच कतिपयधर्मसंबन्धमात्रेण परमसाम्यव्यवहारो न संभवतीति शङ्कनीयम् । परिमाणरूपैकधर्मसाम्येनापि तुलाधृतयोः सुवर्णशिलाशकलयोरत्यन्तसाम्यव्यवहारदर्शनादित्यभिप्रायः । अनेनैवाभिप्रायेण सूत्रे मात्रशब्दः । स हि साकल्यार्थो नत्ववधारणार्थः । यथा ब्रह्म सकलान्कामान्भुङ्क्ते तथा मुक्तोऽपीति भाष्यदर्शनात् । भोगमात्र एव साम्यं नान्यत्रेति श्रुतेरदर्शनात्सत्यसङ्कल्पत्वादिनापि साम्यस्याभिमतत्वाच्च । स च साकल्यार्थः सर्वविभूतिविशिष्टब्रह्मानुभवरूपब्रह्मभोगसाम्यविषयतया परमसाम्यश्रुत्युपपादनार्थ इति ॥

इति जगद्व्यापाराधिकरणम् ॥ ७ ॥

नयमणिमालायाम्

अथ जगद्व्यापाराधिकरणम् ॥ ७ ॥

सू० ॥ जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च ॥ १७ ॥ प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः ॥ १८ ॥ विकारावर्ति च तथा हि स्थितिमाह ॥ १९ ॥ दर्शयतश्चैवं प्रत्यक्षानुमाने ॥२०॥ भोगमात्रसाम्यलिङ्गाच्च ॥ २१ ॥

ऐश्वर्यं मुक्तिभाजामिदमखिलजगद्व्यापृतिर्व्यापकः स्यादाम्नाता ब्रह्मणा यत्परमसदृशता सत्यसङ्कल्पता च ।
कामान्नी कामरूपी सकलभुवनसंचारशाली स्वराडित्यादिष्टं यत्ततोऽपि स्फुटमिह जगतां तादधीन्यं प्रतीमः ॥ ३९८ ॥
मैवं ब्रह्मप्रकरणगतास्सृष्टिसंहारमुख्याः संबध्यन्ते कथमपि न तैस्सन्निधावप्रसक्तेः ।
तत्तल्लोकप्रथितविषया भोगभोग्यैकभावा नैवाचष्टे नियमयितृतां लोकसंचारसूक्तिम् ॥ ३९९ ॥
द्वैया अपि मुक्तानां विकारलोकस्थिता भोगाः । ब्रह्माकारतया स्युर्भोग्याश्शक्त्या सहैतदनुभवताम् ॥ ४०० ॥
सृष्टौ पित्रादिनानाविधनिजवपुषां कामचारादिके च स्वातन्त्र्योक्तेर्जिता सा परमशिवदशा सत्यसङ्कल्पतैषाम् ।
नत्वाकाशादिसृष्टिप्रविलयकरणे शासने वाखिलानां तत्त्वांशस्यैव चिह्नं धवलमिव महीनायकस्यातपत्रम् ॥ ४०१ ॥

इति जगद्व्यापाराधिकरणम् ॥ ७ ॥

अथ अनावृत्त्यधिकरणम् ॥ ८ ॥

सू ॥ अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॥ २२ ॥

उक्तं ब्रह्मणा सादृश्यं सायुज्यं मुक्तानाम्, भोगादिसाधर्म्यात् । इह तेषां पुनरपि कदाचित् संसारापत्तिरस्ति न वेति संशयः । कर्मविशेषेणेन्द्रादिपदारूढानामावृत्तिदर्शनं संशयकारणम् ॥ किं तावत् प्राप्तम्? 'कामान्नी कामरूप्यनुसंचरन्' इत्यादिषु बहुशरीरसंबन्धोऽवगम्यते मुक्तानाम् । तत्संबन्धे सति पुनरपि पुण्यपापकर्तृत्वं संभाव्यते । पूर्वकृतस्योपासनातिशयस्य बहुधा भोगेन क्षये तात्कालिककर्मवशात् पुनरपि हीनसुखसंसारप्राप्तिः । तथा हि इन्द्रपदाद्यारूढानां पुण्यातिशयक्षये पुनरावृत्तिः, ब्राह्मणादिशरीरप्राप्तिश्च । अतश्च ब्रह्मपदं प्राप्तानां भोग्यद्रष्टृत्वादिसंबन्धेन भोगस्य पुण्यातिशयक्षयहेतुत्वेन पुनरावृत्तिः संसार इति प्राप्ते ब्रूमः । साक्षात्कृतब्रह्मज्योतिषां तत्पदानुप्रविष्टानां मुक्तानां न पुनरावृत्तिः संसारे । कुतः? 'स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलो-

अथ अनावृत्त्यधिकरणम् ॥ ८ ॥

सू० ॥ अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॥ २२ ॥ सङ्गतिं दर्शयति—उक्तमिति । यदिब्रह्मसादृश्यं मुक्तानां भोगादिमात्रेण न सर्वात्मना जगद्व्यापाराभावेन तु संसारितुल्यतैव तर्हि स्वर्गादिप्राप्तसंसारिवदेव पुनरावृत्तिरस्त्विति प्रत्यवस्थानात्सङ्गतिः । सायुज्यमिति । सादृश्यं विवक्षितम् । नन्वनावृत्तिश्रुतौ जाग्रत्यां कथमित्थं संशय इत्याशङ्क्य पूर्वपक्षकोटेर्बीजमाह—कर्मविशेषेणेति । अत्र पूर्वः पक्षः । पुण्यस्य तावद्बहुकालभोगेन क्षयो दृष्टः । उपासनापि पुण्यविशेषः । अलौकिकश्रेयस्साधनत्वादनुष्ठेयत्वाच्च । अतो बहुकालभोगेन विद्यार्जितपुण्यक्षये सति तात्कालिककर्मतस्संसारहेतुभूतपुण्यपापे भवत एव । 'एवंविदि पापं कर्म न श्लिष्यत' इति विद्यासामर्थ्यात्खलु पुण्यपापाश्लेष उक्तः । तस्मिन्भोगेन क्षीणे कुतस्तदश्लेषो भवेत् । अतस्तात्कालिकपुण्यपापवशान्मुक्तानामपि स्वर्गिणामिव पुनरावृत्तिरनिवार्या । इयांस्तु विशेषः । स्वर्गिणां स्वर्गार्थपुण्यक्षये प्राचीनपुण्यपापवशात्पुनरावृत्तिः । मुक्तानां तु तात्कालिकपुण्यपापवशादिति । किंचानुवर्तमानेऽप्युपासनापुण्ये केषांचिदपचारदोषान्नहुषवत्प्रच्युतिस्संभाव्यते । यदि कश्चिन्मुक्तस्सत्यसङ्कल्पत्वाभिमानात्परब्रह्मासाधारणं जगन्नियमनादिकं स्वस्वातन्त्र्येण सङ्कल्पयेद्राजासाधारणं राज्यपरिपालनमिव दुष्टामात्यः तस्य परब्रह्मणश्शिवस्य कोपेन मुक्तिपथात्प्रच्युतिः स्यादेव । तस्मादपुनरावृत्तिश्रुतिं 'रक्षय्यं हवा' इत्यादिश्रुतिवदर्थवादरूपा बहुकालभोग्यफलत्वाभिप्राया । अत एव ख'ल्विमं मानवमावर्तं नावर्तन्त' इति श्रुताविममिति विशेषणं मन्वन्तरान्तरे पुनरावृत्तेरनुमोदकं दृश्यत इति । सिद्धान्तस्तु । ब्रह्मसाक्षात्कारोदयकाले केषांचिद्विरजामुत्तीर्य शिवपदप्राप्तिकाले केषांचिच्च पुण्यपापानां हानं प्रियाप्रियेषु व्ययीकरणं चाग्रे तदपेक्षाविरहप्रयुक्तमित्यपुनरावृत्तिफलदृढीकरणार्थं तदाम्नानम् । अन्यथा विद्याप्रकरणे तदाम्नानवैयर्थ्यापत्तेः । तेनानावृत्तिश्रुतेर्विवक्षितार्थत्वावगत्या तद्विरोधात्स्वर्गिदृष्टान्तेन पुनरावृत्त्यनुमानं न प्रवर्तते । कारणाभावबाधितं च

कमभिसंपद्यते न च पुनरावर्तते न च पुनरावर्तत' इत्यादिशब्दात् । ब्रह्मविष्ण्वादिपदमुक्त्वा तद्विलक्षणत्वेन शिवस्य परब्रह्मणः पदं पुराणं चाभिव्यनक्ति "दिनकृत्कोटिसंकाशं स्थानमाद्यमुमापतेः । सर्वकामसमायुक्तं विशुद्धं नित्यमक्षयम् ॥ संप्राप्य तत्पदं दिव्यं समस्तक्लेशवर्जिताः । सर्वज्ञाः सर्वगाः शुद्धाः परिपूर्णा भवन्ति च ॥ विशुद्धकार्यकरणाः परमैश्वर्यसंयुताः । सदेहाश्च विदेहाश्च भवन्त्यात्मेच्छया पुनः ॥ ये संप्राप्ताः परं स्थानं ज्ञानयोगरता नराः । न तेषां पुनरावृत्तिर्घोरे संसारमण्डले ॥"* इत्यादिभिः ॥ अस्य तात्पर्यमुच्यते । 'परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत' इति परं ज्योतिःस्वरूपं हि मुक्तप्राप्य-

---

तदनुमानम् । न च प्राचीनपुण्यपापानां क्षयेऽपि तात्कालिककर्मणा पुनरावृत्तिकारणे पुण्यपापे स्यातामिति वाच्यम् । तत्काले पुण्यपापहेतुकर्मोत्पत्तावपि कारणाभावात् । न तावद्विद्यासामर्थ्यं तत्र कारणम् । तस्य चिरकालब्रह्मानन्दभोगेन क्षयोक्तेः तस्मिन्ननुवर्तमाने जक्षणक्रीडादिकर्मणा पुण्यपापशेषासंभवाच्च । नापि प्राचीनपुण्यपापवृन्दम् । तस्य शिवपदप्राप्तिकाल एव कार्त्स्न्येन प्रहीणत्वात्सत्यसङ्कल्पत्वाभिमानकृतादपचारात्प्रच्युतिरपि न संभाव्यते। मुक्तसङ्कल्पानामपि परमेश्वरप्रेरणाधीनत्वेन सर्वज्ञानां मुक्तानां स्वलीलारूपपितृलोकादिसृष्टिमात्रे सत्यसङ्कल्पत्वं न जगद्व्यापारेऽपीति स्वकीयसत्यसङ्कल्पत्वमर्यादावगतिसत्त्वेन निरतिशयब्रह्मानन्दास्वादनितान्ततृप्तानां तेषां क्षुद्रविषयभोगाभिलाषराहित्येन च स्वाधीनप्रवृत्तिकस्वशक्तिमर्यादानभिज्ञविषयभोगाभिलाषुकदुष्टामात्यन्यायाप्रसरात् । विषयभोगाभिलाषाभावे किमर्था पितृलोकादिसृष्टिः । नात्र कैमर्थ्यशङ्कावकाशं लभते । पारमेश्वरी जगत्सृष्टिरिव निरतिशयब्रह्मानन्दानुभवप्रयुक्ता लीलैव तदीया पित्रादिसृष्टिः ब्रह्मविभूत्युपबृंहणार्था वा । ते हि सविभूतिकब्रह्मानन्दमनुभावमनुभावं तृप्यन्ति । यत्त्विमं मानवमिति श्रुताविममिति विशेषणं तदनुभूयमानबहुदुःखकरम्बितत्वेन हेयत्वप्रकटनार्थं न तु ब्रह्मानन्दभोगस्य कालविशेषावच्छेदार्थमिति सर्वं समञ्जसम्। ब्रह्मोपेन्द्रादिपदविलक्षणे सर्वोत्तरे परब्रह्मणः परमशिवस्य पदे तत्संप्राप्तानां पुनरावृत्त्यभावे च शिवधर्मोत्तरादिपुराणवचनमपि प्रमाणमित्याह—**ब्रह्मविष्ण्वादीति** । **पुराणं चाभिव्यनक्तीति** यदुक्तं तत् 'इत्यादिभिः श्लोकै'रभिव्यनक्तीति पुनः क्रियोपादानेन स्पष्टीकृतम् । **अस्य तात्पर्यमिति** । दिनकृत्कोटिसङ्काशमित्यादिविशेषणानां यथा स्तुतिमात्रपरत्वशङ्का न भवति तथा तात्पर्यमुच्यत इत्यर्थः । तत्राद्यविशेषणं तावन्नित्यसन्निहितस्य शिवस्य विसृमराभिर्निरतिशयप्रभाभिर्व्याप्तत्वेनोपपादयति **'परं ज्योति'**रित्यादिना **'किमु वक्तव्य'**मित्यन्तेन । एतदुपलक्षणम् । शिवप्रभारूपपरमाकाशात्मकत्वादपि स्थानस्य दिनकृत्कोटिसङ्काशत्वं द्रष्टव्यम् । अत एव निरतिशयतेजोमात्रेत्यादिविशेषणं वक्ष्यति । अत्रोदाहृताः श्रुतयः प्रथमाध्याय एव तत्र तत्र व्याख्याताः पुरस्ताज्ज्योतिरित्येतदर्थमथर्वशिरःश्रुत्युदाहरणं निरतिशयतेजोमात्रस्फुरत्तामयं निरतिशयतेजोरूपेणैव स्फुरत्स्वप्रकाशपरमाकाशरूपमिति यावत् । **अत एव तन्निरतिशयसुखास्पदम्** । भावप्रधानो निर्देशः । निरतिशयसुखत्वास्पदम् । यद्वा मुक्तानां निरतिशयसुखानुभवस्थानमत एव स्वर्गाभिधम् । स्वर्गशब्दो हि निरतिशयसुखे तदनुभवस्थाने च प्रसिद्धः । एवं 'दिनकृ-

मुमासहितं परं ब्रह्म श्रूयते, अभिभूतसूर्यतेजोवृन्दस्य यस्य महाप्रकाशस्य भासा सर्वमेतद्विभाति । तथा च श्रुतिः "न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति ॥" इति । तथा निरूपितमथर्वशिरसि । 'परमेश्वरोऽहं पुष्करमहं पवित्रमहमग्रं च मध्यं च बहिश्च पुरस्तात् ज्योतिरित्यहमेकः सर्वे च मामेव च मां यो वेद स सर्वान् देवान् वेद' इति । तथा स्मरन्ति च । "सर्वतः पाणिपादाब्जं सर्वतोऽक्षिशिरोमुखम् । सर्वमावृत्य तिष्ठन्तं तेजोराशिं शिवं स्मरेत् ॥" इति । ततः परं ज्योतीरूपमुमासहितं शिवाख्यं परं ब्रह्म, तदधिष्ठितं पदं दिनकृत्कोटिसंकाशमिति किमु वक्तव्यम् । निरतिशयतेजोमात्रस्फुरत्तामयं, तदेव निरतिशयसुखास्पदत्वतया स्वर्गाभिधम् । 'स्वर्गो लोको ज्योतिषा वृतः' 'देवा ह वै स्वर्गं लोकमगमंस्ते देवा रुद्रमपृच्छन्' इत्यादिश्रुतिष्ववगम्यते स्थानं यत् तुरीयातीतम् । तथोत्तरगीता । 'तुरीयं च तुरीयातीतं च शिवस्थानमनामयमि'ति । 'आद्यं' सर्वलोकातीतत्वात् कारणत्वाच्च । 'शिवलोकाद्बहिर्ज्ञेयान्यण्डस्यावरणानि च' इत्यादिषु यस्य बहिरधस्तात् ब्रह्माण्डस्य सप्तावरणानि । 'परात् परतरो ब्रह्मा तत्परात् परतो हरिः । तत्परात् परतोऽपीश' इति, ब्रह्मादिविश्वाधिकस्य ब्रह्मणः तत् पदं विश्वोत्तीर्णमित्याद्यम् । 'उमापतेः' परब्रह्मणः शिवस्य, 'उमासहायं परमेश्वरं प्रभुम्' इत्यादौ तस्य ह्युमासहितस्य नीलकण्ठस्य त्रिलोचनस्य शिवस्य ध्येयत्वं तमसः प्रकृतेः परत्वेन प्राप्यत्वं चावगम्यते । किं च 'सर्वो वै रुद्रः' इत्यारभ्य सर्वात्मत्वं शिवस्याभिधाय तदुपसंहारे 'हिरण्यबाहवे हिरण्यपतयेऽम्बिकापतय उमापतय' इति श्रुतम् । प्रणवपर्यायेणोमाशब्देन परप्रकृतिरूपा पराशक्तिरुच्यते । कृष्णपिङ्गलं ब्रह्मेति च तत्सामरस्यं ब्रह्मणः समाम्नातम् । तस्मादुमापतेः परब्रह्मणः पदं तत् । पुनः कीदृशम्? 'सर्वकामसमायुक्तम्' सदा सकलकामसमन्वितम् । अतः खलु 'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विप-

त्कोटिसङ्काश'मित्यनेन शब्दतोऽर्थतश्च सिद्धमर्थजातं वर्णितम् । अथ स्थानिस्वरूपमुच्यते—स्थानं यत्तुरीयातीतमिति । तुरीयं चेति । मलिनमिश्रशुद्धभुवनापेक्षया तुर्यं शिवस्थानं तदेव गोलोकान्तर्गतस्य विष्णुपदस्य पृथक्करणे तुर्यातीतम् । अपरशिवपुरं भूर्भुवः सुवरिति त्रैलोक्यापेक्षया तुर्यं परशिवपुरं तु तुर्यातीतमित्येतद्द्वेधा व्याचष्टे—आद्यमिति । भुवनानामूर्ध्वलोकमारभ्य परिगणने सर्वोत्तरत्वादाद्यं परमाकाशरूपतया सर्वकारणत्वादप्याद्यम् । प्राथमिकमर्थमुपपादयति—शिवलोकादिति । आद्यशब्दस्य मुख्यत्वमर्थान्तरं परिगृह्य विश्वाधिकस्य परब्रह्मणः स्थानत्वेन मुख्यत्वमुपपादयति—परात्परतर इति । कैवल्यश्रुतावुमासहायस्य प्राप्यत्वेन ध्येयत्वेन च निर्देशात् सवितृमण्डलविद्यायामुमापतित्वस्याभ्यासात् उमाशब्दस्य व्यत्यस्तप्रणववर्णनिष्पन्नस्य चिच्छक्तिवाचकेष्वभ्यर्हिततयोमापतिशब्देन तत्साहित्यनिर्देशस्योत्कृष्टत्वाच्च तेन शब्देनात्र विशेष्यनिर्देश इत्याह—उमापतेरित्यादिना । विशुद्धमिति विशेषणमप्राकृतत्वात्प्राकृतलोकवद्रागद्वेषाद्यनुत्सा-

श्रिता' इति मुक्तस्य सकलकामावाप्तिः ब्रह्मणा सह निरूपिता । 'विशुद्धं' विकारासंस्पृष्टं, 'समस्तसाक्षि तमसः परस्तात्' 'आदित्यवर्णं तमसः परस्तात्' इत्यादिषु प्रकृतिविकारातीतत्वावगमात् । प्रकृतिविकारवद्रागद्वेषलोभादीनामनुत्पादकत्वात् विशुद्धं हि तत्पदं शिवमयमिति । अनेनास्य परतत्त्वप्रकाशमयमहानन्दमेदुरपरमाकाशरूपत्वमुक्तं भवति । प्राकृतानामेव विकाराणां सृष्ट्यादिश्रवणात्, तदतीतत्वादस्य नित्यत्वम् । भूताकाशादिप्रपञ्चस्यैव सृष्ट्यादिकं । परमाकाशरूपस्यास्य न तदस्ति ॥ 'यदा तमस्तन्न दिवा न रात्रिर्न सन्न चासच्छिव एव केवल' इति श्रवणाच्छिवव्यतिरिक्तस्य सर्वस्य प्रलयोऽवगम्यते । कथमस्य नित्यत्वं मुक्तानामपीति चेन्न । मुक्तानामस्य पदस्य च शिवतत्त्वेऽन्तर्भावात् । विशुद्धिभाजनतया शिवत्वमेषां समानमेव । सृष्ट्यादिचक्रपतितपशुपाशविलक्षणत्वं हि शिवत्वम् । अतः पशुपाशविलक्षणस्य शिवपदस्य नानित्यत्वप्रसङ्गः । अक्षयं क्षयवृद्धिरहितं, क्षयातिशययुक्तकर्मफलस्वर्गादिविलक्षणं, तादृशं हि 'सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्' इति श्रूयते । विष्णोः परमं स्वरूपं हि परमाकाशाख्यं शिवस्थानं षड्विधस्याध्वनः पारं तदतीतमुच्यते । 'ब्रह्मलोकमभिसंपद्यते न च पुनरावर्तते न च पुनरावर्तते' इत्यत्रानावृत्तिलक्षणं ब्रह्मलोकशब्दवाच्यमिदमेव स्थानम् ॥ 'संप्राप्य तत् पदं दिव्यं समस्तक्लेशवर्जिता' इत्यादिना तदारूढानां ब्रह्मसदृशानां लक्षणमुच्यते । महतो देवस्य स्वभूतं दिव्यमवाङ्मनसगोचरं स्वभावं पदं संप्राप्य तत्संबन्धिना ज्ञानयोगेनाधिगम्य मुक्तात्मान एव भवन्ति 'समस्तक्लेशवर्जिताः' अस्तं विनाशः, क्लेशा अविद्यादयः, सम्यक् तद्वर्जिता भवन्ति । अनेन मुक्तात्मनां हेयगुणराहित्यमुक्तम् । अतः कल्याणगुणसाहित्यमुच्यते । शिवत्वं हि ते संपन्नाः 'सर्वज्ञाः' ज्ञानावरणस्य मलस्य विनाशात् सर्वज्ञा भवन्ति । सर्वगतज्ञानशक्तयश्च 'सर्वगाः'

दकत्वाच्चेति व्याचष्टे—विशुद्धमिति । अत्राप्राकृतत्वोक्तिबिन्दुमायाप्रकृतिकार्यशुद्धमिश्रमलिनप्रपञ्चविलक्षणत्वपरा । अतोऽस्य स्थानस्य चिदानन्दघनपरमाकाशरूपत्वं फलितं भवतीत्याह—अनेनेति । स्थानविशेषस्य कथं नित्यत्वं शिवव्यतिरिक्तस्य सर्वस्याप्यनित्यत्वादित्याशङ्क्याह—प्राकृतानामिति । प्राकृतग्रहणं बैन्दवादीनामप्युपलक्षणम् । कथं तर्हि 'शिव एव केवल' इत्युक्तिरित्याशङ्कामुद्भाव्य नित्यमुक्तानामिदानींतनमुक्तानामस्य शिवपदस्य च विशुद्धतया पशुपाशविलक्षणशिवपदार्थान्तर्भावात्तथोक्तिरित्याह—यदा तम इत्यादिना । नित्यमित्यनेन पुनरुक्तिं परिहरन्नक्षयपदं व्याचष्टे—अक्षयमिति । क्षयग्रहणं वृद्धेरप्युपलक्षणम् । तथा च स्वर्गं प्राप्तानामिव शिवपदं प्राप्तानामानन्दानुभूतावुत्कर्षापकर्षौ न स्त इत्यर्थः । इदमेव स्थानं परमाकाशरूपतया वैष्णवपरमस्वरूपत्वेन सर्वोत्तरतया कलातत्त्वभुवनवर्णपदमन्त्राध्वपारत्वेनानावृत्तिस्थानत्वेन च श्रुतिषु प्रसिद्धमित्याह—तादृशं हीत्यादिना । सर्वगतत्वमणुत्वेऽपि ज्ञानशक्तिविकासेनोपपादयति—सर्वगतज्ञानशक्तयश्चेति । 'अस्तक्लेशाभ्यां वर्जिता' इत्यनेन सकलहेयगुणराहित्यस्योपलक्षितत्वा'त्सर्वज्ञ'मित्यारभ्य कल्याणगुणोक्तेरारब्धत्वाच्च शुद्धा इत्यनेन शिवत्वाभि-

भवन्ति । उक्तं हि 'प्रदीपवदावेश' इति । शुद्धाश्च ते मलापायेन प्रादुर्भूतशिवभावाः शुद्धाकाशरूपाः प्रज्ञानघना इति । उक्तं हि 'पूर्वभावादविरोधं बादरायणः' इति स्वयंप्रकाशत्वं सत्यसंकल्पत्वादिवैशिष्ट्यं च । 'परिपूर्णा भवन्ति' नित्यतृप्ताश्च ते भवन्ति, निरतिशयानन्दस्वरूपत्वात्, अवाप्तसकलकामत्वाच्च । निर्विकारनिरतिशयानन्दानुभवितृत्वं हि तेषां स्वभावः । उक्तं हि 'विकारावर्ती' ति । अतस्ते परिपूर्णा 'विशुद्धकार्यकरणाः' विकारास्पृष्टशरीरेन्द्रियाः । 'एकधा भवती'ति मुक्तस्य स्वेच्छया बहुशरीरग्रहणमुक्तम् । अतो मुक्तानामैच्छिकं शरीरादिकं विशुद्धमेव । महामायानिष्पन्नत्वात् । विशुद्धत्वं नामाश्रयविकाराहेतुत्वम् । 'इन्द्रो मायाभिः पुरुरूप ईयत' इतीश्वरस्यापि महामायाशक्तिभिर्नीलकण्ठत्वादिलक्षणबहुशरीरपरिग्रहणं श्रूयते । 'स्थिरेभिरङ्गैः पुरुरूप उग्र' इति परमेश्वरपरिगृहीतानां शरीराणामप्राकृतानां विशुद्धविद्यामयानां स्थिरत्वमाह मन्त्रभागः । यथा परमेश्वरो विशुद्धबहुशरीरपरिग्रहं करोति तथा मुक्ता अपि । 'परमैश्वर्यसंयुताः' परमविभूतिसंयुक्ताः स्वाधीनप्रसरः परप्रेष्यताकार्पण्यरहिताः । उक्तं हि । 'अत एव चानन्याधिपति'रिति मुक्तस्य कर्माद्यवश्यतया परमस्वातन्त्र्यम् । अतः स्वतन्त्राः परमैश्वर्यसंयुक्ताः । 'सदेहाश्च विदेहाश्च भवन्त्यात्मेच्छया पुनः' ते शिवपदाधिरूढा ईश्वरसंकल्पं विना कदाचित् परिगृहीतविशुद्धशरीरेन्द्रियोपभोगा भवन्ति, कदाचिद्विगतदेहेन्द्रियादयः केवलेन स्वाभाविकेन मनसाऽनुभूयमानसकलकामा भवन्ति । तथा हि निरूपितम् । 'स एकधा भवति त्रिधा भवति' 'मनसैतान् कामान् पश्यन् रमते' इत्यादिश्रुत्यनुसारेण 'द्वादशाहवदुभयविधमि'ति । अतस्ते सदेहा विदेहाश्च भवन्ति । श्रूयते च 'विरूपेभ्यो विश्वरूपेभ्यश्च वो नमो नमः' इति शिवसाधर्म्यभाजां विगतरूपत्वं बहुरूपत्वं च ।

व्यक्तिरेवोच्यत इति व्याचष्टे—प्रादुर्भूतेति । शिवत्वमत्र किल विवक्षितमुक्तं हि सार्वज्ञ्यं धर्मज्ञानविकसनं च प्रागेवेत्याकाङ्क्षायामाह—प्रकाशरूपा इति । तस्यैव विवरणं प्रज्ञानघना इति । अभिव्यक्तचिदानन्दस्वरूपा इत्यर्थः । एतत्सत्यसङ्कल्पत्वाद्यभिव्यक्तेरप्युपलक्षणम् । अत एवाह—उक्तं हीति । महामायानिष्पन्नत्वादिति । महामायाशब्देनात्र परमाकाशरूपा शक्तिरेवोच्यते । एवमग्रेऽपि विशुद्धविद्यामयानामित्यत्र विशुद्धविद्याशब्देनापि । ननु चिच्छक्तिमयत्वाद्देवोर्मुक्तशरीराणामितरशरीरव्यावृत्तं किं विशुद्धत्वमित्याकाङ्क्षायामाह—विशुद्धत्वं नामेति । प्रसङ्गादीश्वरस्यापि चिच्छक्तिमयानि शरीराणीत्याह—इन्द्रो मायाभिरिति । 'परमैश्वर्यसंयुता' इत्यस्याकर्मवश्यत्वार्थे पर्यवसानमाह—परमैश्वर्येति । ईश्वरसङ्कल्पं विनेति । कर्मानुसारमीश्वरसङ्कल्पमनपेक्ष्येत्यर्थः । मुक्तानामपीश्वरे नियम्यत्वमात्रं 'तस्य च नित्यत्वा'दिति (ब्र० २-४-१४-७) सूत्रोक्तं न

शरीरपरिग्रहे यादृशानीश्वरस्य, शरीराणि नीलकण्ठत्वादिलक्षणानि तादृशानि तत्सादृश्यभाजामिति। केचित् 'नीलग्रीवाः शितिकण्ठा' इत्यादिश्रवणादिति। एवं ज्ञाने वेदान्तजन्ये योगे यमादिरूपे परमेश्वरविषये ये निरता निष्णातास्तादृशं पदं परमशिवस्य प्राप्तास्तेषां पूर्वोक्तगुणानां शिवसदृशानां 'घोरे' निरतिशयतापरूपत्वात् दुस्सहे 'संसारमण्डले न पुनरावृत्तिः' न पुनः संसारधर्मान्वय इति। तस्मात् 'ब्रह्मलोकमभिसंपद्यते न च पुनरावर्तते' इति श्रुतेः सर्वज्ञस्य सर्वशक्तेः सर्वैश्वर्यसंपन्नस्य सर्वानुग्राहकस्य सर्वकर्मसमाराध्यस्य निरस्तसमस्तदोषकलङ्कस्य निरतिशयमङ्गलगुणरत्नाकरस्य विरूपाक्षस्य परब्रह्मण उमापतेर्लोकं निरवधिकानन्दप्रकाशं नित्यमक्षयमभिसंपन्नाः सर्वज्ञत्वादियोगिनोऽनावृत्तिभया वर्तन्ते तत्रेति॥ एतदुक्तं भवति—'यत्र देवा अमृतमानशानास्तृतीये धामान्यभ्यैरयन्त' इत्यादिषु श्रुतानि निरतिशयानन्दप्रकाशघने ब्रह्मणि शिवे सामरस्यमुपगता मुक्ताः प्रकाशवपुषः सर्वज्ञाः सर्वगताः शान्ता नित्यपरमैश्वर्याधारा निःशेषविगलितमलावरणाः सर्वत्र तद्दर्शिनस्तदात्मानस्तदीये परमाकाशलक्षणे धामानि स्वाभिमतानि प्राप्य स्वेच्छोपगतसकलकामास्तेन सह सदा विद्योतन्ते सर्वत्रेति सर्वं समञ्जसमेव॥ इति अनावृत्त्यधिकरणम्॥ ८॥

श्वेताचार्यपदद्वन्द्वशुश्रूषाद्योतिताध्वना।
कृतमेतन्मया भाष्यं केवलं भक्तिमात्रतः॥

इति श्रीकण्ठशिवाचार्यविरचिते ब्रह्ममीमांसाभाष्ये चतुर्थाध्यायस्य चतुर्थः पादः॥ ४॥ ४॥

समाप्तश्चतुर्थोऽध्यायः।

प्रतिषिध्यते। सदेहत्वदशायां शिवसारूप्यनियमं किञ्चिदाहुरित्याह—शरीरपरिग्रह इति। उक्तं पुराणश्लोकानामर्थं निगमयति—तस्मादिति। 'एतदुक्तं भवती'त्यादिना तु वर्णितं पुराणवचनानामर्थं 'यत्र देवा अमृतमानशाना'इत्यादितैत्तिरीयारण्यकमन्त्रतात्पर्यविषयत्वप्रदर्शनेन स्थिरीकरोतीत्यशेषमतिमङ्गलम्॥ इत्यनावृत्त्यधिकरणम्॥ ८॥

इति श्रीमदनुकूलगोत्रगण्डरगण्डप्रजमेच्चुगण्डपण्डितपुण्डरीकषण्डमार्तण्डपञ्चपाण्ड्यपूजालिङ्गवलालरायमनोभयंकरबंद्यवरायस्थापनाचार्यनेल्लूरुवीरक्षेत्रभारतीकमलगंडरगंडकूडिविंचुवरनायकरगण्डआदितप्पुवरगंड कूडिकादुवरनायकरगण्डरूपनारायणशिवातिवादिमूर्धन्यशिवदर्शनस्थापनाचार्यमहादेवप्रतिष्ठापरिनिष्ठितश्रीचिन्नबोम्मभूपालकारितायांश्रीभरद्वाजकुलजलधिकौस्तुभश्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पय्यदीक्षितस्य कृतौ श्रीकण्ठशिवाचार्यविरचितब्रह्ममीमांसाभाष्यव्याख्यायां शिवार्कमणिदीपिकाख्यायां चतुर्थस्याध्यायस्य चतुर्थः पादः॥ ४॥ ४॥

श्रीचिन्नबोम्मभूपालकारिता शिवार्कमणिदीपिका समाप्ता॥

नयमणिमालायाम्

अथ अनावृत्त्यधिकरणम् ॥ ८ ॥

सू० ॥ अनावृत्तिश्शब्दादनावृत्तिश्शब्दात् ॥ २२ ॥

दिव्यं यः कोऽपि मुक्तो यदि परमशिवानन्यसामान्यचिह्नं सङ्कल्पामोघभावप्रथितमदहरं स्वस्य सङ्कल्पयेत ।
दृष्ट्वामात्यो यथैव स्वकविभवकटस्वामिसाम्राज्यलक्ष्मीं स्यादावृत्तिः कथंस्यात्परमशिवपदात्तस्य कोपेन न स्यात् ॥४०२॥
न स्यान्मुक्ता हि तृप्ता निरतिशयमहानन्दसिन्धौ निमग्नाः प्रत्यादिष्टाभिलाषा विषयविहतिषु प्रत्युतोद्यज्जुगुप्साः ।
आद्याटस्यापथिज्ञाः परमशिवदृशा व्यञ्जितस्यात्मशक्तेः कस्मादेते विदध्युर्निजविषयमतीत्याल्पसाध्येष्वभिध्याम् ॥४०३॥
लीला पित्रादिसृष्टिर्निखिलविरचना शङ्करस्यैव तेषां यावत्स्वेच्छैव लीला स्वरसविसृमरोदेति तल्लोकसिद्धम् ।
नह्येतस्यामुदीर्णप्रमदजहसितोद्गीतहस्तांघ्रिमाला व्यापाराद्यात्मिकायां क्वचिदपि कलिता शक्तिमुल्लङ्घयलिप्सा ॥ ४०४ ॥
तन्निर्धूतध्वान्तमध्वान्तमाद्यं ये संप्राप्ता स्थानमानन्दरूपम् । संभुंजानाश्शंभुवत्सर्वकामान्नावर्तन्ते नाकमध्यायतस्ते ॥४०५

इत्यनावृत्त्यधिकरणम् ॥ ८ ॥

इति श्रीमदप्पय्यदीक्षितकृतौ अधिकरणसारसङ्ग्रहे नयमणिमालायां तृतीयपरिच्छेदे चतुर्थस्याध्यायस्य चतुर्थः पादः ॥ ४ ॥ ४ ॥

परिच्छेदश्च समाप्तः ।



शोधनपत्रम् ।

पृ०	प०	अशु०	शु०
३२४	९	°दीतम्	दितम्
	१२	°नीयम् ।	नीयं
	१७	°वयवत्वे	°वयवे
	२९	सूर्य्या च°	सूर्य्यच°
३२७	१०	°मथ	°माथ
	१०	शाठ्या° (अन्यत्रापि)	शाठ्या°
	२८	°भाववै°	°भावे वै°
३२८	२५	विकल्पेन	विकल्पे न
	३४	कल्पनीय	कल्पनीयं
३३१	२४	अन्याद्य°	अन्याय्य०
३३३	१८	°नन्तर	°नन्तरं
	२७	°प्रवृत्त्य°	°वृत्त्य°
३३४	४	हदो	हृदो
	४	न्येष्टि°	यष्टि°
	६	°दन्तर्म°	°दन्तं म°
	७	न्येष्टिहास्त	यष्टिहान् तेऽ
	३१	तावांवास्तू°	ते ते धामा°
३३५	६	गावः	दीर्घश्रृङ्गा गावः
३३९	१०	°शेषण	°शेषेण
	१७	°विद्या सं°	°विद्यासं°
	१८	°वाक्याभा°	°वाक्यभा°
	२४	वाजि°	वाज°
३४०	११	°यिष्यन्ते ॥	°यिष्यते ॥
	१८	°नस्य	°नस्य च
	२४	°वली°	°वनी°
	३०	°द्यादिः	°द्यादि°
३४२	१६	°त्यन्तेन	°त्यनेन
	२७	°वैदि°	°वेदि°
३४३	१८	°णोघैः	°णौघैः
	२३	°न्यव०	न्यत°
३४४	१३	भूतवत्	भूतग्रामवत्
३४५	१९	°दित्यु°	°क्षत्यु°
	२१	°स्वात्मम°	°स्वात्म°
३४६	१६	°स्यैव	°स्येव
३४८	९	निवृत्ते	निर्वृत्ते
	१४	न्यस्तेन	न्यस्ते
	१९	तया	तथा
	२५	°मुपा°	°मपा°
	२६	°बोपा°	°बापा°
	३०	तात्प्र°	तान्प्र°
३४९	७	°रावे°	°रवे°
	१५	प्रत्युतासछ°	प्रस्तुता तच्छ°
३५२	१९	प्रयो°	सप्रयो°
३५३	८	विशिष्टविग्रहः	विग्रहः
३५६	१९	मुक्तिनि०	मुक्तिर्नि°
३५८	१२	°प्यभि°	°प्यव्यभि०
	३४	°श्शर°	°श्शूर°
	३४	'सार्व°	'असार्व°
३५९	५	°निषद°	°निषदी°
	८	°यकै°	°यैकै°
	१८	चाप्यभि°	चाव्यभि°
	२०	फलत्वं	फलवत्त्वं
	३४	विधित	विधितः
३६०	२९	°थर्वा°	°र्थवा°
३६१	१०	पृथक्त	पृथक्
	२२	°धिको	°धिके
	२३	भेदो	भेदे
३६३	१९	°लिङ्गो°	°द्विद्यो°
	२५	°ण्येति	°ण्यादिति
३६४	७	मयो	मनो
	१०	°ष्याङ्	°ष्यङ्
	३३	°पते	°पतेः
	३३	चित्यम्	चिन्त्यम्
३६५	२	तस्यै	तस्या ए°
	२७	दशमह°	दशममह°
	३०	निवृत्यं	निर्वर्त्यम्
३६६	४	जिनः	जिन°
	८	°दिदे°	°तिदे°
	१२	कपाल°	कलाप°
	१५	वेद्यास्स°	वेद्योस्स°
	१८	निवृत्यर्थ°	निर्वर्त्य°
	२९	°संशन्	°शंसन्
	३०	°शसं°	°शंस°
	३१	°ताना	°तानां
३६७	१९	सया°	संधा°
	२०	कासु°	अतः कासु°
	२२	तदधि°	तदनधि°
	२८	°यिषक्य°	°यिषेक्य°

पृ०	प०	अशु०	शु०
३६८	१९	क्याना°	°क्यानां
	२७	°पूर्वा°	°पूर्वैत्वा°
	३०	°माशिनं	°माश्विनं
३६९	१६	श्रुतेः	श्रुते
	२०	°श्रुता	°श्रिता
	२६	नतु	ननु
३७०	१४	भावनया	भावनाया
	२५	रूपकर्मा°	रूपाकर्मा°
	२८	गुणानां	शिवगुणानां
३७१	२३	°योश्वा°	°योश्च तासु
३७२	४	देवा	वेदवा°
	१०	मत्र	मनारभ्याम्नातस्य यत्र
	११	वेदा°	वेधा°
	२५	°क्षधि°	°क्षरधि०
	२५	त्ववि°	त्वव°
	२५	इत्य°	इत्याद्य°
	२९	शमोदमो	शमदमादिसाध्यचित्तैकाग्र्यादेरपीक्षावशादेव सर्वविद्यासाधारण्यम्
	३०	°रणाबा°	°रणबा°
३७३	८	दस्य ।	दस्य
	२०	°वैदिकै°	°वैदिकैर्वाक्यै°
	२२,२८	°वैदिक°	°वैदिक°
	२८	संबारा°	संकोचा°
३७४	१०	ऽऽथर्वशाखा	ऽथर्वशिखा
	११	°रससनत्कु°	°रस्सनत्कु°
	१४	°मित्यादि	°मिति प्रथमप्रश्नस्य प्रतिवचनमोमित्येतदक्षरमादौ प्रयुक्तं
	२३	तत्तत्क°	तत्क°
	२३	यथैव	तथैव
	२४	°दानु°	°दामनु°
३७५	१९	च कार्यम् ।	समस्तोपासनञ्च कार्यम् ॥
	३०	बद्धस्तु	बद्धास्तु
३७६	११	°णीय°	°णाय
	१८	°दिति	°दीन् प्रति
	२१	मपश्येत	मपेक्ष्येत
	३२	°दाय°	°द्राय°
३७७	९	°तः प्रा°	°तोऽप्रा°
	१८	क्यानु°	°क्यस्त्वानु°

पृ०	प०	अशु०	शु०
	२९	त्येति	त्थेति
३७८	११	अक्षा°	अक्ष्या°
	२६	°विधा°	°विद्या°
	२०	°मर्थेति	°मर्थ्येत
	२९	विद्योपास्ती	विद्युपास्त्योः
	३०	विदे छागविदे	विदेः छागपशु
३७९	१५-१६	विशेष°	विषय°
	१८	°प्रत्यय	°प्रत्ययं
	१९	°सङ्ग°	°सम्म°
३७९	२२	°ष्टत्वात्	°ष्टफलत्वात्
३८०	१४	शेष°	विशेष°
	१६	°त्सायाः	°त्सया
	२८	माक्षफ°	....
३८१	१२	लकोपासनानां	....
	१९	°त्वङ्गा°	°त्करवङ्गा°
	३०	°लेऽभे°	°ले भे°
३८२	२१	युक्तं ।	युक्तं
	२२	°र्थत्वात्	°र्थत्वम् ।
	२२	°लश्र°	°लाश्र°
	२३	विद्ययेति	यदेव विद्ययेति
	२७	°क्येन	°केन
३८५	१७	°दिव्य°	°दव्य°
	२४	श्रुतिप्र°	श्रुतितव्यप्र°
३८७	२०	कर्मा°	कर्म°
	२८	शङ्कानव°	शङ्काव°
३८९	३	°मध°	°माध°
३९०	१	°मधर्म°	°म°
३९३	२३	वर्ण°	पर्ण°
३९७	२०	°स्यैव	°स्येव
३९९	२७	°श्चानु°	°श्वानु°
४००	११	°क्षेणा	°क्षेण
	२५	विहितस्या°	विहितस्य
	३१	°तेस्य°	°तेस्स°
४०१	३०	°विद्ये	°विदो°
४०२	४	°रस्या°	°राज्ञा°
४०३	१३	°भेदा°	°भेदाभेदा°
४०४	२१	°मितीत्य°	°मित्य°
	२३	°त्यपीतो°	°त्यतो°
४०६	३३	विदुरा°	विधुरा°
४०८	१९	°दित्या°	°ध्या°
४१०	१७	°मादिः	°मा धीः
	३३	तमेवं	तमेव

शोधनपत्रम् ।

पृ०	प०	अशु०	शु०
४१८	१	ततोऽनै°	ततो नै°
४२२	१४	बोधन°	भावबोध°
४२५	१२	न ।	। न
	३१	°शेष०	°श्लेष°
४२६	२२	°रूपं	°प्रसूतं
४२७	१९	°श्वरत्व°	°श्वरपरत्व°
	३०	°निर्दिष्ट°	°निर्दिष्टे
४२८	१६	स्फुटः	स्फुटी°
४२९	२०	भानात्	भासमाने
	३०	°म्याना	°म्याना
४३०	८	परमेश्वरत्वाभावे	वस्तुतः परमेश्वरत्वाभावे
	१२	°वेति न	°वेति तत्र न
४३१	३०-३२	°स्सर्वत°	°स्सर्वं त°
४३२	२५	°यैव	°यैव तदुपासनया
४३३	१३	°दृष्टिरेवो°	°त्वेवो°
	१४	°दिषु	°दिदृष्टिः
४३४	१६	°तुतया°	°तुमा°
४३५	४	अन्त्या°	अत्या°
	१६	°म्राते	°म्रातेन
	१७	°तौचि°	°विषयतौचि°
	२४	तेना°	यत्नेना°
४३६	१६	देश°	दिग्देश°
४३७	१७	°शफ°	°शफपरिमाण°
	२८	तत्रा°	तथा°
४३८	२९	°द्रुद्रं	°द्रुद्र
४३९	१३	इत्यर्थः	इति संगतिरित्यर्थः
	१३	°करणे	°करणे भाष्यकारेण
४४०	५	°श्चेति	°श्चेति पर्यवस्यति
	२६	°श्चित्ते	°श्चित्त°
४४२	१८	°नुपत्ते°	°नुपपत्ते°
४४४	१०	°त्रमनु°	°त्रानु°
	२१	मानसं	मानसो
	३०	प्रलय°	फल°
	३४	प्रायोक्ष्येत	प्रायोक्ष्यत
४४५	२१	तदन्तर°	तदनन्तर°
४४६	३४	शेष°	श्लेष°
४४७	९	तत्प्रति	तं प्रति
	१४	एव	एव हि
	३१	एवं प्रा°	एवं पाते त्विति प्रा°
४४८	१५	न ।	। न
४४९	१६	°वदस्य	पदस्य

पृ०	प०	अशु०	शु०
४५०	२७	°गवा°	°वागा°
	२८	°मुप°	°मुत्°
४५१	१९	°मत्तेव	°मत्वेव
	२३	°करणस्य	°करणकस्य
४५२	१२	स्वरू°	मनसः स्वरू°
	१३	°स्योद°	°स्यौद°
४५३	१	°सेः ब्रूम	°से ब्रूमः
	५	प्राणा°	प्राण°
	१०	लीनस्य	लीनस्य प्राणस्य
	१५	प्रकरण°	करण°
	१९	तदनन्तर°	तदन्तर°
४५४	४	चानुपोष्य	च ॥
	७	°ज्ञानिनोर्वि°	°ज्ञानिज्ञानिनोर्वि°
	१६	°स्याप्य°	°स्या°
	१७	°क्षेप°	°पेक्ष°
४५५	१६	°क्तिसु	°क्तिस्तु लयः
	१७	वाच्यं	वाच्यं इह
	१८	°मपि	°मपि तेषां
	१९	°त्पात°	°पात्त°
	२३	परविद्यासु	......
	२७	वचनं	वर्त्तमाननिर्देशस्तु
	३१	°स्तुलया	°स्तुल्या
४५६	१२	°यमिति	°य इति
	१५	°हाद्यु°	°हादु°
	२१	°तान्त°	°तान्तर°
	३२	°त्मन°	°त्मान°
	३३	°स्तदे°	°स्तदं°
४५७	२२	एवचकारौ	चकारं
	२९	°विशिश्लि°	°विश्लि°
४५८	१३	°मात्मो°	°माकाशमात्मौ°
	२२	एवत°	एवोद°
		°उत्का°	°:का°
४६०	२९	°र्थाभे°	°र्थंभे°
	३३	°वाद°	°पादा°
४६१	९	वत्क्रम°	°वक्तृ°
४६२	५	°क्रम°	°क्रम°
	१६	°वधि	°वधिः
	२४	प्राप्नु°	प्राप्त°
	२५	°न्तोप°	°न्योप°
	२६	°यावरण°	°यापवरक°
४६३	३	°ध्वंसना°	°ध्वंसन°
	२५	°स्योकः	°स्योकः

पृ०	प०	अशु०	शु०
	२९	नलीक°	नलक°
४६४	२१	°रूपतः	°रूपः
	२९	ननु	न तु
४६६	९	एव	एवाग्र
४६७	११	°यान°	°याण°
	१८	°दिपदं	°दिवस°
	१९	°लरूप°	°ल°
	१९	°रमि°	°र इ°
४६८	२२	मार्ग°	न मार्ग°
	२६	प्रय°	प्रया°
४६९	६	°दिरि°	°दिगतिरि°
	१२	श्रद्धां	श्रद्धा
	२०	तु	तत्
	२३	पुरुष°	परं पुरुष°
४७०	२६	°न्तश्च	°न्तः
४७१	७	तस्य	तस्य तयोर्मध्ये
	१२	न त°	न ताव°
	२२	'संव°	न हि 'संव°
	२९	°दत्तस्या°	°दत्तस्य
	३५	तथापि	तथा च
४७२	१९	श्रवणं	वायुश्रवणं
	२०	इति य°	इति व°
	२०	विमावानां	विमानानां
४७३	७	भिन्नमार्गः	भिन्ना मार्गाः
	१२	°दिस°	°दिसत्त्वे
	१५	यया कयाचा°	यथाकथञ्चिद°
	२१	°तेषु	°तेषु वरुणादिषु
	२९	°प्राप्या°	°प्राप्त्यर्था°
	३४	देवमा°	देवयानमा°

पृ०	प०	अशु०	शु०
४७६	२९	हिरण्य°	मुख्यत्वादिति हिरण्य°
४७७	२०	°तइतिप्रत्य°	इति प्रपत्त्य°
४७८	२५	°स्यब्रह्मतादवस्थ्यं	°स्यं ब्रह्म तावदवस्थ
	२९	प्राप्यं	प्राप्यं ब्रह्म
	३२	°तस्क°	°मित्येतत्
४८०	१	मत	मतं
४८१	२६	°नाण्व°	°नाणव°
४८२	१९	°मव°	°मप°
४८३	२१	°मः प्र°	°मप्र°
४८६	२०	°रणे	°रणे हि
४८७	३३	एव ज्ञा°	एवाज्ञा°
४८८	२०	समानार्थः	समान एवार्थः
४९०	१५	°यात्मक°	°यानन्दात्मक°
	२१	भोग°	भोगे
४९२	२७	तद°	तदा°
	२७	भूति°	भूमि°
	३१	तस्य तस्य	तस्य
४९४	१२	प्रसङ्गेन	प्रसन्नेन
४९५	२५	श्रवणा°	निषेधा°
४९६	३४	°धोनप°	°धाप°
४९७	३२	ऽभवदि°	भवन्नि°
४९८	२७	हङ्कार	हकार
५००	२७	स्योक्तेः	स्थोक्तेः
५०३	१५	°पीश°	°रीश°
	२६	अपर°	यद्वा अपर°
५०५	१३	°प्रत्तयः	प्रवृत्तयः
५०६	१३	परमा°	यद्वा परमा°